॥ अग्निचयनप्रयोगः ॥

अथ चयनस्य पूर्वाङ्गानि

अग्निचयनस्य कालविधिः सङ्कल्पश्च :-

अग्निं चेष्यमाणोऽमावास्यायां पौर्णमास्यामेकाष्टकायां वोखां सम्भरति । त्र्यहादिदीक्षापक्षे उखासम्भरणप्रभृत्यामिक्षापर्यन्तानि कर्माणि, वसन्ते[१] यथा सम्भविष्यन्ति तथोपक्रमः कार्यः । एकाष्टकायां चेदुखासम्भरणं तदा तस्यामुखासम्भरणं कृत्वा पश्चिष्ट्यादि सर्वं वसन्ते कार्यम् । चतुरो मासो दीक्षित इत्यस्मिन्पक्षे एकाष्टकायां न लभ्यते । मासादि पक्षेषूखासम्भरणप्रभृति सर्वं वसन्ते कार्यं पशुश्च यथा भवति । एवं स्मृत्वा आरम्भः कार्यः ॥

अथाग्निप्रयोग उच्यते । वसन्ते पर्वणोरेकाष्टकायां वा प्रातरग्निहोत्रं हुत्वा दर्भेष्वासीनो दर्भान् धारयमाणः पत्न्या सह प्राणानायम्य सङ्कल्पं करोति । श्री परमेश्वरप्रीत्यर्थं ज्योतिषा त्रिकद्रुकेणाग्निष्टोमेन साग्निचित्येन रथन्तरसाम्ना द्वादशशतदक्षिणेन यक्ष्ये, तेन परमेश्वरं प्रीणयानि । अप्तोर्यामश्चेत्– सोमेन यक्ष्ये अप्तोर्यामेणातिरात्रेण सर्वपृष्ठेन सर्वस्तोमेन साग्निचित्येन सहस्रदक्षिणेन तेन परमेश्वरं प्रीणयानि[२] इति विशेषः । सहस्रदक्षिणापक्षे सङ्कल्प्य त्रैधातवीया[३]।

[अग्निं चेष्यमाणो वसन्ते पौर्णमास्याममावस्यां वा प्रातरग्निहोत्रं हुत्वा संकल्पं करोति ।

आगूश्चैत्र्याममायां चेत् साग्निचित्यक्रतोर्भवेत् ।
आमिक्षान्तानि शुक्ले स्युः पर्वतुल्यो हि स स्मृतः ॥
सक्षेदान्त उखा घर्मसम्भृतिर्वायवे पशुः ।
पौर्णमास्यां तु सुत्ये स्यात् षष्ठ्यामागूः क्रतोर्भवेत् ॥
दीक्षोपसत्त्रिषट् चैव सुत्यैका दशसङ्ख्यकम् ।

---

१. पर्वण्युखासम्भरणपक्षे ।

२. सोमेन यक्ष्ये अतिरात्रसर्वपृष्ठाप्तोर्यामेन साग्निचित्येन सर्वस्तोमेन सहस्रदक्षिणेन तेन परमेश्वरं प्रीणयानि इति पाठान्तरम् । सोमेन यक्ष्ये ज्योतिष्टोमेनातिरात्रेण साग्निचित्येन रथन्तरसाम्ना द्वादशशतदक्षिणेन तेन परमेश्वरं प्रीणयानि इति ज्योतिरतिरात्रेऽपि क्वचित् चयनं विहितम् ।

३. त्रैधातवीयेष्टिप्रयोगार्थं ११९ पृष्ठं पश्यन्तु । 'त्रिकद्रुकेण उक्थ्येन यक्ष्यमाणश्चेत् सहस्रदक्षिणा नियता बृहत्पृष्ठश्च कर्तव्यः । श्यैते हि सहस्रमनूद्यते सहस्रेणैव शिक्षतीति । नह्यसन्नर्थो अनूद्यते । सन्नेव उच्यते' इति कपर्दिभाष्यम् । सहस्रदक्षिणे सोमे विद्युत्त्रैधातवीयका । ततस्सोमप्रवाकस्य वरणादि च सौमिकम्– इत्यपि प्रयोगक्रमः विद्यते ॥

सोमेन यक्ष्ये ज्योतिष्टोमेनातिरात्रेण साग्निचित्येन रथन्तरसाम्ना द्वादशशतदक्षिणेन तेन परमेश्वरं प्रीणयानि । विद्युदसि । सोमप्रवाकवरणादि सक्षेदान्ते । इति आन्ध्रप्रयोगपाठः ।]

उपक्रमः :–

तां समाप्य **विद्युत्** । ततः सोमप्रवाकवरणम् । मधुपर्कादिभिरभ्यर्च्य ***सोमप्रवाक सोमं म*** इत्यादि ऋत्विग्वरणम् । ***कच्चिन्नाहीनः*** इति पृष्टे ***नाहीनस्त्रिकद्रुको ज्योतिरग्निष्टोमः*** । शेषं प्रकृतिवत् । अप्तोर्यामपक्षे – ***नाहीनस्सर्वपृष्ठसर्वस्तोमोऽप्तोर्यामस्सोमः । कच्चित्कल्याण्यो दक्षिणा*** इति पृष्टे ***सन्ति कल्याण्यो दक्षिणास्सुरूपा बहुमूल्यास्सहस्रं गावः*** । सक्षेदान्तं कृत्वा । अग्निं विहृत्य जुह्वां चतुर्गृहीतं गृहीत्वा ***बृहस्पतिपुरोहिता देवा देवानां देवा देवाः प्रथमजा देवा देवेषु पराक्रमध्वं प्रथमा द्वितीयेषु द्वितीयास्तृतीयेषु त्रिरेकादशास्त्रिस्त्रयस्त्रिꣳशा*** [४] ***अनु व आरभ इदꣳ शकेयं यदिदं करोमि ते मावत ते माजिन्वतास्मिन् ब्रह्मन्नस्मिन्क्षत्रेऽस्यामाशिष्यस्यां पुरोधायामस्मिन् कर्मन्नस्यां देवहूत्याꣳ स्वाहा*** आहवनीये जुहोति । देवेभ्य इदम् । तूष्णीं जुहूं स्रुवं च सम्मृज्य ।

सावित्रहोमः :–

जुह्वामष्टगृहीतं चतुर्गृहीतं वा गृहीत्वा[५] **युञ्जानः प्रथमं मनस्तत्वाय सविता धियः । अग्निं ज्योतिर्निचाय्य पृथिव्या अध्याभरत् ॥ युक्त्वाय मनसा देवान्थ्सुवर्यतो धिया दिवम् । बृहज्ज्योतिः करिष्यतस्सविता प्रसुवाति तान् ॥ युक्तेन मनसा वयं देवस्य सवितुस्सवे । सुवर्गेयाय शक्त्यै ॥ युञ्जते मन उत युञ्जते धियो विप्रा विप्रस्य बृहतो विपश्चितः । वि होत्रा दधे वयुनाविदेक इन्मही देवस्य सवितुः परिष्टुतिः ॥ युजे वां ब्रह्म पूर्व्यं नमोभिर्विश्लोका यन्ति पथ्येव सूराः । शृण्वन्ति विश्वे अमृतस्य पुत्रा आ ये धामानि दिव्यानि तस्थुः ॥ यस्य प्रयाणमन्वन्य इद्ययुर्देवा देवस्य महिमानमर्चतः । यः पार्थिवानि विममे स एतशो रजाꣳसि देवस्सविता महित्वना ॥ देव सवितः प्रसुव यज्ञं प्रसुव यज्ञपतिं भगाय दिव्यो गन्धर्वः । केतपूः केतं नः**

---

४. त्रिस्त्रयस्त्रिꣳशाः इति पाठान्तरे वाक्यावसानम् ।

५. सूत्रकारेण अष्टगृहीतमेव उक्तम् । चतुर्गृहीतेन जुहोतीति तैत्तिरीये विहितत्वात्, चतुर्गृहीतेन वा इति कपर्दिभाष्ये च उक्तत्वात् ।

पुनातु वाचस्पतिर्वाचमद्य स्वदाति नः ॥ इमं नो देवसवितर्यज्ञं प्रसुव देवायुव७ँ सखिविद७ँ सत्राजितं धनजित७ँ सुवर्जित७ँ स्वाहा यजुरष्टमाभिः ऋग्भिरेकामाहुतिं जुहोत्यन्तर्वेद्यूर्ध्वस्तिष्ठन् । सवित्र इदम् । अपरं चतुर्गृहीतं गृहीत्वा । **ऋचास्तोम७ँ समर्धय गायत्रेण रथन्तरम् । बृहद्गायत्रवर्तनि स्वाहा ।** बृहत इदम्[६] । एतदादि विपाजसेत्यन्तमग्निधारणम् ।

अभ्र्यादानम् :-

देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां गायत्रेण छन्दसाददेऽङ्गिरस्वदभ्रिरसि नारिरसि पृथिव्यास्सधस्थादग्निं पुरीष्यमङ्गिरस्वदाभर त्रैष्टुभेन त्वा छन्दसाददेऽङ्गिरस्वद्बभ्रिरसि नारिरसि त्वया वय७ँ सधस्थ आग्नि७ँ शकेम खनितुं पुरीष्यं जागतेन त्वा छन्दसाददेऽङ्गिरस्वद्धस्त आधाय सविता बिभ्रदभ्रि७ँ हिरण्ययीम् । तया ज्योतिरजस्रमिदग्निं खात्वी न आ भरानुष्टुभेन त्वा छन्दसाददेऽङ्गिरस्वत् चतुर्भिरभ्रिमादत्ते वैणवीं कल्माषीं सुषिरामसुषिरां वोभयतःक्ष्णूमन्यतरतःक्ष्णूं वा प्रादेशमात्रीमरत्निमात्रीं व्यायाममात्रीमपरिमितां वा खादिरीं पालाशीमौदुम्बरीमर्कमयीं कार्श्मर्यमयीं वैकङ्कतीं शमीमयीं वा यो वा यज्ञियो वृक्षः फलग्रहिः ।

उखार्थं मृदाहरणाय गमनम् :-

इमामगृभ्णन्रशनामृतस्य पूर्व आयुषि विदथेषु कव्या । तया देवास्सुतमा बभूवुर्ऋतस्य सामन्थ्सरमारपन्ती अश्वाभिधानीं रशनामादाय । **प्रतूर्तं वाजिन्नाद्रव वरिष्ठामनु संवतम् । दिवि ते जन्म परममन्तरिक्षे नाभिः पृथिव्यामधि योनिः** अश्वमभिदधाति । तूष्णीं गर्दभरशनामादाय । **युञ्जाथा७ँ रासभं युवमस्मिन् यामे वृषण्वसू । अग्निं भरन्तमस्मयुम्** गर्दभमभिदधाति । स्नानेन शुद्धिः गर्दभस्य । **योगेयोगे तवस्तरं वाजेवाजे हवामहे । सखाय इन्द्रमूतये ॥ प्रतूर्वन्नेह्यवक्रामन्नशस्ती रुद्रस्य गाणपत्यान्मयोभूरेहि । उर्वन्तरिक्षमन्विहि स्वस्तिगव्यूतिरभयानि कृण्वन् । पूष्णा सयुजा सह । पृथिव्यास्सधस्थादग्निं पुरीष्यमङ्गिरस्वदच्छेहि** कृष्णाजिनं पुष्करपर्णं कमण्डलुं मौञ्जीं रज्जुं स्रुवं जुहूं आज्यं हिरण्यं चादाय तिसृभिरश्वप्रथमा अध्वर्युब्रह्मयजमाना[७] अभिप्रव्रजन्ति यत्र मृदं खनिष्यन्तस्स्युः । ***अग्निं***

---

६. अग्नय इदमिति पाठान्तरम् ।

७. अश्वः प्रथमः तदनु गर्दभः तदनु अध्वर्यवादयः इत्यर्थः ।

पुरीष्यमङ्गिरस्वदच्छेहि गच्छन्नध्वर्युर्जपति । **अग्निं पुरीष्यमङ्गिरस्वदच्छेमः पाप्मानम्** येन द्वेष्येण सङ्गच्छते तमभिमन्त्रयते । अपश्यन्निर्दिशति । **अग्निं पुरीष्यमङ्गिरस्वद्भरिष्यामः** वल्मीकवपां या सूर्यस्योदेतोस्तां तूष्णीमुद्धृत्य अप उपस्पृश्य मन्त्रेणोपतिष्ठते[८] ।

मृत्खनस्य अश्वेनाक्रमणम् :-

अन्वग्निरुषसामग्रमख्यदन्वहानि प्रथमो जातवेदाः । अनु सूर्यस्य पुरुत्रा च रश्मीननु द्यावापृथिवी आततान वल्मीकवपायाः प्रक्रामति । **आगत्य वाज्यध्वनस्सर्वा मृधो विधूनुते । अग्निꣳ सधस्थे महति चक्षुषा नि चिकीषते ॥ आक्रम्य वाजिन्पृथिवी-मग्निमिच्छ रुचा त्वम् । भूम्या वृत्वाय नो ब्रूहि यतः खनाम तं वयं** द्वाभ्यां मृत्खनं अश्वस्य दक्षिणपूर्वेण पदेनाक्रमय्य । **द्यौस्ते पृष्ठं पृथिवी सधस्थमात्मान्तरिक्षꣳ समुद्रस्ते योनिः । विख्याय चक्षुषा त्वमभितिष्ठ पृतन्यतः** अश्वस्य पृष्ठं संमार्ष्टि[९] । **अभितिष्ठ पृतन्यतोऽधरे सन्तु शत्रवः । इन्द्र इव वृत्रहा तिष्ठापः क्षेत्राणि सञ्जयन्न*भिष्ठितोऽसि पाप्मानम्*[१०]** यं द्वेष्टि तमधस्पदमश्वस्य मनसा ध्यायति । **उत्क्राम महते सौभगायास्मादास्थानाद्-द्रविणोदा वाजिन् । वयꣳ स्याम सुमतौ पृथिव्या अग्निं खनिष्यन्त उपस्थे अस्याः ॥ उदक्रमीद् द्रविणोदा वाज्यर्वाकस्स लोकꣳ सुकृतं पृथिव्याः । ततः खनेम सुप्रतीकमग्निꣳ सुवो रुहाणा अधि नाक उत्तमे** द्वाभ्यां मृत्खनादुदञ्चमश्वमुत्क्रमय्य । **अपो देवीरुपसृज मधुमतीरयक्ष्माय प्रजाभ्यः । तासाꣳ स्थानादुज्जिहतामोषधयः सुपिप्पलाः** अश्वस्य पदेऽप उपसृज्य ।

मनस्वतीहोमः -

पदे हिरण्यं निधाय जुह्वां चतुर्गृहीतं गृहीत्वा[११]। **जिघर्म्यग्निं मनसा घृतेन प्रतिक्ष्यन्तं भुवनानि विश्वा । पृथुं तिरश्चा वयसा बृहन्तं व्यचिष्ठमन्नꣳ रभसं विदानम् ॥ आ त्वा**

---

८. या सूर्यस्योदेतोस्तां वल्मीकवपां तूष्णीमुद्धृत्याप उपस्पृश्य अग्निं पुरीष्यं ...... वल्मीकवपामुपतिष्ठते इति पाठान्तरम् ।

९. सम्मार्ष्टि सर्वतः स्पृशति ।

१०. *अभितिष्ठितोऽसि पाप्मानम्* इति पाठान्तरम् ।

११. सकृद्गृहीतं गृहीत्वा इति पाठान्तरम् ।

जिघर्मि वचसा घृतेनारक्षसा मनसा तज्जुषस्व । मर्यश्रीः स्पृहयद्वर्णो अग्निर्नाभिमृशे तनुवा जर्हृषाणस्स्वाहा । अग्नय इदम् । मनस्वतीभ्यामेकामाहुतिं हिरण्ये हुत्वा । अपादाय हिरण्यम् ।

परिलेखनम् :-

परि वाजपतिः कविरग्निर्हव्यान्यक्रमीत् । दधद्रत्नानि दाशुषे ॥ परि त्वाग्ने पुरं वयं विप्र७ं सहस्य धीमहि । धृषद्वर्णं दिवेदिवे भेत्तारं भङ्गुरावतः ॥ त्वमग्ने द्युभिस्त्वमाशुशुक्षणिस्त्वमद्भ्यस्त्वमश्मनस्परि । त्वं वनेभ्यस्त्वमोषधीभ्यस्त्वन्नृणान्नृपते जायसे शुचिः तिसृभिरभ्रिया मृत्खनं प्रत्यृचं परिलिखति बाह्यां बाह्यां वर्षीयसीम् । अप उपस्पृश्य।

मृदां सम्भरणम् :-

देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां पृथिव्यास्सधस्थेऽग्निं पुरीष्यमङ्गिरस्वत्खनामि ॥ ज्योतिष्मन्तं त्वाग्ने सुप्रतीकमजस्रेण भानुना दीद्यानम् । शिवं प्रजाभ्योऽहि७ंसन्तं पृथिव्यास्सधस्थेऽग्निं पुरीष्यमङ्गिरस्वत्खनामि द्वाभ्यां खनति । अप उपस्पृश्य । **अपां पृष्ठमसि सप्रथा उर्वग्निं भरिष्यदपरावपिष्ठम् । वर्धमानं मह आ च पुष्करं दिवो मात्रया वरिणा प्रथस्व** पुष्करपर्णमाहृत्य । **अपां पृष्ठमसि सप्रथा उर्वग्निं भरिष्यदपरावपिष्ठम् । वर्धमानं मह आ च पुष्करं दिवो मात्रया वरिणा प्रथस्व** एतयैव विवेष्ट्य । **शर्म च स्थो वर्म च स्थो अच्छिद्रे बहुले उभे । व्यचस्वती संवसाथां भर्तमग्निं पुरीष्यम् ॥ संवसाथा७ं सुवर्विदा समीची उरसा त्मना । अग्निमन्तर्भरिष्यन्ती ज्योतिष्मन्तमजस्रमित्** द्वाभ्यामुत्तरेण मृत्खनं कृष्णाजिनं प्राचीनग्रीवमुत्तरलोमास्तृणाति । उपरिष्टात्पुष्करपर्णमुत्तानम् ।

पुरीष्योऽसि विश्वभराः । अथर्वा त्वा प्रथमो निरमन्थदग्ने मृत्खनमभिमन्त्र्य । तूष्णीं मृदमादाय । **पुरीष्योऽसि विश्वभराः । अथर्वा त्वा प्रथमो निरमन्थदग्ने ॥ त्वामग्ने पुष्करादध्यथर्वा निरमन्थत । मूर्ध्नो विश्वस्य वाघतः ॥ तमु त्वा दध्यङ् ऋषिः पुत्र ईधे अथर्वणः । वृत्रहणं पुरन्दरम् ॥ तमु त्वा पाथ्यो वृषा समीधे दस्युहन्तमम् ।**

---

१२. त्वामग्ने --- वाघतः ॥ तमु त्वा --- पुरन्दरम् ॥ तमु त्वा --- रणेरणे ॥ इति तिसृभिः सम्भरणपक्षे ।

धनञ्जयꣳ रणेरणे कृष्णाजिने पुष्करपर्णे च सम्भरति चतसृभिस्तिसृभिर्वा गायत्रीभिर्ब्राह्मणस्य[१२]। यं कामयेत वसीयान् स्यादित्युभयीभिस्तस्य सम्भरेत् । अष्टाभिस्सम्भरति[१३]। **जनिष्वा हि जेन्यो अग्रे अह्नाꣳ हितो हितेष्वरुषो वनेषु । दमेदमे सप्त रत्ना दधानोऽग्निर्होता नि षसादा यजीयान्** सम्भृतां मृदमभिमृश्य । अन्यया मृदा मृत्खनं संलोभ्य[१४] **सं ते वायुर्मातरिष्वा दधातूत्तानायै हृदयं यद्विलिष्टम् । देवानां यश्चरति प्राणथेन तस्मै च देवि वडस्तु तुभ्यम्**[१५] मृत्खनेऽप आनीय[१६] समुद्यम्य कृष्णाजिनस्यान्तान् । **सुजातो ज्योतिषा सह शर्म वरूथमासदस्सुवः । वासो अग्ने विश्वरूपꣳ संव्ययस्व विभावसो** क्षौमेण मौञ्जेनार्कमयेण वा दाम्नोपनह्यति ।

सम्भृतमृदो हरणम् :-

तूष्णीं मृदमादाय । **उदु तिष्ठ स्वध्वरावा नो देव्या कृपा । दृशे च भासा बृहता सुशुक्वनिराग्ने याहि सुशस्तिभिः ॥ ऊर्ध्व ऊ षु ण ऊतये तिष्ठा देवो न सविता । ऊर्ध्वो वाजस्य सनिता यदञ्जिभिर्वाघद्भिर्विह्वयामहे** सावित्रीभ्यामुत्तिष्ठति । **स जातो गर्भो असि रोदस्योरग्ने चारुर्विभृत ओषधीषु । चित्रश्शिशुः परितमाꣳस्यक्तः प्रमातृभ्यो अधि कनिक्रदद्गाः** हरति गर्दभसमीपम् । **स्थिरो भव वीड्वङ्ग आशुर्भव वाज्यर्वन् । पृथुर्भव सुषदस्त्वमग्नेः पुरीषवाहनः** गर्दभस्य पृष्ठ आदधाति । **शिवो भव प्रजाभ्यो मानुषीभ्यस्त्वमङ्गिरः । मा द्यावापृथिवी अभिशूशुचो मान्तरिक्षं मा वनस्पतीन्** आहितमभिमन्त्रयते । **प्रैतु वाजी कनिक्रदन्नानदद्रासभः पत्वा । भरन्नग्निं पुरीष्यं मा पाद्यायुषः पुरा ॥ रासभो वां कनिक्रदत्सुयुक्तो वृषणा रथे । स वामग्निं पुरीष्यमाशुर्दूतो वहादितः ॥ वृषाग्निं वृषणं भरन्नपां गर्भꣳ समुद्रियम् । अग्न आ याहि वीतय**

---

१३. पुरीष्योऽसि --- अग्ने ॥ त्वामग्ने --- वाघतः ॥ तमु त्वा --- पुरन्दरम् ॥ तमु त्वा --- रणेरणे ॥ सीद होतः --- वयोधाः ॥ नि होता --- अग्निः ॥ सꣳ सीदस्व --- दर्शतम् ॥ जनिष्वा हि --- यजीयान् ॥ इत्यष्टाभिः सम्भरणपक्षे ।

१४. संलोभनमिति, यथाऽवटमिति न ज्ञायते तथा मृदन्तरेणाभिपूरणम् ।

१५. वडस्तु तुभ्यम् इति नित्येऽग्नौ । वषडस्तु तुभ्यं इति काम्येऽग्नौ ।

१६. उखार्थे मृत्खनप्रदेशे भूमावपोऽवनयेत् ।

ऋत७ँ सत्यम् अध्वर्युब्रह्मयजमानाः तिसृभिरत्वरमाणा अश्वप्रथमाः प्रत्यायन्ति । **अग्निं पुरीष्यमङ्गिरस्वद्भरामः पाप्मानम्** येन द्वेष्येण सङ्गच्छते तमभिमन्त्रयतेऽपश्यन्निर्दिशति । उत्तरेण विहारं परिश्रिते । **ओषधयः प्रतिगृह्णीताग्निमेत७ँ शिवमायन्तमभ्यत्र युष्मान् । व्यस्यन् विश्वा अमतीरारातीर्निषीदन्नो अप दुर्मति७ँ हनत् ॥ ओषधयः प्रतिमोदध्वमेनं पुष्पावतीस्सुपिप्पलाः । अयं वो गर्भ ऋत्वियः प्रत्न७ँ सधस्थमासदत्** द्वाभ्यामोषधीषु पुष्पवतीषु फलवतीषु उपावहरति बद्धामेव मृदम् । आहवनीयाग्निं परित्यज्य[१७] ।

उखार्थं मृदः कल्पनम् :-

वि पाजसा पृथुना शोशुचानो बाधस्व द्विषो रक्षसो अमीवाः । सुशर्मणो बृहतश्शर्मणि स्यामग्नेरह७ँ सुहवस्य प्रणीतौ दामबन्धं विस्रस्य । **आपो हि ष्ठा मयोभुवस्ता न ऊर्जे दधातन । महे रणाय चक्षसे ॥ यो वश्शिवतमो रसस्तस्य भाजयतेह नः । उशतीरिव मातरः ॥ तस्मा अरङ्गमाम वो यस्य क्षयाय जिन्वथ । आपो जनयथा च नः** तिसृभिरप उपसृज्य । **मित्रस्स७ँसृज्य पृथिवीं भूमिं च ज्योतिषा सह । सुजातं जातवेदसमग्निं वैश्वानरं विभुम् ॥ अयक्ष्माय त्वा स७ँ सृजामि प्रजाभ्यः । विश्वे त्वा देवा वैश्वानरास्स७ँसृजन्त्वानुष्टुभेन छन्दसाङ्गिरस्वत्** द्वाभ्यां संसर्जनीयैः संसृजत्यर्मकपालैः पिष्टैर्वेणवङ्गारैर्व्रीहितुषैः पलाशकषायेण शर्कराभिः पिष्टाभिः कृष्णाजिनलोमभिरजलोमभिरिति । यच्चान्यद्दृढार्थमुपार्धं मन्यते ।

उखाकरणम् :-

अथ यजमानः । **रुद्राः सम्भृत्य पृथिवीं बृहज्ज्योतिः समीधिरे । तेषां भानुरजस्र इच्छुक्रो देवेषु रोचते** मृदं संक्षिप्य । **स७ँसृष्टां वसुभीरुद्रैर्धीरैः कर्मण्यां मृदम् । हस्ताभ्यां मृद्वीं कृत्वा सिनीवाली करोतु ताम् ॥ सिनीवाली सुकपर्दा सुकुरीरा स्वौपशा । सा तुभ्यमदितेमह ओखां दधातु हस्तयोः ॥ उखां करोतु शक्त्या बाहुभ्यामदितिर्धिया । माता पुत्रं यथोपस्थे साग्निं बिभर्तु गर्भ आ** तिसृभिः कर्त्रे अध्वर्यवे प्रयच्छति । बहुभार्यश्चेन्महिष्यै । **मखस्य शिरोऽसि** पिण्डं कृत्वा । **यज्ञस्य पदे स्थः**

---

१७. आच्छृन्दनान्तमाहवनीयस्य धारणमित्युपदेशः इति T G. M पाठः ।

कृष्णाजिनं पुष्करपर्णं च युगपदभिमृशति । मृदि वाङ्गुष्ठाभ्यां निगृह्णाति । **वसवस्त्वा कृण्वन्तु गायत्रेण छन्दसाङ्गिरस्वत् पृथिव्यसि ध्रुवासि धारया मयि प्रजा७ँ रायस्पोषं गौपत्य७ँ सुवीर्य७ँ सजातान् यजमानाय । रुद्रास्त्वा कृण्वन्तु त्रैष्टुभेन छन्दसाङ्गिरस्वदन्तरिक्षमसि ध्रुवासि धारया मयि प्रजा७ँ रायस्पोषं गौपत्य७ँसुवीर्य७ँ सजातान् यजमानाय । आदित्यास्त्वा कृण्वन्तु जागतेन छन्दसाङ्गिरस्वत् द्यौरसि ध्रुवासि धारया मयि प्रजा७ँ रायस्पोषं गौपत्य७ँसुवीर्य७ँ सजातान् यजमानाय । विश्वे त्वा देवा वैश्वानराः कृण्वन्त्वानुष्टुभेन छन्दसाङ्गिरस्वद्दिशोऽसि ध्रुवासि धारया मयि प्रजा७ँ रायस्पोषं गौपत्य७ँ सुवीर्य७ँ सजातान् यजमानाय ।** चतुर्भिर्महिष्युखां करोति बहुभार्यस्य । अध्वर्युरेक-भार्यस्य । क्रियमाणमेतैरेव मन्त्रैर्यजमानोऽनुमन्त्रयते । त्र्युद्धिं पञ्चोद्धिमपरिमितोद्धिं वा । चतुरश्रां परिमण्डलां वा । प्रादेशमात्रीमूर्ध्वप्रमाणेन, अरत्निमात्रीं तिर्यक्प्रमाणेन, व्यायाममात्रीं समन्तपरिमाणेन । अपरिमितां वा । कुर्वंश्चतस्रोऽश्रीः प्रतिदिशमुन्नयति, अष्टाश्रिं वा । नवाश्रिमभिचरतः कुर्यात् । द्व्यङ्गुले बिलादधस्तात्* । **अदित्यै रास्नासि** उपबिलं रास्नां करोति । अश्रीणां रास्नायाश्च सन्धौ द्वौ चतुरः षडष्टौ वा स्तनान् करोति । **अदितिस्ते बिलं गृह्णातु पाङ्क्तेन छन्दसाङ्गिरस्वत्** बिलं कृत्वा । **कृत्वाय सा महीमुखां मृन्मयीं योनिमग्नये । तां पुत्रेभ्यः सं प्रायच्छददितिः श्रपयानिति** उत्तरतस्सिकतासु प्रतिष्ठाप्य । ***मित्रैतां त उखां परिददाम्यभित्या एषा मा भेदि*** मित्राय रक्षणार्थं परिददाति । य उखां करोति सोऽषाढां एतस्या एव मृदस्तूष्णीं चतुरश्रां त्र्यालिखितामिष्टकां करोति[१८] । श्येनादौ तदनुगुणाम् ।

उखाया धूपनम् :-

गार्हपत्यादग्निमाहृत्य अश्वशकृत्प्रदीप्य । **वसवस्त्वा धूपयन्तु गायत्रेण छन्दसाङ्गिरस्वत्, रुद्रास्त्वा धूपयन्तु त्रैष्टुभेन छन्दसाङ्गिरस्वत्,आदित्यास्त्वा धूपयन्तु जागतेन छन्दसाङ्गिरस्वत्, विश्वे त्वा देवा वैश्वानरा धूपयन्त्वानुष्टुभेन छन्दसाङ्गिरस्वत्, इन्द्रस्त्वा धूपयत्वङ्गिरस्वत्, विष्णुस्त्वा धूपयत्वङ्गिरस्वत्, वरुणस्त्वा धूपयत्वङ्गि-**

---

* अश्रीः कुर्यादित्यर्थः ।

१८. चतरश्रेऽग्नौ अषाढा चतुरश्रा भवति । अन्यासु चितिषु तत्तदनुगुणाकारा भवति । त्र्यालिखिता तु सर्वत्र भवेदेव ।

रस्वत् सप्तभिरश्वशकेनोखां धूपयति । अग्निं परित्यज्य ।

लोहितपचनीयैरुखायाः पचनम् :-

अदितिस्त्वा देवी विश्वदेव्यावती पृथिव्यास्सधस्थेऽङ्गिरस्वत्खनत्ववट अग्रेण गार्हपत्यमवटं खात्वा । (अप उपस्पृश्य) लोहितपचनीयै[१९]स्सम्भारैरवस्तीर्य । **देवानां त्वा पत्नीर्देवीर्विश्वदेव्यावतीः पृथिव्यास्सधस्थेऽङ्गिरस्वद्दधतूखे** तस्मिन्नुखामवदधाति । तूष्णीमषाढामन्ववधाय । लोहितपचनीयैस्सम्भारैः प्रच्छाद्य गार्हपत्यादग्निमाहृत्य । **धिषणास्त्वा देवीर्विश्वदेव्यावतीः पृथिव्यास्सधस्थेऽङ्गिरस्वदभीन्धतामुखे, ग्नास्त्वा देवीर्विश्व देव्यावतीः पृथिव्यास्सधस्थेऽङ्गिरस्वच्छ्रपयन्तूखे, वरूत्रयस्त्वा देवीर्विश्वदेव्यावतीः पृथिव्यास्सधस्थेऽङ्गिरस्वत्पचन्तूखे, जनयस्त्वा देवीर्विश्वदेव्यावतीः पृथिव्यास्सध स्थेऽङ्गिरस्वत्पचन्तूखे** चतुर्भिरुखायामग्निमभ्यादधाति । **मित्रैतामुखां पचैषा मा भेदि । एतां ते परिददाम्यभित्यै ॥ अभीमां महिना दिवं मित्रो बभूव सप्रथाः । उत श्रवसा पृथिवीम् ॥ मित्रस्य चर्षणीधृतः श्रवो देवस्य सानसिम् । द्युम्नं चित्रश्रवस्तमम्** पच्यमानां तिसृभिर्मैत्रीभिरुपचरति ।

उखाया उद्वासनम् :-

धृष्टिमादाय भस्मापोह्य । पक्वाम् **देवस्त्वा सवितोद्वपतु सुपाणिस्स्वङ्गुरिः । सुबाहुरुत शक्त्या** उद्वास्य । **अपद्यमाना पृथिव्याशा दिश आ पृण । उत्तिष्ठ बृहती भवोर्ध्वा तिष्ठ ध्रुवा त्वम्** उत्तरतस्सिकतासु प्रतिष्ठाप्य । ***मित्रैतां त उखां परिददाम्यभित्या एषा मा भेदि*** मित्राय परिददाति । तूष्णीमषाढामुद्वास्य । पाकाग्नेस्त्यागः ।

अजाक्षीरेणोखाया आच्छृन्दनम् :-

वसवस्त्वाऽऽच्छृन्दन्तु गायत्रेण छन्दसाङ्गिरस्वत्, रुद्रास्त्वाऽऽच्छृन्दन्तु त्रैष्टुभेन छन्दसाङ्गिरस्वत्, आदित्यास्त्वाऽऽच्छृन्दन्तु जागतेन छन्दसाङ्गिरस्वत्, विश्वे त्वा देवा वैश्वानरा आ च्छृन्दन्त्वानुष्टुभेन छन्दसाङ्गिरस्वत् चतुर्भिरजाक्षीरेण उखामाच्छृणत्ति ।

---

१९. गोशकृदिक्षुपर्णाद्यैः इत्यर्थः ।

२०. एतदनन्तरं एकाष्टकायां चेदुखासम्भरणं तदा एतदन्तं कृत्वाग्निविहरणम् । पर्वणि चेदेतदन्तं कृत्वा प्रवर्ग्यं सम्भृत्य पशुः इत्येवं वाक्यद्वयं क्वचिन्मातृकाग्रन्थेषु उक्तमस्ति । एवं रीत्या कथमनुष्ठानमिति न ज्ञायते ।

तूष्णीमषाढाम् । ब्रह्मा उखाकर्मसु क्रियमाणेषु दक्षिणत आस्ते ॥ [२०] प्रवर्ग्यसम्भरणेन सह घर्मेष्टकाकुलायिनीसम्भरणं च ।

॥ अथ वायव्यपशुः ॥

अग्निभ्यः कामाय पशूनालभते मुष्करान् । प्राजापत्यमजं तूपरमुपाकृत्याश्वर्षभवृष्णिबस्तान् । अपि वा सर्वेषामेतेषां स्थाने वायवे नियुत्वते श्वेतमजं तूपरमालभते । वायव्यपशुपक्षमाश्रित्य प्रयोगः ।

अमावास्यायां पौर्णमास्यां वा प्रातरग्निहोत्रं हुत्वा । प्राणानायम्य, अग्निं चेष्यमाणो वायव्येन नियुत्वता पशुना यक्ष्ये । समारोप्य मथित्वोपावरोह्यायतने निधाय । न विद्युत् । अग्निं प्रणीय षड्ढोत्रादि निरूढपशुवत् । एक एव यूपः । पाशुबन्धकी वेदिः । समानविधानत्वात् । पूर्ववत्सामिधेन्यः [२१] । **वायवे नियुत्वते त्वा जुष्टमुपाकरोमि । वायवे नियुत्वते त्वा जुष्टं नियुनज्मि । वायवे नियुत्वते त्वा जुष्टं प्रोक्षामि ।** स्रुच्याघारे विशेषः । **विष्णोस्थानमसीत इन्द्रो अकृणोद्वीर्याणि** अवतिष्ठते । **हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक आसीत् । स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम स्वाहा** स्रुच्यमाघारयति । **वागसि प्राजापत्या सपत्नक्षयणी वाचा मेन्द्रियेणाविश ।** प्रजापतय इदम् । ***हिं बृहद्भाः*** इत्यादि निरूढपशुवत् । ***वायवे नियुत्वते छागस्य वपाया मेदसोऽनुब्रूहि ॥ वायवे नियुत्वते छागस्य वपाया मेदसः प्रेष्य*** ॥ वायवे नियुत्वत इदम् । **वायोर्नियुत्वतोऽहं देवयज्ययेन्द्रियावी भूयासम् ॥ जेमानं** इति वा । अत्र पशुबन्धवद्दक्षिणा [२२] । बहिस्तन्त्रवर्तित्वात् । वपामार्जनान्तं कृत्वा प्राजापत्यं द्वादशकपालं पशुपुरोडाशं निर्वपति । अपि वा वैश्वानरं द्वादशकपालं पशुपुरोडाशं निर्वपति । यः कश्चनाग्नौ पशुरालम्भ्यते वैश्वानर एवास्य द्वादशकपालः पशुपुरोडाशो भवतीत्येके । अस्मिन्पक्षे अग्नीषोमीयसवनीययोरपि स एव । कपालोपधानकाले युग्मानामावृत्तिः । प्रचरणकाले उपांशुप्रचारः । ***प्रजापतये, पुरोडाशस्यानुब्रूहि । प्रजापतये, पुरोडाशस्य प्रेष्य*** । प्रजापतय इदम् । **प्रजापतेरहं --- अन्नादो भूयासम् । ऐन्द्रः प्राण** इत्यन्तं कृत्वा पशोः शिरश्छित्वा मृदा प्रलिप्य निदधाति । शेषं पशुवत् । **यज्ञ शं च म,** वृष्टिवर्जम् । ब्राह्मणतर्पणान्तम् । तेनेष्ट्वा, संवत्सरं

---

२१. अयं प्रयोगः आश्वलायनहौत्रपक्षे । आपस्तम्बहौत्रपक्षे तु एकविंशतिश्चतुर्विंशतिर्वा सामिधेन्यो भवन्ति । एकविंशतिसामिधेनीपक्षे ततस्त्वा॒ सप्तवि॒तिधेत्यूहः । चतुर्विंशतिसामिधेनीपक्षे ततस्वां त्रि॒शद्धेत्यूहः ।

२२. वासुदेवीयकारिकासु इयं विहिता । प्राचीनकारिकासु दक्षिणादानं निषिद्धम् ।

न मांसमश्नीयात् न स्त्रियमुपेयान्नोपरि शयीत । अपि वा मांसमश्नीयात् उपरि शयीत स्त्रियं त्वेव नोपेयादिति वाजसनेयकम् । पश्वन्ते घर्मसम्भृतिः । प्रवर्ग्यसम्भरणमनस्तमिते । इतरथा पर्वान्तरे । प्रवर्ग्यं सम्भरिष्यन्नित्यादि अथैनां कृष्णाजिने उपनह्यासजतीत्यन्तम् । प्रवर्ग्यसम्भरणेन सह घर्मेष्टका कुलायिनीसम्भरणं च ।

कर्मोपक्रमो दीक्षणीया च :-

तिस्रो दीक्षा पक्षे षष्ठ्यामारम्भः । तत्पूर्वपर्वणि संकल्प्य उखासंभरणं पशुश्च । अन्येषु कल्पेषु मासादिषु च वसन्ते पर्वणि सुत्या यथा भवति तदनुसारेण दीक्षारम्भः । तस्मिन् दिने प्रातरग्निहोत्रं हुत्वा, नान्दीश्राद्धम् । तत आज्यं पशव इत्यादि । गृहे एव दीक्षणीया । अग्निं प्रणीय सम्भारयजूंषि । सोमपरिवेषणम् । अग्निं परित्यज्य । पुनः प्रणीय सप्तहोता[२३] । तं परित्यज्य क्रत्वर्थमग्निं प्रणीय **स्वे दक्ष** इत्यादि । ततो त्रिहविषं दीक्षणीयां निर्वपति । **देवा गातुविद** इत्यादि । पात्रप्रयोगकाले– त्रयोविंशतिकपालानि स्थाली स्फ्यश्च द्वन्द्वम् । इतराणि प्रकृतिवत् । निर्वपणकाले– **अग्नये वैश्वानराय जुष्टं निर्वपामि ॥ अग्नाविष्णुभ्यां जुष्टं निर्वपामि ॥ अदित्यै जुष्टं निर्वपामि ॥** इदं देवानामित्यादि । **अदित्यास्त्वोपस्थे सादयाम्यग्ने वैश्वानर हव्य७ँ रक्षस्वाग्नाविष्णू हव्य७ँ रक्षेथामदिते हव्य७ँ रक्षस्व** । निर्वापवत्प्रोक्षणम् । कृष्णाजिनादानादि । उत्करे त्रिर्निनीय । **यथाभागं व्यावर्तध्वं इदमग्नेर्वैश्वानरस्याग्नाविष्ण्वोः** पुरोडाशार्थान् । **इदमदित्याः** चर्वर्थान् । **अग्नये वैश्वानराय जुष्टमधिवपाम्यग्नाविष्णुभ्यां जुष्टमधिवपामि धान्यमसि धिनुहि देवान्** इत्यादि । एवं संवापः । कपालोपधानकाले वैश्वानरस्य द्वादशकपालमुपदधाति । युग्मानामावृत्तिः । आग्नावैष्णवमेकादशकपालमुपदधाति । अष्टावुपधाय तूष्णीं त्रीणि । **ध्रुवोऽसि** इति स्थाल्यासादनम् । पिष्टान्युत्पूय तण्डुलानुत्पुनाति । **देवस्त्वा** इति घृतमुत्पूय तूष्णीं स्थाल्यामासिञ्चति । **मखस्य शिरोऽसि** इति पिण्डं कृत्वा । **यथाभागं व्यावर्तेथां** इति विभज्य । **इदमग्नेर्वैश्वानरस्य, इदमग्नाविष्ण्वोः** । पुरोडाशावधिश्रित्य **घर्मोऽसि** इति तण्डुलानावपति । प्रथनादि पुरोडाशयोः अन्तरितं सर्वेषाम् । **आप्यायतां --- अग्नये वैश्वानराय जुष्टमभिघारयामि** । तूष्णीमाग्ना– वैष्णवम् । **आप्यायतां --- अदित्यै जुष्टमभिघारयामि** । प्रियेणेत्यासादनम् । **यज्ञोऽसि** इति वैश्वानरादित्योः । **अयं यज्ञो, ममाग्ने** चतुर्होता । आज्यभागाभ्यां प्रचर्य । उपांशु प्रधानयागः ।

---

२३. कूश्माण्डहोमपक्षे तं परित्यज्य पुनः प्रणीय जुहोति ।

अग्नये वैश्वानराय, अनुब्रूहि ॥ अग्निं वैश्वानरं, यज । अग्नये वैश्वानरायेदम् । **अग्नेर्वैश्वानरस्याहं देवयज्ययान्नादो भूयासम् ॥** *अग्नाविष्णुभ्याम्, अनुब्रूहि ॥* अवद्यमाने साम । *अग्नाविष्णू, यज* । अग्नाविष्णुभ्यामिदम् । **अग्नाविष्णवोरहं देवयज्यया वृत्रहा भूयासम् ।** *अदित्यै, अनुब्रूहि ॥ अदितिम्, यज* । अदित्या इदम् । **अदित्या अहं देवयज्यया प्र प्रजया च पशुभिश्च जनिषीय ।** नारिष्ठान् हुत्वा स्विष्टकृदादि । आग्नावैष्णवमविरुज्य इतरयोर्विरुज्य प्राशित्रम् । चतुर्धाकरणकाले वैश्वानरादित्योः त्रेधाकरणम् । पुरस्ताद्देवपत्नीभ्यः सम्पत्नीयं जुहोति । पत्नीसंयाजान्ता दीक्षणीया सन्तिष्ठते ।

दीक्षाहुतयः :–

ततः प्राचीनवंशं करोति[२४] । उत्तरेण बहिः प्राग्वंशमित्यादि यत्प्राग्दीक्षाहुतिभ्यस्तत्कृत्वा । **आकूत्यै प्रयुजेऽग्नये स्वाहा** इत्यादि पञ्च आध्वरिकीः **आपो देवीः** इत्यन्तं पूर्ववत् कृत्वा आकूतिमग्निमिति षडाग्निकीः जुह्वैव ध्रुवात आप्याय्याप्याय्य जुहुयात् । **आकूतिमग्निं प्रयुजꣳ स्वाहा ॥** अग्नय इदम् । **मनो मेधामग्निं प्रयुजꣳ स्वाहा** ॥ अग्नय इदम् । **चित्तं विज्ञातमग्निं प्रयुजꣳ स्वाहा ॥** अग्नय इदम् । **वाचो विधृतिमग्निं प्रयुजꣳस्वाहा ॥** अग्नय इदम् । **प्रजापतये मनवे स्वाहा** । प्रजापतय इदम् । **अग्नये वैश्वानराय स्वाहा ।** अग्नये वैश्वानरायेदम् । षडाग्निकीर्दीक्षाहुतीर्हुत्वा । अष्टकृत्व आप्याय्य चतुरनाप्याय्य तूष्णीं ध्रौवं समापयन् द्वादशगृहीतेन स्रुचं पूरयित्वा **विश्वे देवस्य नेतुर्मर्तो वृणीत सख्यं विश्वे राय इषुध्यसि द्युम्नं वृणीत पुष्यसे स्वाहा ॥ वातं प्राणं** इति यजमानः । कालात्मने सवित्र इदम् ।

उखाया आहवनीये प्रवृञ्जनम् :–

अन्तर्वेदि कृष्णाजिनमित्यादि सम्भारयजूंषि चैनमध्वर्युर्वाचयतीत्यन्तं कृत्वा । शणकुलायेन मुञ्जकुलायेन

---

२४ नास्तीदं प्रयोगग्रन्थेषु, अपेक्षितं तु । अग्निचयने गृहे एव दीक्षा नियता । प्रयाणस्य नित्यविधानात् । उत्तरेण प्राग्वंशं परिश्रिते .... आ वो देवास ईमहे इति पूर्वया द्वारा प्राग्वंशं प्रविश्य... इत्यादिसूत्रैः प्राग्वंशकरणं दीक्षाङ्गत्वेन अवश्यं भवेत् । यत्प्राग्दीक्षाहुतिभ्यः (८.१३) इति सूत्रव्याख्यानावसरे भाष्यकारेण कपर्दिना प्राग्वंशकरणं च वपनं च इति वदता अत्र प्राग्वंशकरणं विहितमिति ज्ञायते । सत्याषाढसूत्रव्याख्यात्रा गोपीनाथेन ''उत्तरेण प्राग्वशं परिश्रिते यजमानः केशश्मश्रु वापयते (सत्या.श्रौ.सू ७.१) इति सूत्रव्याख्यानावसरे गृहे दीक्षापक्षेऽपि प्राग्वंश आवश्यकः । उत्तरेण प्राग्वंशमिति वचनात्तं प्राग्वंशं प्रपाद्येति वक्ष्यमाणसूत्राच्च । प्रायणीयाद्यर्थं प्राग्वंशो भिन्न एव इति स्पष्टं दीक्षायामपि प्राग्वंशकरणमुक्तम् ।

वोखां प्रच्छाद्य । **मा सु भित्था मा सु रिषो दृꣳहस्व वीडयस्व सु । अम्ब धृष्णु वीरयस्वाग्निश्चेदं करिष्यथः ॥ दृꣳहस्व देवि पृथिवि स्वस्तय आसुरी माया स्वधया कृतासि । जुष्टं देवानामिदमस्तु हव्यमरिष्टा त्वमुदिहि यज्ञे अस्मिन्** द्वाभ्यामाहवनीये प्रवृणक्ति[२५] । **मित्रैतामुखां तपैषा मा भेदि । एतां ते परिददाम्यभित्यै** प्रदक्षिणमङ्गारैः परीन्धे । **द्रवन्नः सर्पिरासुतिः प्रत्नो होता वरेण्यः । सहसस्पुत्रो अद्भुतः** तस्यां क्रुमुकमुल्लिखितं[२६] घृतेनाक्त्वावदधाति । मुञ्जांश्च ।

उख्याग्नौ समिदाधानमुपस्थानं च :-

जाते उख्ये आहवनीयमनुगमयति । **परस्या अधि सँव्वतोऽवराꣳ अभ्यातर । यत्राहमस्मि ताꣳ अव** वैकङ्कतीं समिधमुख्ये आदधाति । अग्नय इदम् । **परमस्याः परावतो रोहिदश्व इहागहि । पुरीष्यः पुरुप्रियोऽग्ने त्वं तरामृधः** शमीमयीम् । अग्नय इदम् । **सीद त्वं मातुरस्या उपस्थे विश्वान्यग्ने वयुनानि विद्वान् । मैनामर्चिषा मा तपसाभिशूशुचोऽन्तरस्याꣳ शुक्रज्योतिर्विभाहि ॥ अन्तरग्ने रुचा त्वमुखायै सदने स्वे । तस्यास्त्वꣳ हरसा तपन् जातवेदश्शिवो भव ॥ शिवो भूत्वा मह्यमग्नेऽथो सीद शिवस्त्वम् । शिवाः कृत्वा दिशः सर्वा स्वाँय्योनिमिहासदः** तिसृभिर्जातमुख्यमुपतिष्ठते ।

इध्माधानम् :-

यदग्ने यानि कानि चा ते दारूणि दध्मसि । तदस्तु तुभ्यमिद्घृतं तज्जुषस्व यविष्ठ्य ॥ यदत्युपजिह्विका यद्वम्रो अतिसर्पति । सर्वं तदस्तु ते घृतं तज्जुषस्व यविष्ठ्य ॥ रात्रिꣳ रात्रिमप्रयावं भरन्तोऽश्वायेव तिष्ठते घासमस्मै । रायस्पोषेण समिषामदन्तोऽग्ने मा ते प्रतिवेशा रिषाम ॥ नाभा पृथिव्यास्समिधानमग्निꣳ रायस्पोषाय बृहते हवामहे । इरम्मदं बृहदुक्थं यजत्रं जेतारमग्निं पृतनासु सासहिम् ॥ यास्सेना अभीत्वरीराव्याधिनीरुगणा उत । ये स्तेना ये च तस्करास्ताꣳस्ते अग्नेऽपिदधाम्यास्ये पञ्चभिरौदुम्बरमपरशुवृक्णमुख्ये इध्ममभ्यादधाति । **दꣳष्ट्राभ्यां मलिम्लूञ्जम्भ्यैस्तस्कराꣳ**

---

२५. उखामाहवनीये अधिश्रयति इत्यर्थः । नित्यचितौ एवं प्रयोगः । प्रउगादि काम्यचितौ तु आहवनीयमेवोखाया-मवदधाति । क्षिपेदाहवनीयाग्निं काम्यं श्येनादिमाचरन् इति प्राचीनकारिका ।

२६. क्रुमुकः काष्ठशकलम् । धनुरादिनिर्लेखनप्रभवः शकलो वा ।

उत । हनूभ्या॑स्तेनान्भगवस्ता॑स्त्वं खाद सुखादितान् आश्वत्थीं समिधमादधाति । **ये जनेषु मलिम्लवस्स्तेनासस्तस्करा वने । ये कक्षेष्वघायवस्ता॑स्ते दधामि जम्भयोः** वैकङ्कतीम् । **यो अस्मभ्यमरातीयाद्यश्च नो द्वेषते जनः । निन्दाद्यो अस्मान् दिप्साच्च सर्वं तं मस्मसा कुरु** शमीमयीम्[२७] । तस्मादग्निचितः पापं न कीर्तयेत् । नो अग्निं बिभ्रतो नो अग्निविदः । **स॑शितं मे ब्रह्म स॑शितं वीर्यं बलम् । स॑शितं क्षत्रं जिष्णु यस्याहमस्मि पुरोहितः ॥ उदेषां बाहू अतिरमुद्वर्च उदू बलम् । क्षिणोमि ब्रह्मणा मित्रानुन्नयामि स्वा॑ अहम्** उत्तमे यजमानं वाचयन् तूष्णीमौदुम्बर्यौ समिधावादधाति । ***मातेव पुत्रं पृथिवी पुरीष्यमग्नि॑ स्वे योनौ भरिष्यत्युखा । तां विश्वैर्देवैर् ऋतुभिस्संविदानः प्रजापतिर्विश्वकर्मा युनक्तु*** मौञ्जे शिक्ये षडुद्यामे द्वादशोद्यामे वोखामवदधाति ।

शिक्यपाशस्य प्रतिमोचनम् :-

एकविंशतिनिर्बाधो रुक्मः सूत्रोतो भवति । यजमानः – **दृशानो रुक्म उर्व्या व्यद्यौद्दुर्मर्शमायुः श्रिये रुचानः । अग्निरमृतो अभवद्वयोभिर्यदेनं द्यौरजनयत्सुरेताः** तमासीनो यजमानोऽन्तर्निर्बाधं प्रतिमुच्य बहिर्निर्बाधान्कुरुते । **विश्वा रूपाणि प्रतिमुञ्चते कविः प्रासावीद्भद्रं द्विपदे चतुष्पदे । वि नाकमख्यत्सविता वरेण्योऽनु प्रयाणमुषसो विराजति** शिक्यपाशं ग्रीवायां प्रतिमुञ्चते । **नक्तोषासा समनसा विरूपे धापयेते शिशुमेक॑ समीची । द्यावा क्षामा रुक्मो अन्तर्विभाति देवा अग्निं धारयन् द्रविणोदाः** कृष्णाजिनमुत्तरं, स्कन्धयोर्निदधाति[२८] । **सुपर्णोऽसि गरुत्मान्त्रिवृत्ते शिरो गायत्रं चक्षुस्स्तोम आत्मा साम ते तनूर्वामदेव्यं बृहद्रथन्तरे पक्षौ यज्ञायज्ञियं पुच्छं छन्दा॑स्यङ्गानि धिष्णियाः शफा यजू॑षि नाम** उख्यमवेक्ष्य । तूष्णीमादाय । **सुपर्णोऽसि गरुत्मान् दिवं गच्छ सुवः पत** आदायोत्थायोपरि नाभेर्धारयमाणः ।

विष्णुक्रमणम् :-

विष्णोः क्रमोऽस्यभिमातिहा गायत्रं छन्द आरोह पृथिवीमनु वि क्रमस्व निर्भक्तः स यं द्विष्मः ॥ विष्णोः क्रमोऽस्यभिशस्तिहा त्रैष्टुभं छन्द आरोहान्तरिक्षमनु वि

---

२७. प्रयोगग्रन्थेषु समिदाधानस्य उद्देशत्यागो नोक्तः । विवक्षितं चेदग्नय इदं इति सर्वत्र ब्रूयात् ।

२८. स्कन्धयोः स्थितं कृष्णाजिनं यथा रुक्ममाच्छादयति तथा ।

क्रमस्व निर्भक्तः स यं द्विष्मः ॥ विष्णोः क्रमोऽस्यरातीयतो हन्ता जागतं छन्द आरोह दिवमनु वि क्रमस्व निर्भक्तः स यं द्विष्मः ॥ विष्णोः क्रमोऽसि शत्रूयतो हन्तानुष्टुभं छन्द आरोह दिशोऽनु वि क्रमस्व निर्भक्तः स यं द्विष्मः चतुरो विष्णुक्रमान् प्राचः क्रामति* । ब्रह्मा दक्षिणत एति ।

प्रदक्षिणकरणम् :-

अक्रन्ददग्निस्तनयन्निव द्यौः क्षामा रेरिहद्वीरुधस्समञ्जन् । सद्यो जज्ञानो वि हीमिद्धो अख्यादा रोदसी भानुना भात्यन्तः एतामनूच्य । **अग्नेऽभ्यावर्तिन्नभि न आवर्तस्वा- युषा वर्चसा सन्या मेधया प्रजया धनेन ॥ अग्ने अङ्गिरः शतं ते संत्वावृतः सहस्रं त उपावृतः । तासां पोषस्य पोषेण पुनर्नो नष्टमाकृधि पुनर्नो रयिमाकृधि ॥ पुनरूर्जा निवर्तस्व पुनरग्न इषायुषा । पुनर्नः पाहि विश्वतः ॥ सह रय्या निवर्तस्वाग्ने पिन्वस्व धारया । विश्वप्स्निया विश्वतस्परि** चतसृभिः प्रदक्षिणमावर्तते ।

उख्याग्नेरासन्द्यामासादनं समिन्धनं च :-

रुक्मकृष्णाजिने तूष्णीमुन्मुच्य । **उदुत्तमं वरुणपाशमस्मदवाधमं वि मध्यमꣳ श्रथाय । अथा वयमादित्य व्रते तवानागसो अदितये स्याम** शिक्यपाशमुन्मुच्य । तूष्णीं समीपमासन्दी- माहृत्य । **आ त्वाऽहार्षमन्तरभूद्ध्रुवस्तिष्ठाविचाचलिः । विशस्त्वा सर्वा वाञ्छन्त्वस्मिन् राष्ट्रमधिश्रय ॥ अग्रे बृहन्नुषसामूर्ध्वो अस्थान्निर्जगन्वान् तमसो ज्योतिषागात् । अग्निर्भानुना रुशता स्वङ्ग आ जातो विश्वा सद्मान्यप्राः** द्वाभ्यामुपतिष्ठते[२९] । औदुम्बर्यासन्द्य- रत्निमात्रशीर्षण्यानूच्या प्रादेशमात्रपादा मौञ्जविवाना फलकास्तीर्णा वा मृदा प्रदिग्धा । तामाहवनीयायतने निधाय । **सीद त्वं मातुरस्या उपस्थे विश्वान्यग्ने वयुनानि विद्वान् । मैनामर्चिषा मा तपसाभि शूशुचोऽन्तरस्याꣳ शुक्रज्योतिर्विभाहि ॥ अन्तरग्ने रुचा त्वमुखायै सदने स्वे । तस्यास्त्वꣳ हरसा तपन् जातवेदश्शिवो भव ॥ शिवो भूत्वा मह्यमग्नेऽथो**

---

*. बौधायनेन (बौ.श्रौ.सू.१०-१६) दर्शपूर्णमासवदेव चयन प्रकरणेऽपि विष्णुक्रमणविधानात् अत्रापि दर्शपूर्णमासवदेव विष्णुक्रमणम् ।

२९. 'आ त्वाहार्षं --- अधिश्रय आहृत्योपतिष्ठते । अग्रे बृहन्नुषसां--- सद्मान्यप्राः इति च' इति द्रा. प्र. । अत्र आत्वाहार्षमित्याहरणम्, अग्रे बृहन्नुषसामित्युपस्थानमित्यस्मन्मतिः । अस्मिन्विषये भूमिका द्रष्टव्या ।

सीद शिवस्त्वम् । शिवाः कृत्वा दिशः सर्वास्स्वां योनिमिहासदः ॥ ह७ँसश्शुचिषद्वसु-रन्तरिक्षसद्धोता वेदिषदतिथिर्दुरोणसत् । नृषद्वरसदृतसद्व्योमसदब्जा गोजा ऋतजा अद्रिजा ऋतं बृहत् तस्यां चतसृभिः उख्यमासादयति । शर्करायां वा तिसृभिरासाद्य हंसवत्योपतिष्ठत इत्येके । **येन देवा ज्योतिषोर्ध्वा उदायन्, येनादित्या वसवो येन रुद्राः । येनाङ्गिरसो महिमानमानशुस्तेनैतु यजमानः स्वस्ति** प्रादेशमात्रैः काष्ठैः उख्यमुपसमिन्धे । नित्यो ज्वलति ।

मुष्टीकरणं व्रतग्रहणं च :-

यजमान उपसमिध्य मुष्टीकरणप्रभृति[३०] कर्म प्रतिपद्यते । स्वाहा यज्ञं मनसेत्यादि एष्ट्री स्थेत्यन्तं कृत्वा । **अध्वर्युः** – गार्हपत्ये दीक्षितस्य व्रतमित्यादि । व्रतकाले यजमानो व्रतं प्रतिगृह्य निधाय । **अन्नपतेऽन्नस्य नो देह्यनमीवस्य शुष्मिणः । प्र प्रदातारं तारिष ऊर्जं नो धेहि द्विपदे चतुष्पदे** औदुम्बरीं समिधं व्रतेऽक्त्वाभ्यादधाति । अग्नयेऽन्नपतय इदम् । ***देवस्य त्वा --- हस्ताभ्यां गायत्रेण छन्दसा रात्रिमिष्टकामुपदधे तया देवतयाङ्गिरस्वद्ध्रुवा सीद*** सायमौदुम्बरीं समिधमादधाति । अग्नय इदम् । नास्याञ्जनम् । **दैवीं धियं मनामहे सुमृडीकामभिष्टये वर्चोधां यज्ञवाहस७ँ सुपारा नो असद्वशे** हस्याववनिज्य । **ये देवा मनोजाता मनोयुजस्सुदक्षा दक्षपितारस्ते नः पान्तु ते नोऽवन्तु तेभ्यो नमस्तेभ्यस्स्वाहा** दक्षिणेनाहवनीयं परिश्रिते व्रतयति । नैनमदीक्षिता व्रतयन्तं पश्यन्ति । आचम्य आत्मन इदम् । ***शिवाः पीता भवथ यूयमापोऽस्माकं योनावुदरे सुशेवाः । इरावतीरनमीवा अनागसश्शिवा नो भवथ जीवसे*** व्रतयित्वा नाभिदेशमभिमृशति । अपश्च पीत्वा जपति । तूष्णीं पत्नी स्व आयतने व्रतयति । ततः **पूषा सन्या** इति सनीहारप्रस्थापनान्तम् । जागर्त्येतां रात्रिम् ।

अर्धरात्रे व्रते प्रत्ते सनीहारविधौ कृते ।

प्रथमो दीक्षादिवसः समाप्यत इति स्थितिः ॥

उपोदये ***अग्नीन् ज्योतिष्मतः कुरुत*** । उदित आदित्ये **याः पशूनां** वाचं विसृज्य । सोमपरिवेषणम् ।

---

३०. मुष्टिकरणप्रभृति इति पाठा० ।

वात्सप्रेणोपस्थानम् :-

दिवस्परि प्रथमं जज्ञे अग्निरस्मद्द्वितीयं परि जातवेदाः । तृतीयमप्सु नृमणा अजस्रमिन्धान एनं जरते स्वाधीः ॥ विद्मा ते अग्ने त्रेधा त्रयाणि विद्मा ते सद्म विभृतं पुरुत्रा । विद्मा ते नाम परमं गुहा यद्विद्मा तमुत्सं यत आ जगन्थ ॥ समुद्रे त्वा नृमणा अप्स्वन्तर्नृचक्षा ईधे दिवो अग्न ऊधन् । तृतीये त्वा रजसि तस्थिवाꣳसमृतस्य योनौ महिषा अहिन्वन् ॥ अक्रन्ददग्निस्तनयन्निव द्यौः क्षामा रेरिहद्वीरुधः समञ्जन् । सद्यो जज्ञानो वि हीमिद्धो अख्यदा रोदसी भानुना भात्यन्तः ॥ उशिक्पावको अरतिस्सुमेधा मर्तेष्वग्निरमृतो नि धायि । इयर्ति धूममरुषं भरिभ्रदुच्छुक्रेण शोचिषा द्यामिनक्षत् ॥ विश्वस्य केतुर्भुवनस्य गर्भ आ रोदसी अपृणाज्जायमानः । वीडुं चिदद्रिमभिनत्परायञ्जनायदग्निमयजन्त पञ्च ॥ श्रीणामुदारो धरुणो रयीणां मनीषाणां प्रार्पणः सोमगोपाः । वसोस्सूनुस्सहसो अप्सु राजा वि भात्यग्र उषसामिधानः ॥ यस्ते अद्य कृणवद्भद्रशोचेऽपूपं देव घृतवन्तमग्ने । प्र तं नय प्रतरां वस्यो अच्छाभि द्युम्नं देवभक्तं यविष्ठ ॥ आ तं भज सौश्रवसेष्वग्न उक्थउक्थ आ भज शस्यमाने । प्रियस्सूर्ये प्रियो अग्ना भवात्युज्जातेन भिनददुज्जनित्वैः ॥ त्वामग्ने यजमाना अनु द्यून् विश्वा वसूनि दधिरे वार्याणि । त्वया सह द्रविणमिच्छमाना व्रजं गोमन्तमुषिजो वि वव्रुः ॥ दृशानो रुक्म उर्व्या व्यद्यौद्दुर्मर्शमायुः श्रिये रुचानः । अग्निरमृतो अभवद्वयोभिर्यदेनं द्यौरजनयत्सुरेताः इत्यनुवाकेन वात्सप्रेणोपतिष्ठते[३१] ।

उपसमिन्धनं व्रतग्रहणं च :-

येन देवा ज्योतिषोर्ध्वा उदायन्, येनादित्या वसवो येन रुद्राः । येनाङ्गिरसो महिमानमानशुस्तेनैतु यजमानः स्वस्ति उपसमिध्य । मध्यन्दिने गार्हपत्ये दीक्षितस्य व्रतमित्यादि । व्रतं प्रतिगृह्य **अन्नपतेऽन्नस्य नो --- द्विपदे चतुष्पदे** औदुम्बरीं समिधं व्रतेऽक्त्वाभ्यादधाति ।

---

३१. दिवस्परीत्येकादशभिर्द्वादशभिस्त्रयोदशभिर्वा वात्सप्रेणोपतिष्ठते इति सूत्रम् । अस्मिन्ननुवाके एकादशानां ऋचां विद्यमानत्वात् यदा द्वादशभिस्त्रयोदशभिर्वा उपस्थानं तदा एकादशी आवर्तते ।

अग्नयेऽन्नपतय इदम् । ***देवस्य त्वा --- हस्ताभ्यां त्रैष्टुभेन छन्दसाहरिष्टकामुपदधे तया देवतयाङ्गिरस्वद्ध्रुवा सीद*** प्रातस्समिधमादधाति । नास्याञ्जनम् । अग्नय इदम् । ततः दैवीं धियमित्यादि नाभ्यभिमर्शनान्तं पूर्ववत् । अधिवृक्षसूर्ये ***अग्नीन् ज्योतिष्मतः कुरुत*** इत्यादि । नक्षत्रं दृष्ट्वा । **याः पशूनां** इति जपित्वा । ***व्रतं कृणुत*** इति वाचं विसृजते । मध्यरात्रे गार्हपत्ये दीक्षितस्येत्यादि व्रतं प्रतिगृह्य । **अन्नपतेऽन्नस्य, *देवस्य त्वा --- हस्ताभ्यां गायत्रेण छन्दसा रात्रिमिष्टकामुपदधे तया* । दैवीं धियं, ये देवाः, शिवाः पीता भवथ, अग्ने त्व९ सुजागृहि** स्वप्स्यन्नुख्यमभिमन्त्रयते ।

उपोदये **त्वमग्ने व्रतपा असि । विश्वे देवाः। पुनर्मनः। अग्नीन् ज्योतिष्मत** इत्यादि व्रतं कृणुतेत्यन्तम् । सोमपरिवेषणम् । **दृशानो रुक्म** इत्यादि । **विष्णोः क्रमोऽसि** इत्यादि सादनान्तम् । **येन देवा** इत्युख्यमुपसमिन्धे[३२] ।

प्रयाणं देवयजनगमनं च :-

तिस्रो दीक्षा पक्षे अस्मिन्नहनि प्रयाणम् । इतरथा पूर्वेद्युः विष्णुक्रमान् क्रामत्युत्तरेद्युरुपतिष्ठते । एवं सदा आ क्रयात् । यदहः सोमं क्रीणीयात् तदहरुभयं समस्येत् । प्र च क्रामेदुप च तिष्ठेत । यदहः प्रयायात् **उदु त्वा विश्वे देवा अग्ने भरन्तु चित्तिभिः । स नो भव शिवतमस्सुप्रतीको विभावसुः** उख्यमुद्यम्य[३३] । **सीद त्वं मातुरस्या --- ऋतं बृहत्** चतसृभिः द्वीषे शकटे प्रउग उख्यमासादयति । तिसृभिरासाद्य हंसवत्योपतिष्ठत इत्येके । समोप्येतरावग्नी अन्वारोप्य । यजमानः पत्न्या सह शकटमारुह्य **प्रेदग्ने ज्योतिष्मान् याहि शिवेभिरर्चिभिस्त्वम् । बृहद्भिर्भानुभिर्भासन्मा हि९सीस्तनुवा प्रजाः** इति प्रयाति । **अक्रन्ददग्निः --- भात्यन्तः** अक्षशब्दमनुमन्त्रयते । प्राचीनवंशं करोतीत्येतदादि द्वारकरणान्तम् । यागोपकरणैः सह देवयजनं प्राप्य । पादौ प्रक्षाल्य आचम्य **एदमगन्म --- मदेम** देवयजनमध्यवस्यति । आहवनीयसमीपे आसन्द्यां सशिक्यमुख्यं प्रतिष्ठाप्य, उद्धत्यावोक्ष्यायतनानि कल्पयित्वा गार्हपत्यदक्षिणाग्नी स्वस्वायतने प्रतिष्ठाप्य । **समिधाग्निं दुवस्यत घृतैर्बोधयतातिथिम् । आस्मिन्, हव्या जुहोतन**

---

३२. क्वचिन् मातृकाग्रन्थेषु एतदनन्तरं व्रतमुक्तमस्ति । एतन्न साधु भाति, इन्धनव्रतनाध्यवसानसन्निपते घृतानुषिक्तां पूर्वामादधाति इति सूत्रेण देवयजनाध्यवसनावसरे व्रतस्य विहितत्वात् । प्राचीनकरिकायां द्राविडप्रयोगे च तत्रैव व्रतमुक्तम् ।

३३. यजमानः उख्यमुद्यम्य इति M M पाठः ।

घृतानुषिक्तामौदुम्बरीमवसिते समिधमादधाति । **येन देवा ज्योतिषोर्ध्वा --- यजमानः स्वस्ति** उख्यमुपसमिन्धे । अग्नय इदम् । इन्धनव्रतनाध्यवसानसन्निपाते घृतानुषिक्तां पूर्वामादधाति ।

अप्सु भस्मप्रवेशनम् :-

मध्यन्दिने व्रतम् । पूर्ववत्समिदाधानम् । अधिवृक्षसूर्ये अग्नीन् ज्योतिष्मतः कुरुतेत्यादि । यद्युखां भस्माभिनिषीदेदुख्यमादाय उदकान्तं गत्वा । अध्वर्युः - ***इमꣳ सुयोनिꣳ सुवृतꣳ हिरण्मयꣳ सहस्रभृष्टिं महिषावरोह । उत्सं जुषस्व मधुमन्तमूर्व समुद्रियꣳ सदनमाविशस्व । इमꣳ स्तनं मधुमन्तं धयापां प्रप्यातमग्ने सरिरस्य मध्ये । उत्सं जुषस्व मधुमन्तमूर्व समुद्रियꣳ सदनमाविशस्व*** एताभ्यामुखाया अग्निमुद्धृत्य, अनिरुहञ्छिक्यादुखाम् । **आपो देवीः प्रतिगृह्णीत भस्मैतत्स्योने कृणुध्वꣳ सुरभावु लोके । तस्मै नमन्तां जनयः सुपत्नीर्मातेव पुत्रं बिभृता स्वेनम् ॥ अप्स्वग्ने सधिष्टव सौषधीरनु रुध्यसे । गर्भे सं जायसे पुनः ॥ गर्भो अस्योषधीनां गर्भो वनस्पतीनाम् । गर्भो विश्वस्य भूतस्याग्ने गर्भो अपामसि** तिसृभिरप्सु भस्म प्रवेशयति । भस्मनोऽपादाय प्रपीड्य[३४] । **प्रसद्य भस्मना योनिमपश्च पृथिवीमग्ने । सꣳ सृज्य मातृभिस्त्वं ज्योतिष्मान् पुनरासदः ॥ पुनरासद्य सदनमपश्च पृथिवीमग्ने । शेषे मातुर्यथोपस्थेऽन्तरस्याꣳ शिवतमः** द्वाभ्यामुखायां भस्मनः एकदेशं अग्निं च प्रत्यवधाय । **पुनरूर्जा निवर्तस्व पुनरग्न इषायुषा । पुनर्नः पाहि विश्वतः ॥ सह रय्या निवर्तस्वाग्ने पिन्वस्व धारया । विश्वप्स्निया विश्वतस्परि** द्वाभ्यां पुनरुदैति । **येन देवा --- यजमानस्स्वस्ति** यजमान उपसमिन्धे । नित्यो ज्वलति ।

बोधवतीभ्यामुपस्थानम् :-

अध्वर्युः - **पुनस्त्वादित्या रुद्रा वसवः समिन्धतां पुनर्ब्रह्माणो वसुनीथ यज्ञैः । घृतेन त्वं तनुवो वर्धयस्व सत्यास्सन्तु यजमानस्य कामाः** पुनरुख्यमुपसमिन्धे । **बोधा नो अस्य वचसो यविष्ठ मꣳहिष्ठस्य प्रभृतस्य स्वधावः । पीयति त्वो अनु त्वो गृणाति वन्दारुस्ते तनुवं वन्दे अग्ने ॥ स बोधि सूरिर्मघवा वसुदावा वसुपतिः । युयोध्यस्मद्द्वेषाꣳसि** बोधवतीभ्यामुपतिष्ठते । यद्युखामित्याद्येतदन्तमधिकभस्मविषयम् । नित्यमप्सु

---

३४. प्रक्षिप्तभस्मन एकदेशमपादाय इत्यर्थः ।

भस्मप्रवेशनं दीक्षितस्य कृतास्विष्टकासु । अकृतासु संसर्गीयार्थं भवति । पुरीषे पशुकामः कुर्वीताप्सु यायावरः प्रवपेत् ।

इष्टकाकरणम् :-

दीक्षितस्येष्टकाः करोति मासप्रभृतिषु दीक्षाकल्पेषु पुरस्तात्, अदीक्षितस्येतरेषूपरिष्टात् प्राजापत्यात् पशोः[३५] । मृन्मयीरिष्टकाः करोति । पादमात्र्योऽरत्निमात्र्य उर्वस्थिमात्र्योऽणूकमात्र्य ऋजुरेखा दक्षिणावृतः सव्यावृतस्त्र्यालिखिताश्च । निर्मन्थ्येन लोहिनीः पचन्ति । अभिन्ना भवन्ति । खण्डां कृष्णां लक्ष्मणां च नोपदध्यात् । पुष्करपर्णं, रुक्मो, हिरण्मयः पुरुषः, स्रुचौ, सप्त स्वयमातृण्णाः, शर्करा, हिरण्येष्टकाः, पञ्च घृतेष्टका, दूर्वास्तम्बः, कूर्मः, उलूखलं, मुसलं, शूर्पमश्मानः, पशुशिरांसि, सर्पशिरश्चामृन्मयीरिष्टकाः । जानुदघ्नं साहस्रं चिन्वीत प्रथमं चिन्वानः । नाभिदघ्नं द्विषाहस्रं द्वितीयम् । आस्यदघ्नं त्रिषाहस्रं तृतीयमुत्तरमुत्तरं ज्यायांसम् । महान्तं बृहन्तमपरिमितं स्वर्गकामश्चिन्वीतेति वाजसनेयकम् । कल्पोक्तप्रकारान् इष्टकादिसम्भारान् सम्पाद्य ।

गार्हपत्यचितेरायतनसंस्कारः :-

अपवृत्ते दीक्षापरिमाणे उपोदये वाग्यमनादि । उदित आदित्ये वाग्विसर्गः । **दृशानो रुक्म** इत्यादि । विष्णुक्रमादि सादनान्तम् । **येन देवा --- स्वस्ति** उपसमिध्य । ततः वात्सप्रेणोपस्थानम्[३६] । **येन देवा --- स्वस्ति** उपसमिध्य । ततः सोमपरिवेषणम्[३७] । **अपेत वीत वि च सर्पतातो येऽत्रस्थ पुराणा ये च नूतनाः । अदादिदं यमोऽवसानं पृथिव्या अक्रन्निमं पितरो लोकमस्मै** इति गार्हपत्यचितेरायतनं व्यायाममात्रं चतरस्रं परिमण्डलं वोद्धत्य अप उपस्पृश्य । हरिण्या पलाशशाखया शमीशाखया वा सम्मृज्य प्राचीमुदीचीं वा शाखामुदसित्वा, अप उपस्पृश्य

---

३५. मासप्रभृतिषु मासचतुर्मास इत्यादिषु दीक्षाकल्पेषु दीक्षानन्तरमिष्टाकाः कार्याः । मासादर्वाक्कालेषु दीक्षाकल्पेषु यथा त्र्यहष्षडह इत्यादिषु प्राजापत्याद्वायव्याद्वा पशोरनन्तरं कार्याः ।

३६. अत्र कात्यायनसूत्रे "श्वोऽभ्यवहरणादि प्रायश्चित्यन्तं कृत्वा विष्णुक्रमवात्सप्रसमासः । वात्सप्रं कृत्वोपस्थेयं चेत्" (१७.१,२) इति । अस्य विद्याधरव्याख्यानम्- श्वः उपसदां प्रथमेऽहनि सोमक्रयदिने.....पूर्वोक्तयोर्विष्णुक्रम वात्सप्रयोस्समासः एकस्मिन्दिने द्वयोरनुष्ठानं कर्तव्यम् ॥ यदि तस्मिन् क्रयणीयेऽहनि वात्सप्रोपस्थानस्य पर्यायो भवेत् तदा वात्सप्रं कृत्वा वात्सप्रेणोपस्थाय विष्णुक्रमान् वात्सप्रोपस्थानं च कुर्यात् । यदि विष्णुक्रमपर्यायस्तदा विष्णुक्रमान् कृत्वा वात्सप्रोपस्थानम् इति ।

३७. अत्र दर्शितक्रमस्तु L.M पाठानुसारी कपर्दिभाष्यानुसारी च । आन्ध्रादिप्रयोगपाठेषु सोमपरिवेषणं विष्णुक्रमा वात्सप्रोपस्थानं इति भिन्नक्रमः ।

शन्नो देवीरभिष्टय आपो भवन्तु पीतये । शं योरभिस्रवन्तु नः इत्यद्भिरवोक्ष्य **अग्नेर्भस्मास्यग्नेः पुरीषमसि** सिकता निवपति । **संज्ञानमसि कामधरणं मयि ते कामधरणं भूयात्** ऊषान् । तान्निवपन् ***यददश्चन्द्रमसि कृष्णं तदिहास्तु*** इति मनसा ध्यायति । **सं या वः प्रियास्तनुवः सं प्रिया हृदयानि वः । आत्मा वो अस्तु सं प्रियस्सं प्रियास्तनुवो मम** ऊषान् सिकताश्च संसृज्य । **चितस्स्थ परिचित ऊर्ध्वचितः श्रयध्वं तया देवतयाङ्गिरस्वद्ध्रुवा स्सीदत** एकविंशत्या शर्कराभिर्गार्हपत्यचितेरायतनं परिश्रयति । तिस्रस्तिस्रः संहिताः । तासामन्तरालं चतुस्तिलोनं पञ्चपञ्चाशदङ्गुलम् । सप्तकृत्वो मन्त्रावृत्तिः । ***व्रजं कृणुध्व॒ँ स हि वो नृपाणो वर्म सीव्यध्वं बहुला पृथूनि । पुरः कृणुध्वमायसीरधृष्वा मा वः सुस्रोच्चमसो दृ॒ँहता तं*** [३८] उपहिताः शर्करा अभिमन्त्र्य ।

गार्हपत्यप्रथमचितेरिष्टकोपधानं :-

प्रागायामाः प्रथमे प्रस्तारे । उदगायामा द्वितीये । एवं व्यत्यासेन । प्रथमे उदगपवर्गास्तिस्रो रीतयः । द्वितीये प्रस्तारे प्रागपवर्गास्तिस्रः । एकस्यां रीत्यां सप्तसप्तेष्टकाः । प्रथमे प्रस्तारे दक्षिणत आरभ्येष्टका गणनम् । द्वितीयस्यां रीत्यां द्वितीयामारभ्य **अय॒ँ सो अग्निर्यस्मिन्त्सोममिन्द्रः सुतं दधे जठरे वावशानः । सहस्रियं वाजमत्यन्न सप्ति॒ँ स सवान्थ्सन्थ्स्तूयसे जातवेदस्तया देवतयाङ्गिरस्वद्ध्रुवा सीद** मध्यरीतौ द्वितीया इष्टका । **अग्ने दिवो अर्णमच्छा जिगास्यच्छा देवा॒ँ ऊचिषे धिष्णिया ये । याः परस्ताद्रोचने सूर्यस्य याश्चावस्तादुपतिष्ठन्त आपस्तया** तस्या उत्तरा । **अग्ने यत्ते दिवि वर्चः पृथिव्यां यदोषधीष्वप्सु वा यजत्र । येनान्तरिक्षमुर्वाततन्थ त्वेषस्स भानुरर्णवो नृचक्षास्तया** तस्या उत्तरा । **पुरीष्यासो अग्नयः प्रावणेभिः सजोषसः । जुषन्ता॒ँ हव्यमाहुतमनमीवा इषो महीस्तया** तस्या उत्तरा । चतस्रो मध्ये प्राचीरिष्टका गार्हपत्यचितावुपदधाति । **इडामग्ने पुरुद॒ँस॒ँ सनिं गोश्शश्वत्तम॒ँ हवमानाय साध । स्यान्नः सूनुस्तनयो विजावाग्ने सा ते सुमतिर्भूत्वस्मे तया** तृतीयस्यां चतुर्थीम् । **अयं ते योनिर् ऋत्वियो यतो जातो अरोचथाः । तं जानन्नग्न आरोहाथा नो वर्धया रयिं तया** तस्यामेव पञ्चमीम् । द्वे पुरस्तात्समीची तिरश्ची वा । एवं

---

३८. *व्रजं कृणुध्व॒ँ स हि नृपाणो वर्म सीव्यध्वं बहुला पृथूनि । पुरः कृष्णाध्वमायसीरसृष्टा माहुः सुहोच्चमसो दृ॒ँहता तं* इति पाठान्तरम् ।

पश्चात् । **चिदसि तया**[३९] प्रथमायां चतुर्थीं । **परिचिदसि तया**[३९] तस्यामेव पञ्चमीम् । द्वाभ्यां द्वाभ्यां मन्त्राभ्यां एकैकां लोकम्पृणामुपदधाति । दक्षिणत आरभ्योदगपवर्गाः पश्चादारभ्य प्रागपवर्गा वा सर्वत्र लोकम्पृणोपधानम् । **लोकम्पृण च्छिद्रम्पृणाथो सीद शिवा त्वम् । इन्द्राग्नी त्वा बृहस्पतिरस्मिन्, योनावसीषदन् ॥ ता अस्य सूददोहसः सोमᳫं श्रीणन्ति पृश्नयः । जन्मन् देवानां विशस्त्रिष्वा रोचने दिवस्तया** सर्वास्विष्टकासु तयादेवतमन्ततोपदधाति । त्रयोदशभिर्लोकम्पृणाभिः प्रच्छादयति । चात्वालस्थानात् पुरीषमाहृत्य **पृष्टो दिवि पृष्टो अग्निः पृथिव्यां पृष्टो विश्वा ओषधीरा विवेश । वैश्वानरः सहसा पृष्टो अग्निस्स नो दिवा स रिषः पातु नक्तं** वैश्वानर्यर्चा चितावनुव्यूहति । सा चितिर्भवति ।

द्वितीयचितिप्रभृति पञ्चमचितिपर्यन्तम् :-

अपरस्मिन् प्रस्तारे अयᳫं सो अग्निरित्यादि द्वितीयास्यां रीत्यां द्वितीयाद्याश्चतस्रः । **अयᳫं सो अग्निः** मध्यरीत्यां द्वितीया । **अग्ने दिवो** तस्याः पूर्वा । **अग्ने यत्ते दिवि** तस्याः पूर्वा । **पुरीष्यासो अग्नयः** तस्याः पूर्वा ।

इडामग्नेऽयं ते योनिरिति उत्तरेंऽसे द्वे[४०] । अपि वा तासां पुरतो द्वे । चिदसीति प्रथमायामाद्येष्टका । परिचिदसीति तस्यामेव द्वितीया । अपि वा चिदसीति द्वितीयाद्या इष्टका । परिचिदसीति तस्या उत्तरा[४१] । ततो लोकम्पृणाः पृष्टो दिवीति । एवं व्यत्यासेन पञ्च चयनानि करोति । पञ्चचितीकं चिन्वीत प्रथमं चिन्वानः । त्रिचितीकं चिन्वीत द्वितीयं चिन्वानः । एकचितीकं चिन्वीत तृतीयं चिन्वानः । एकचितीकानेवात ऊर्ध्वं चिन्वीत । **अजीजनन्नमृतं मर्त्यासोऽस्रेमाणं तरणिं वीडुजम्भम् । दश स्वसारो अग्रुवस्समीचीः पुमाᳫंसं जातमभिसᳫंरभन्ताम्** कराभ्यां गार्हपत्यचितिमभिमृश्य ।

उख्याग्नेर्निवपनम् :-

समितᳫं सङ्कल्पेथाᳫं सम्प्रियौ रोचिष्णू सुमनस्यमानौ । इषमूर्जमभि सँव्वसानौ- सँव्वां मनाᳫंसि सँव्व्रता समु चित्तान्याकरम् ॥ अग्ने पुरीष्याधिपा भवा त्वं नः । इषमूर्जं यजमानाय धेहि ॥ पुरीष्यस्त्वमग्ने रयिमान् पुष्टिमाᳫं असि । शिवाः कृत्वा

---

३९. मन्त्रे तयादेवतपाठात् न पुनस्तयादेवतम् ।

४०. तृतीयायां रीत्यामन्तिमे इष्टके ।

४१. तृतीयायां रीत्यामाद्येष्टका ।

दिशस्सर्वास्स्वाँय्योनिमिहासदः ॥ भवतं नस्समनसौ समोकसावरेपसौ । मा यज्ञꣳ हिꣳसिष्टं मा यज्ञपतिं जातवेदसौ शिवौ भवतमद्य नः तस्यां चतसृभिरुख्यं सन्निवपति । विज्ञायते च, वि वा एतौ द्विषाते यश्चोखायां यश्च चीयते । ब्रह्म यजुः । यत्सन्युप्य विहरति ब्रह्मणैवैनं संशास्ति इति ।

साकꣳ हि शुचिना शुचिः प्रशास्ता क्रतुनाजनि । विद्वाꣳ अस्य व्रता ध्रुवा वयाꣳ इवानु रोहते[४२] सन्युप्तावभिमन्त्रयते[४३] चित्युखाग्नी[४४] **स्यूता देवेभिरमृतेनागाः । *उखाꣳ स्वसारमधि वेदिमस्थात् । सत्यं पूर्वैर् ऋषिभिश्चाकुपानोऽग्निः प्रविद्वानिह तत्करोतु*** घृतेनोखां पूरयति दध्ना मधुना सिकताभिर्वा सर्वैर्वा संसृज्य न रिक्तामवेक्षेत[४५] ।

शिक्यादुखाया निरूहणम् :-

मातेव पुत्रं पृथिवी पुरीष्यमग्निꣳ स्वे योनावभारुखा । तां विश्वैर्देवैर् ऋतुभिः संविदानः प्रजापतिर्विश्वकर्मा विमुञ्चतु शिख्यादुखां निरूह्य । **यदस्य पारे रजसश्शुक्रं ज्योतिरजायत । तन्नः पर्षदति द्विषोऽग्ने वैश्वानर स्वाहा** वैश्वानर्या शिक्यमादत्ते । नैर्ऋतीरिष्टकाः कृष्णास्तिस्रस्तुषपक्वास्ताः शिक्यं रुक्मसूत्रमासन्दीं चादाय दक्षिणमपरमवान्तरदेशं गत्वा । ब्रह्मा दक्षिणत एति । **नमस्सु ते निर्ऋते विश्वरूपेऽयस्मयँव्विचृता बन्धमेतम् । यमेन त्वं यम्या सँव्विदानोत्तमं नाकमधि रोहयेमं** स्वकृत इरिणे प्रदरे वा शिक्यं निधाय[४६]।

नैर्ऋतीष्टकोपधानम् :-

तस्येष्टकाभिः पाशमभ्युपदधाति । **यस्यास्ते अस्याः क्रूर आसञ्जुहोम्येषां बन्धानामवसर्जनाय । भूमिरिति त्वा जना विदुर्निर्ऋतिरिति त्वाऽहं परि वेद विश्वतः ॥ असुन्वन्तमयजमानमिच्छ स्तेनस्येत्यां तस्करस्यान्वेषि । अन्यमस्मदिच्छ सा त इत्या नमो देवि निर्ऋते तुभ्यमस्तु ॥ देवीमहं निर्ऋतिँव्वन्दमानः पितेव पुत्रं**

---

४२. *विद्वाꣳ अस्य व्रता ध्रुवा वया इवानु रोधसे इति पाठा०* ।

४३. सन्युप्याभिमन्त्रयते इति पाठा० ।

४४. सुगमोऽयं पाठः क्वचिदुपलभ्यते । चितेरुख्यान्तश्च पुरोऽग्निः इति बहुलः पाठो विद्यते ।

४५. L.M पाठे उखापूरणानन्तरं संन्युप्ताभिमन्त्रणं विद्यते ।

४६. ब्रह्मयजमानौ दक्षिणतः स्थितौ उपास्येते इति भाष्यम् । परं तु अस्माभिर्दृष्टप्रयोगग्रन्थेषु एष विषयो नोक्तः ।

दसये वचोभिः । विश्वस्य या जायमानस्य वेद शिरश्शिरः प्रति सूरी विचष्टे एताभिस्तिसृभिः पराचीरसंस्पृष्टा दक्षिणापवर्गम् । न तयादेवतं करोति । **यत्ते देवी निर्ऋतिरा बबन्ध दामग्रीवास्वविचर्त्यम् । इदं ते तद्विष्याम्यायुषो न मध्यादथा जीवः पितुमद्धि प्रमुक्तः** शिक्यजालेनैनाः प्रच्छाद्य । रुक्मसूत्रमासन्दीं च परस्तान्निदधाति[४७] ।

अपास्मादेतु निर्ऋतिर्नेहास्या अपि किं चन । अगोतां नाष्ट्रां पाप्मान९ं सर्वं तदपहन्महे ॥ अपास्म नैर्ऋतान्पाशान्मृत्यूनेकशतं च ये । अपास्य ये सिनाः पाशा[४८] मृत्यूनेकशत९ं सुवे[४९] ॥ ये ते पाशा एकशतं मृत्यो मर्त्याय हन्तवे । तान्, यज्ञस्य मायया सर्वानवयजामहे ॥[५०] देवीमहं निर्ऋतिं बाधमानः पितेव पुत्रं दसये वचोभिः । विश्वस्य या जायमानस्य शिरो देवीः प्रति सूरी वि चष्टे[५१] एताभिश्चतसृभिः उपहिता अभिमन्त्र्य ।

यदस्य पारे रजसः शुक्रं ज्योतिरजायत । तन्नः पर्षदतिद्विषोऽग्ने वैश्वानर स्वाहा वैश्वानर्या परिषिच्य । ***भूत्यै नमः*** इत्युपस्थायाप्रतीक्षमायन्ति । **शन्नो देवीरभिष्टय आपो भवन्तु पीतये । शँय्योरभि स्रवन्तु नः** अद्भिर्मार्जयन्तेऽध्वर्युब्रह्मयजमानाः । ***ऊर्जं बिभ्रद्वसुमनाः***

---

४७. इष्टकानां दक्षिणत इत्यर्थः ।

४८. ये सीनाः पाशः, ये सीनान् पाशान्,इति पाठा० ।

४९. मृत्यू एकशत९ं सुवे, मृत्यो एकशत९ं सुवे, इति पाठा० ।

५०. अवास्मादेतु निर्ऋतिर्नोर्हास्मा अपि किञ्चन । अगोतां नाष्ट्रां पाप्मान९ं सर्वं तदवहन्महे ॥ अपास्म नैर्ऋतान्पाशान्मृत्यूनेकशतं च ये । अपास्म ये सिनाः पाशा मृत्यूनेकशत९ं सुवे ॥ ये ते पाशा एकशतं मृत्यो मर्त्याय हन्तवे । तान्, यज्ञस्य मायया सर्वानवयजामहे ॥ इति M.M पाठः ।

५१. विश्वस्य या जायमानस्य शिरो देवी प्रतिसूरी विचष्टे, विश्वस्य या जायमानस्य वेद शिरश्शिरः प्रतिसूरी विचष्टे, विश्वस्य या जायमानस्य जायमानस्य वेद शिरश्शिरः प्रतिसूरी विचष्टे, इति पाठा० । विश्वस्य या जायमानस्य वेद शिरश्शिरो देवीः प्रति सूरी वि चष्टे इति आन्ध्र प्र. पा. ।

५२. अत्र केषांचित् पदानामेवं पाठान्तराण्युपलभ्यन्ते । यथा – बिभ्रद्वसुमनाः –*बिभ्रद्वसुवनिः* । सुमेधाः – *सुवर्चाः* । सुवर्चा अघोरेण – *सुचक्षा अघोरेण* । उत्तराणि – *उत्तिराणि* ।

५३. *ऊर्जं बिभ्रद्वसुनीथः सुमेधा गृहानेमिर्मनसा मोदमानः सुवर्चाः । अघोरेण चक्षुषाह९ं शिवेन ग्रहाणां पश्यन्वयमुत्तराणि ॥ गृहाणामायुः प्रवयन्ति रामो गृहा अस्माकं प्रतिरन्त्वायुः । गृहानह९ं सुमनसः प्रपद्येऽवीरघ्नी वीरवतस्सुवीरान् इति* M.M *पाठः ।*

सुमेधा गृहानैमि मनसा मोदमानस्सुवर्चाः । अघोरेण चक्षुषाहꣳ शिवेन गृहाणां पश्यन्वय उत्तराणि[५२]*॥ गृहाणामायुः प्रवयन्तिरामो गृहा अस्माकं प्रतिरन्त्वायुः । गृहानहꣳ सुमनसः प्रपद्येऽवीरघ्नो वीरवतस्सुवीरान्*[५३] अध्वर्युः गृहानभ्येति । तूष्णीमितरौ । **निवेशनस्सङ्गमनो वसूनां विश्वा रूपाऽभिचष्टे शचीभिः । देव इव सविता सत्यधर्मेन्द्रो न तस्थौ समरे पथीनां** आहवनीयं गार्हपत्यं वा उपतिष्ठन्ते ।

नैर्ऋतीष्टकोपधानम् :-

अहं त्वदस्मि इत्यादि । प्रायणीयया प्रचर्य उदयनीयार्थं निदधातीत्यन्तं कृत्वा वेदिं मिमीते । इह द्विपदप्रक्रमेण त्रिपदप्रक्रमेण वा ज्योतिष्टोमवत् न पदमानम् । यद्येकादशयूपाः तथापि प्रक्रमेण मानम् । न रथाक्षमात्रेण[५४] ।

॥ वेदिमानकारिकाः ॥

१, मीयते साग्निकी वेदिः प्रक्रमैर्द्विपदैरिह ।
अर्काङ्गुलप्रमाणेन पदमेकविधे स्मृतम् ॥

२, त्रीण्यङ्गैकैक-भू-चन्द्र-दृक्-चन्द्र-द्वय-वह्निषु ।
भू-द्व्यैक-द्वितयैकेषु द्व्यैक-द्व्यैकैक-भूमिषु ॥

३, आदिमेन सहैवात्र स्युर्द्वाविंशतिशङ्कवः ।
षट्त्रिंशिका मानरज्जुः तस्यां द्व्यष्टसु लक्षणम् ॥

४, विमाने पाशयोर्मध्ये प्रक्रमा द्वादश स्मृताः ।
श्रोणी पञ्चदशस्वाद्ये सदोऽनन्तरषष्ठयोः ॥

५, दशस्वष्टसु तत्कोणाः क्रमात्स्युर्दक्षिणोत्तरे ।
तृतीये च चतुर्थे च धिष्ण्याः कार्या अरत्नितः ॥

---

५४. यूपैकादशिन्यां रथाक्षेण वेदिर्मातव्या इति सामान्यविधिः । साग्निचित्ये क्रतौ यूपैकादशनीपक्षे तु वेदिसम्मितां यूपैकादशिनीं मिनुयात्, 'वेदिसम्मितां मिनोति,, इति श्रुतेः । कपर्दिभाष्ये च 'यद्यप्येकादशयूपाः तथापि वेदिसम्मितैव । न रथाक्षेण विमानम् ... । वेदिसम्मिता साग्निचित्ये इति वेदिसम्मिताम्नानात् रथाक्षविमानं न लभ्यते' इति ।

६, अष्टादशाङ्गुलैस्तेषां शिष्ट्वा सञ्चरमेव च ।
षष्ठे त्वाग्नीध्रमेव स्याद्रुद्रसप्तदशस्वपि ॥
७, अष्टमे च द्वादशसु स्यातां आग्नीध्रलीयकौ ।
नवमे तु हविर्धानं सार्धारत्निचतुष्टये ॥
८, दशमे प्राग्वदाग्नीध्रमुत्करोऽथ त्रयोदशे ।
मनुषु स्याद्विपर्यस्य प्राग्वद्धानं चतुर्दशे ॥
९, षोडशे वह्निपुच्छं स्याच्छङ्कुस्तद्दक्षपार्श्वतः ।
उत्तरेऽपि च शङ्कुस्स्यात्पुरुषमात्रे भवेत्तथा ॥
१०, शुल्बान्तरेणाग्निमानं षोडशे विंशताविह ।
षोडशस्वर्धहीनेषु शामित्रस्स्यादुदक्स्थले ॥
११, अन्तिमे द्वादशस्वंसौ चात्वालोऽंसादुदक्क्रमे ।
सर्वत्र शम्या चात्वाल इति बौधायनोऽब्रवीत् ॥
१२, दक्षिणे तु हविर्धाने पश्चात् सार्धक्रमद्वये[५५] ।
पादोनद्वितयं पार्श्वेऽरत्नौ तूपरवाः स्मृताः ॥[५६]
१३, अर्धप्रादेशतस्तेषां भ्रमणं कोणशङ्कुषु ।[५७]
अग्रेणोपरवांस्त्यक्त्वा पादोनप्रक्रमत्रयम् ॥
१४, शम्यामात्रा चतुस्रक्तिः खरः शिष्टस्तु सञ्चरः ।
औदुम्बरी सदोमध्ये पृष्ठ्याया दक्षिणतः क्रमे ॥
१५, इत्यरत्निप्रमाणेन साग्निकी वेदिरीरिता ।
कपर्दिभाष्यमालोक्य कारिका रचिता इमाः ॥

---

५५. पश्चादर्धक्रमद्वये इति पाठा० । ५६. त्यक्त्वा तु पार्श्वयोश्चैवं पादहीनक्रमद्वयम् । इति पाठा० ।
५७. अरत्निमात्रं मध्ये स्यादुपरवाणां तु लक्षणम् ॥ इति पाठा० ।

प्रायणीयान्ते तु वेदिः स्यात् विमिमेत्वादिका मता ।

शिखण्डान्ता न यूपः स्यात् यत्प्राग्वित्तायनीत्यतः ॥

प्राग्वंशस्य मध्यमाल्लालाटिकादित्यादि चतुश्शिखण्डेत्येतदन्तं करोति । वेदिमाने ब्रह्मा दक्षिणत आस्ते ।

ततः प्रायणीयाया ध्रौवादित्येतदादि कर्म प्रतिपद्यते । तृतीयं पत्न्यै प्रयच्छति तत्सा गृहेषु निदधातीत्यन्तम् । अध्वर्युः-अत्र आदित्योपस्थानं **सूर्यस्य चक्षुः --- विपश्चिता** । राज्ञो निवपनादि कर्म प्रतिपद्यते । उत्तरवेदिदेशे उपरवदेशे वा लोहितमित्यादि । सोमविक्रयिणे राजानं प्रदाय पणते इत्यन्तम् । ***सोम विक्रयिन् क्रय्यस्ते सोमा*** इत्यादि प्रकृतिवत्क्रयकल्पः । द्वादशशतदक्षिणापक्षे दशभिः क्रयः । सहस्रदक्षिणापक्षे त्रिंशता क्रयः । अध्वर्युः **सोमं ते क्रीणामि --- अभिमातिषाहं** इति जपित्वा । **गवा ते क्रीणानि । एषा** इति सोमक्रयिणीं निर्दिश्य । ***तस्या आत्मा --- बन्धुः*** इति जपति । ***भूयो वा अतः ।*** षड्विंशत्या गोभिस्ते क्रीणानि । ***भूयो वा अतः ।*** **शुक्रं ते शुक्रेण --- गोः । हिरण्येन ते क्रीणानि ।** ***भूयो वा अतः ।*** **तपसस्तनूरसि । छागया ते क्रीणानि**[५८]। ***भूयो वा अतः ।*** **वाससा ते क्रीणानि ।** न भूयः[५९] **अस्मे चन्द्राणि** इत्यादि समानम् । आतिथ्यया प्रचर्याग्निं मिमीते । आतिथ्यायां समाप्तायां मार्जनान्तेऽग्निमानम्[६०]। ब्रह्माग्नौ मीयमाने दक्षिणत आस्ते ।

[एकविधाग्नेः पुरुषप्रमाणम्- ४३ अङ्गुलाः २८ तिलाः । एकविधाग्नेः प्रक्रमप्रमाणम् १० अङ्गुलाः ३२.५ तिलाः । द्विविधाग्नेः पु.प्र.- ६१ अं ३३ ति । द्विविधाग्नेः प्रक्र. प्र.- १५ अं १६ ति । त्रिविधाग्नेः पु. प्र.-७५ अं ३१ ति । त्रिविधाग्नेः प्रक्र. प्र.- १८ अं ३३ ति । सार्धसप्तविधाग्नेः पु. प्र.-१२०

---

५८. छागेन ते क्रीणानि इति पाठा० ।

५९. सहस्रदक्षिणापक्षे चतुर्विंशत्या क्रयपक्षः सूत्रकारेण विकल्पेनोक्तः । तत्पक्षे सोमक्रयण्या क्रयणानन्तरं त्रयोविंशत्या गोभिस्ते क्रीणानि । न भूयः । अस्मे चन्द्राणीत्यादि इति प्रयोगक्रमः ॥

६०. हविष्कृता वाचं विसृज्येति वाजसनेयकम् इति सूत्रकारेण विकल्प उक्तः । अत्र कपर्दिभाष्यम् - आतिथ्यायां हविष्कृता वाचं विसृज्य सोमं च प्रवेश्याग्निं राजानं चान्तरेण मा सञ्चारिष्टेत्येवमन्त्रं कृत्वा अग्निमानाद्याग्निकं सिकताव्यूहनान्तं कृत्वातिथ्या परिसमाप्तिः इति ।

अं । सार्धसप्तविधाग्नेः प्र. प्र.– ३० अं । सार्धाष्टविधाग्नेः पु. प्र.– १२७ अं २५ ति । सार्धाष्टविधाग्नेः प्र. प्र.– ३१ अं ३२ ति । सार्धनवविधाग्नेः पु. प्र.– १३५ अं २ ति । सार्धनवविधाग्नेः प्र. प्र.– ३३ अं २६ ति ।]

॥ पक्षिविहरणकारिका: ॥

१, शिरोऽग्रयूपयोर्मध्ये द्वादशाङ्गुलमीरितम् ।[६१]

शङ्कुः शिरोग्रे तत्पश्चात् प्रक्रमे प्रक्रमे दश ॥

२, तत्पश्चात् त्रिषु पुच्छाग्रं प्रक्रमैरेव मीयते ।

शिर आरभ्य पुच्छान्तं शङ्कवो द्वादश स्मृताः ॥

३, पञ्चविंशकसूत्रे तु चिह्नं द्वादशसु स्मृतम् ।

पञ्चकं पाशयोर्मध्ये पुच्छाद्यैरेव मीयते ॥[६२]

४, आद्ये चतुर्षु पुच्छाग्रमेकस्मिन् पूर्वकेऽप्ययः ।

पक्षतिस्त्रिषु तुर्ये स्यात् तत्र पक्षाङ्गुलीयकौ ।

५, सहपादेषु दशसु सपादैकादशस्वपि ।

एवमेवोत्तरत्रापि तथैव विमितिर्भवेत् ।

६, पञ्चमादि चतुर्ष्वेवं द्वौ द्वौ पक्षाङ्गुलीयकौ ।

सहपादेषु दशसु सपादैकादशस्वपि ।

७, पक्षतिश्चाष्टमे व्यत्यस्यैकस्मिन् दशमेऽप्ययः ।

एकादशेप्येवमेव दक्षिणोत्तरयोः क्रमे ॥

---

६१. यूपावटीयतः पश्चादवशिष्य तु सञ्चरम् इति पाठा० । एष सार्धसप्तविधाग्निविषयः । पूर्वोक्तस्यैकविधाग्ने– र्वेदिमानकारिकारीत्या षोडशे शङ्कौ वह्निपुच्छं भवति । तदा शिरोऽग्रयूपयोर्मध्येऽन्तरालमधिकं भवति । विस्तरेणास्य विवेचनं ४७५ पृष्ठे द्रष्टव्यम् ।

६२. विमानपाशयोर्मध्यं भवेत्प्रक्रमपञ्चकम् ॥ इति पाठा० ।

८, एकादशे च मूर्ध्नोऽंसौ पक्षयोर्नमनं स्फुटम् ।
द्वादशे च शिरोऽग्रीये सूत्रमायम्य शङ्कुषु ।
९, प्रदक्षिणक्रमेणैव स्पन्द्या स्याच्छिरसोऽवधि ।
शिरोऽग्रचतुरस्रयोरग्नीशानदलांस्त्यजेत् ॥[६३]
१०, पक्षाग्रयोः प्रक्रमेण चतुरस्राणि कारयेत् ।
व्यवलिख्याक्ष्णया तानि अग्नीशानदलांस्त्यजेत् ॥

दर्भस्तम्बे आहुतयः :-

समूलं हरितं दर्भस्तम्बमाहृत्य मध्येऽग्नेर्निखाय जुह्वां पञ्चगृहीतं गृहीत्वा दर्भस्तम्बे पञ्चाहुतीर्जुहोति **सजूरब्दोऽयावभिर्घृतेन स्वाहा** । अब्दायेदम् । **सजूरुषा अरुणीभिर्घृतेन स्वाहा** । उषस इदम् । **सजूस्सूर्य एतशेन घृतेन स्वाहा** । सूर्यायेदम् । **सजोषावश्विना द७ंसोभिर्घृतेन स्वाहा** । अश्विभ्यामिदम् । **सजूरग्निर्वैश्वानर इडाभिर्घृतेन स्वाहा** । अग्नये वैश्वानरायेदम् ।

अग्निमानम् :-

यावान् यजमान ऊर्ध्वबाहुः, तावता वेणुनाग्निं विमिमीते[६४] । सपादान् त्रीन्प्राचः पुच्छप्रभृति । दक्षपक्षाग्रादारभ्य अर्धादिकपञ्चपुरुषानष्टमांशं चोदङ्नीत्वा[६५] । एकविधः प्रथमोऽग्निः द्विविधो द्वितीयः । त्रिविधस्तृतीयः । त एवमेवोद्यन्त्यैकशतविधात् । तदु ह वै सप्तविधमेव चिन्वीत सप्तविधो वाव प्राकृतोऽग्निः । तत ऊर्ध्वमेकोत्तरानिति वाजसनेयकम् ।

अग्निक्षेत्राक्रमणम् :-

स्योना पृथिवी भवानृक्षरा निवेशनी । यच्छा नश्शर्म सप्रथाः ॥ बढित्था पर्वतानां

---

६३. पक्षाग्रचतुरस्राणां अग्नीशानदलांस्त्यजेत् ॥ इत्येव मातृकाग्रन्थपाठः । नैषः साधुः । एतदनन्तरश्लोके उच्यमानत्वात् । तस्मात् शुल्बसूत्रतद्व्याख्याऽनुसारोऽयं पाठः कल्पितः ।

६४. एषः सार्धसप्तविधाग्निविषयः । इतरविधाग्नीनां दण्डप्रमाणानि पूर्वमेव दत्तानि ।

६५. अयं आन्ध्रपाठानुसारी । अन्यत्र सर्वत्र एवं – त्रीन् प्राचः चतुर उदीचः । पुरुषमात्राणि पक्षपुच्छानि । आत्मा चतुःपुरुषः । अरत्निना दक्षिणतो दक्षिणं पक्षं प्रवर्धयति । एवमुत्तरत उत्तरम् । प्रादेशेन वितस्त्या वा पश्चात्पुच्छम् इति । एष तु प्रकृतिचयनविषयकः । प्रकृतिचयनविषयः भूमिकायां द्रष्टव्यः ।

खिद्रं बिभर्षि पृथिवि । प्र या भूमि प्रवत्वति मह्ना जिनोषि महिनि एताभ्यां विमितमग्निमाक्रमन्ते अध्वर्युब्रह्मयजमानाः । **सं वरत्रा दधातन निराहावान् कृणोतन । सिञ्चामहा अवटमुद्रिणं वयं विश्वाहादस्तमक्षितं** इति सम्प्रेष्यति ।

लाङ्गलोच्छ्रयणम् :–

निष्कृताहावमवट७ं सुवरत्र७ं सुषेचनम् । उद्रिण७ं सिञ्चे अक्षितं अवटादुदकमाहावेषूत्सिञ्चति । प्रत्याहावं मन्त्रावृत्तिः । तेषु बलीवर्दान् पाययन्ति । उद्योजनमन्तर्याममीषां खगल्यं शफम् अष्ट्रां तालं प्रतीनाहमुभे मण्डुक्यौ युजौ इति युगलाङ्गलं सम्प्रसारयति । **सीरा युञ्जन्ति कवयो युगा वितन्वते पृथक् । धीरा देवेषु सुम्नया ॥ युनक्त सीरा वि युगा तनोत कृते योनौ वपतेह बीजम् । गिरा च श्रुष्टिः सभरा असन्नो नेदीय इत्सृण्या पक्वमायत्** द्वाभ्यां सीरं युनक्ति । षड्गवं द्वादशगवं चतुर्विंशतिगवं वा । ***उष्टारयोः पिल्वयोरथो आबन्धनीययोः । सर्वेषां विद्म वो नाम वाहाः कीलालपेशसे***[६६] युक्तानभिमन्त्र्य । ***उदस्थात् गोजिद्धनजिदश्वजिद्धिरण्यजित्सूनृतया परीवृतः । एकचक्रेण सविता रथेनोर्जो भागं पृथिवी मेत्वा पृणन्***[६७] लाङ्गलमुच्छ्रयति ।

ब्रह्मवर्महोमः :–

जुह्वां सकृत्सकृद्गृहीत्वा **ब्रह्म जज्ञानं प्रथमं पुरस्ताद्विसीमतस्सुरुचो वेन आवः । स बुध्निया उपमा अस्य विष्ठास्सतश्च योनिमसतश्च विवस्स्वाहा** । ब्रह्मण इदम् । ***अनाप्ता यापः***[६८] ***प्रथमा यस्यां कर्माणि कृण्वते । वीरान्नो अत्र मादभ ७ंस्तद्व एतत्पुरोदधे स्वाहा*** । अद्भ्य इदम् । ***पर्यूषु प्रधन्व वाजसातये परि वृत्राणि सक्षणिः । द्विषस्तरध्या ऋणयान ईयसे***[६९] ***स्वाहा*** । सोमायेदम् । ***सहस्रधारेव ते समस्वरं दिवो नाके मधुजिह्वामसश्चतः***[७०] । ***अस्यस्पशो न नि मिषन्ति भूर्णयः पदेपदे पाशिनः सन्तु सेतवस्स्वाहा***[७१] । सोमायेदम् । शालामुखीये ब्रह्मवर्माणि जुहोति ।

---

६६. कीलालपेशसः इति M.M. पाठः ।

६७. पृथिवी नेत्वा पृणन् इति पाठा०।

६८. *अनाप्ता या वः* इति पाठादयं वरीयान् । अद्भ्य इदमिति उद्देशत्यागलिङ्गात् ।

६९. *द्विषस्थ रूध्या ऋणया ईयते स्वाहा* इति पाठा० ।

७०. *मधुजिह्वा असश्चतः* इति पाठा० ।

७१. *सन्ति सेतवस्स्वाहा* इति पाठा० ।

विमितस्याग्नेराक्रमणम् :-

मलिम्लुचो नामासि त्रयोदशो मास इन्द्रस्य वर्मासीन्द्रस्य शर्मासीन्द्रस्य वरूथमसि तं त्वा प्रपद्ये । गायत्रीं लोमभिः प्रविशामि त्रिष्टुभं त्वचा प्रविशामि जगतीं मा७ँसेन प्रविशामि अनुष्टुभमस्थना[७२] प्रविशामि पङ्क्तिं मज्जा प्रविशाम्यैन्द्राग्नं वर्म बहुलं यदुग्रं विश्वे देवा नातिविध्यन्ति सूराः । तन्नस्त्रायतां तन्नो विश्वतो महदायुष्मन्तो जरामुपगच्छेम देवाः विमितमग्निमाक्रमन्ते ।

लाङ्गलकर्षणम् :- (कर्षणक्रमपटः ५४ पृष्ठे दर्शितः)

पुच्छदेशमध्वर्युः बलीवर्दा कीनाशाः । **लाङ्गलं पवीरव७ँ सुशेव७ँ सुमतित्सरु । उदित्कृषति गामविं प्रफर्व्यं च पीवरीम् । प्रस्थावद्रथवाहनम् ॥ शुनं नः फाला वि तुदन्तु भूमि७ँ शुनं कीनाशा अभियन्तु वाहान् । शुनं पर्जन्यो मधुना पयोभिश्शुनासीरा शुनमस्मासु धत्तम्** द्वाभ्यां कृषति । ब्रह्मा कृष्यमाण ओप्यमाने दक्षिणत आस्ते । कीनाशा बलिवर्दानजन्ति । पुच्छाच्छिरोधि कृषति । **कामं कामदुघे धुक्ष्व मित्राय वरुणाय च । इन्द्रायाग्नये पूष्ण ओषधीभ्यः प्रजाभ्यः** उत्क्षिप्य लाङ्गलं प्रदक्षिणमावर्तयन् जपति । पश्चद्गत्वा कृष्टां सीतामुत्तरेण **लाङ्गलं पवीरवं --- अस्मासु धत्तम्** इति पुनर्द्वाभ्यां कृषति । उत्क्षिप्य लाङ्गलं पुनश्च प्रदक्षिणमावर्तयन् **कामं कामदुघे---प्रजाभ्यः** इति जपति । पुनः पश्चद्गत्वा कृष्टां द्वितीयां सीतामुत्तरेण **लाङ्गलं पवीरवं --- अस्मासु धत्तम्** इति पुनर्द्वाभ्यां कृषति । न कामम् ।

द्वादश सीतानां करणम् :-

तिस्रस्तिस्रस्सीताः संहिताः उत्तरोत्तरतः कृषति । मध्येऽसम्भिन्ना भवन्ति । दक्षिणात्पक्षादुत्तरम्[७३] ।

---

७२. *अनुष्टुभमस्था* इति पाठा० ।

७३. पक्षयोः कर्षणस्य विवृतरूपं क्वचिन्मातृकाग्रन्थेषूपलभ्यते । तद्यथा - अथैवमेव दक्षिणपक्षाग्रादारभ्य उत्तरपक्षाग्रपर्यन्तम् लाङ्गलं पवीरवं --- अस्मासु धत्तम् इति द्वाभ्यां कृषति । उत्क्षिप्य लाङ्गलं प्रदक्षिणमावर्तयन् कामं कामदुघे-----प्रजाभ्यः इति जपति । पुनश्च लाङ्गलं इति द्वाभ्यामुत्तरपक्षाग्रादारभ्य दक्षिण पक्षाग्रपर्यन्तं पूर्वकृष्टां सीतां पूर्वेण कृषति । पुनश्च कामं कामदुघे इति उत्क्षिप्य लाङ्गलं प्रदक्षिणमावर्तयन् कामं कामदुघे---प्रजाभ्यः इति जपति । पुनश्च लाङ्गलं इति द्वाभ्यां दक्षिणपक्षाग्रादारभ्य उत्तरपक्षाग्रपर्यन्तम् द्वितीयां सीतां पूर्वेण कृषति । ततो न प्रदक्षिणं न कामम्- इति ।

उत्तरस्माद्दक्षिणम् । पक्षयोः कर्षणे प्रत्यागमनेऽपि च कर्षणम्। दक्षिणायै श्रोणेरुत्तरमंसम् । उत्तरायै श्रोणेः दक्षिणमंसम्[७४] । एतद्वा विपरीतम् । **विमुच्यध्वमघ्निया देवयाना अतारिष्म तमसस्पारमस्य । ज्योतिरापाम सुवरगन्म** दक्षिणेऽंस उत्तरे[७५] वा बलीवर्दान् विमुच्य । तानुदीचः प्राचो वा उत्सृज्य अध्वर्यवे ददाति । अध्वर्यो बलीवर्दांस्ते ददामि । तानध्वर्युः सप्तदशकृत्वः अपान्य व्यावृत्य रुद्राय गामिति प्रतिगृह्णाति । तूष्णीं वा ।

ओषधिवपनम् :-

(ग्राम्यानामारण्यानां च)

पञ्चदशोदपात्रान्निनयति । द्वादश कृष्टे त्रीनकृष्टे । एकैकं पात्रं द्वादशस्वपि सीतासु निनयत्येवमकृष्टेऽपि त्रीन् । **या जाता ओषधयः** इति चतुर्दशभिः ओषधीर्वपति । अनुसीतमित्युक्तम् । तिलमाषव्रीहियवाः प्रियंग्वणवो गोधूमा इति ग्राम्याः । वेणुश्यामाकनीवारा जर्तिलाश्च गवीधुका आरण्यजा मर्कटका[७६] विज्ञेया । गार्मुतसप्तमाः कुलित्थसप्तमा वा इत्यारण्याः । सप्त ग्राम्याः कृष्टे सप्तारण्या अकृष्टे ।

या जाता ओषधयो देवेभ्यस्त्रियुगं पुरा । मन्दामि बभ्रूणामहꣳ शतं धामानि सप्त च द्वादशसु सीतासु तिलान् वपति । एवमितरान् । **शतं वो अम्ब धामानि सहस्रमुत वो रुहः । अथा शतकृत्वो यूयमिमं मे अगदं कृत** माषान् । **पुष्पावतीः प्रसूवतीः फलिनीरफला उत । अश्वा इव सजित्वरीर्वीरुधः पारयिष्णवः** व्रीहीन् । **ओषधीरिति मातरस्तद्वो देवीरुपब्रुवे । रपाꣳसि विघ्नतीरितरपश्चातयमानाः** यवान् । **अश्वत्थे वो**

---

७४. अस्य कर्षणस्य विवृतरूपं क्वचिन्मातृकाग्रन्थेषूपलभ्यते । तद्यथा – अथ दक्षिणश्रोणिमारभ्य उत्तरांसपर्यन्तं **लाङ्गलं पवीरवं --- अस्मासु धत्तम्** इति द्वाभ्यां कृषति । प्रदक्षिणमावर्तयन् **कामं कामदुघे --- प्रजाभ्यः** इति जपति । दक्षिणां श्रोणिं प्राप्य तामारभ्य तामुत्तरेण (कृष्टां सीतामुत्तरेण) उत्तरांसपर्यन्तं लाङ्गलमिति द्वाभ्यां कृषति । पुनः प्रदक्षिणमावर्तयन् काम कामदुघ इति जपति । पुनरुत्क्षिप्य लाङ्गलं दक्षिणां श्रोणिं प्राप्य तामारभ्य तामुत्तरेण (द्वितीयां सीतामुत्तरेण) उत्तरांसपर्यन्तं लाङ्गलमिति द्वाभ्यां कृषति । ततो न प्रदक्षिणं, न कामम् । एवमेव उत्तरां श्रोणिमारभ्य दक्षिणांसपर्यन्तं तिस्रः सीताः कृषति । एवमादित आरभ्य द्वादश सीताः संपद्यन्ते इति ॥

७५. यदा कर्षणं दक्षिणायै श्रोणेरुत्तरमंसम्, तदनन्तरं उत्तरायै श्रोणेः दक्षिणमंसं तदा दक्षिणेऽंसे उत्सर्गः । विपरीतपक्षे उत्तरेऽंसे उत्सर्गः ।

७६. मर्कटा इति प्राचीनकारिकापाठः ।

निषदनं पर्णे वो वसतिः कृता । गोभाज इत्किलासथ यत्सनवथ पूरुषम् प्रियङ्गून् । **यदहं वाजयन्निमा ओषधीर्हस्त आ दधे । आत्मा यक्ष्मस्य नश्यति पुरा जीवगृभो यथा** अणून् । **यदोषधयः सङ्गच्छन्ते राजानस्समिताविव । विप्रस्स उच्यते भिषग्रक्षोहामीवचातनः** गोधूमान् । एते ग्राम्याः ॥

अथारण्याः । **निष्कृतिर्नाम वो माताथा यूय७ँ स्थ सङ्कृतीः । सराः पतत्रीणीस्स्थन यदामयति निष्कृत** वेणून् । **अन्या वो अन्यामवत्वन्यान्यस्या उपावत । तास्सर्वा ओषधयः सँव्विदाना इदं मे प्रावता वचः** श्यामाकान् । **उच्छुष्मा ओषधीनां गावो गोष्ठादिवेरते । धन७ँ सनिष्यन्तीनामात्मानं तव पूरुष** नीवारान् । **अति विश्वाः परिष्ठास्स्तेन इव व्रजमक्रमुः । ओषधयः प्राचुच्यवुर्यत्किं च तनुवा७ँ रपः** जर्तिलान् । **यास्त आतस्थुरात्मानं या आविविशुः परुःपरुः । तास्ते यक्ष्मं वि बाधन्तामुग्रो मध्यमशीरिव** गवीधुकान् । **साकं यक्ष्म प्रवत श्येनेन किकिदीविना । साकं वातस्य ध्राज्या साकं नश्य निहाकया** मर्कटकान् । **अश्वावती७ँ सोमवतीमूर्जयन्तीमुदोजसम् । आ वित्सि सर्वा ओषधीरस्मा अरिष्टतातये** गार्मुतान् । सप्तारण्या अकृष्टे । यामोषधीनां नाधिगच्छेत् तस्यास्स्थाने यवान् मधुमिश्रान् वा वपेत् । ***उप्ता मेऽसि*** इति वा मनसा ध्यायेत् ।

ओषधीनां प्रोक्षणम् :-

अधिगतायां यः प्रथमः इध्म आगच्छेत्तस्मिन्नेनामुपसन्नह्येत्[७७] । ये वनस्पतीनां फलग्रहयस्तानिध्म उपसन्नह्य प्रोक्षेत्[७८] । **मा नो हि७ँसीत् जनिता यः पृथिव्या** इति चतसृभिः दिग्भ्यो लोष्टान्

---

७७. "अधिगतायां लब्धायाम् । वपनक्रियायां समाप्तायां यः प्रथम इध्म आगच्छति औपसदः तस्मिन्निध्मे एतां बध्नाति । क्षिपति च इध्मेन सह" इति कपर्दिभाष्यम् ।

७८. "ये वनस्पतीनां फलग्रहयः फलान्येव (पुष्पमन्तरेण) येषां केवलानि ते वनस्पतयः वटोदुम्बराद्याः । तेषामपि ये प्रसूतफलास्त इष्यन्ते । तानिध्मे बध्नाति औपसत्के प्रथमे इध्मे । प्रोक्षेदिति इध्मसंस्काराणां प्रदर्शनार्थम् । क्षेपश्च सहेध्मेन" इति कपर्दिभाष्यम् । सायणाचार्यैस्तु एतत्प्रकरणं एवं व्याख्यातं "अत्र अनुप्तस्याप्युप्तत्वसिद्धये वनस्पतीनां मध्ये ये पुष्पमन्तरेण फलं गृह्णन्ति उदुम्बरादयः तानपि आदाय इध्मेन सह सन्नह्य प्रोक्षणं कुर्यात्" इति । कपर्दिमते तु वपनकाले अलब्धानामोषधीनां वपनोत्तरं लब्धानामिध्मेन सह बन्धनम् । फलग्रहीणां वनस्पतीनां तु नित्यमिध्मेन बन्धनम् ।

समस्यति ये अन्तर्विधाद्बहिर्विधं आपन्ना भवन्ति[७९] । यं द्विष्याद्यत्र स स्यात्तस्यै दिशो जघन्यं लोष्टमाहरेत् । **इषमूर्जमहमित आदद** इति । **मा नो हिꣳसीज्जनिता यः पृथिव्या यो वा दिवꣳ सत्यधर्मा जजान । यश्चापश्चन्द्रा बृहतीर्जजान कस्मै देवाय हविषा विधेम** पश्चाद्भूतानां समासः । **अभ्यावर्तस्व पृथिवि यज्ञेन पयसा सह । वपां ते अग्निरिषितोऽवसर्पतु** उदग्भूतानां समासः । **अग्ने यत्ते शुक्रं यच्चन्द्रं यत्पूतं यद्यज्ञियम् । तद्देवेभ्यो भरामसि** प्राग्भूतानां समासः । **इषमूर्जमहमित आदद ऋतस्य धाम्नो अमृतस्य योनेः । आ नो गोषु विशत्वौषधीषु जहामि सेदिमनिराममीवाम्** दक्षिणभूतानां समासः । यदि दक्षिणतो द्वेष्यः तदैवं क्रमः । यस्यां दिशि द्वेष्यः तस्यां दिशि भूतस्य लोष्टस्यान्ते समाप्तिः । **घृतेन सीता मधुना समक्ता विश्वैर्देवैरनुमता मरुद्भिः । ऊर्जस्वती पयसा पिन्वमानास्मान् सीते पयसाभ्याववृत्स्व** सकृन्मन्त्रमुक्त्वा सीतान्तरालान्यभिमृशति । उत्तरवेदिं वा ।

उत्तरवेद्यां सिकतानां निवपनम् :-

अथोत्तरवेदिमुपवपति यावानग्निः **वित्तायनी मेऽसि** इत्यादि । पक्षशिरःपुच्छानामपि परिलेखनम् । तूष्णीं चात्वालं परिलिख्य । देवस्य त्वेति अभ्र्यादानादि **भूतेभ्यस्त्वा** इत्युद्ग्रहणान्तं कृत्वा । **अग्ने तव श्रवो वयो महि भ्राजन्त्यर्चयो विभावसो । बृहद्भानो शवसा वाजमुक्थ्यं दधासि दाशुषे कवे ॥ इरज्यन्नग्ने प्रथयस्व जन्तुभिरस्मे रायो अमर्त्य । स दर्शतस्य वपुषो वि राजसि पृणक्षि सानसिꣳ रयिम् ॥ ऊर्जो नपाज्जातवेदस्सुशस्तिभिर्मन्दस्व धीतिभिर्हितः । त्वे इषस्सन्दधुर्भूरिरेतसश्चित्रोतयो वामजाताः ॥ पावकवर्चाश्शुक्रवर्चा अनूनवर्चा उदियर्षि भानुना । पुत्रः पितरा विचरन्नुपावस्युभे पृणक्षि रोदसी ॥ ऋतावानं महिषं विश्वचर्षणिमग्निꣳ सुम्नाय दधिरे पुरो जनाः । श्रुत्कर्णꣳ सप्रथस्तमं त्वा गिरा दैव्यं मानुषा युगा ॥ निष्कर्तारमध्वरस्य प्रचेतसं क्षयन्तꣳ राधसे महे । रातिं भृगूणामुशिजं कविक्रतुं पृणक्षि सानसिꣳ रयिम्** षड्भिः सिकता न्युप्य । **चितस्स्थ परिचित ऊर्ध्वचितश्श्रयध्वं तया देवतयाङ्गिरस्वद्ध्रुवास्सीदत** अपरिमिताभिः शर्कराभिराहवनीयचितेरायतनं परिश्रयति यथा गार्हपत्यस्य । **आ प्यायस्व समेतु ते विश्वतस्सोम वृष्णियम् । भवा वाजस्य सङ्गथे** सिकता व्यूहति ।

---

७९. कर्षणकाले ये लोष्टाः अग्निक्षेत्रात् बहिर्गताः तानग्निक्षेत्रे पुनः क्षिपतीत्यर्थः ।

ततो व्रतप्रदानम् । यदि पूर्वं व्रतकालो नाधिगच्छेत् । गार्हपत्ये दीक्षितस्येत्यादि । नात्र समिद्द्वयम् । **ये देवा मनोजाताः ।** नाभ्यभिमर्शनान्तं कृत्वा । आतिथ्याया ध्रौवादित्येतदादि कर्म प्रतिपद्यते । **अग्ने व्रतपत** इति यजमानोऽवान्तरदीक्षामुपैति । प्रवर्ग्येण प्रचरिष्यन्त इत्यादि सुब्रह्मण्यान्तम् । एतावान् विशेषः । प्रथमौपसत्के इध्मे दशभिरिध्मदारुभिः सह फलग्रहीन् वनस्पतीन् बध्वा निदधाति । ओषधिवपनसमये अनधिगताः पश्चादधिगता ओषधीश्चोपसन्नह्येत[८०] । आहितासु सामिधेनीसमित्सु तूष्णीमेवाधानम्[८१] । पौर्वाह्निकीभ्यां प्रवर्ग्योपसद्भ्यां प्रचरति । **या ते अग्नेऽयाशया तनूः** इत्युपसदाहुतिः।

सुब्रह्मण्यान्ते अग्रेण प्राग्वंशं लोहिते चर्मण्यानडुहे प्राचीनग्रीव उत्तरलोम्नि प्रथमस्याश्चितेरिष्टकाः संसादयति[८२] । अपि वा तिस्रः स्वयमातृण्णाः तिस्रश्च विश्वज्योतिषः । तासां प्रथम द्वितीयतृतीयचिह्नानि कृत्वा ताः दर्भग्रुमुष्टिनाज्येन[८३] व्यवोक्ष्य समुद्यम्य ***चित्यग्निभ्यः प्रणीयमानेभ्योऽनुब्रूहि*** इति सम्प्रेष्यति । यजमानः – पश्चात्पदमात्रेऽवस्थायाभिहिङ्कृत्य । **हिं भूर्भुवस्स्वरो३म्** ***पुरीष्यासो अग्नयः प्रावणेभिस्सजोषसः । जुषन्तां यज्ञमद्रुहोऽनमीवा इषो महो३म्*** त्रिरुपांशु सप्रणवाम् । अपि वा सुमन्द्रम् । व्रजत्सु अनुव्रजेत् । तिष्टत्सु विसृष्टवाक् प्रणयत इति ब्रूयात् । अध्वर्यवादयः इष्टका आदाय प्रथमायां त्रिरनूक्तायां **हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक आसीत् । स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम** प्राञ्चोऽश्वप्रथमा अभिप्रव्रजन्ति । श्वेतमश्वं* पुरस्तान्नयन्ति । तमनुकृष्णम् । चित्यग्नीनां प्रणीयमानानां ब्रह्मा दक्षिणत एति ।

॥ इति चयनस्य पूर्वाङ्गानि ॥

---

८१. सामिधेनीष्वनूच्यमानासु इध्मेन सह आदधाति इति पाठा० ।

८२. प्रथमस्याश्चितेरिष्टकासंसादनपक्षे इष्टकाप्रणयनं प्रतिचिति कार्यम् । अपि वा तिस्रः स्वयमातृण्णाः इति पक्षे तु न तथा । सर्वचित्यर्थे आदावेव प्रणीतत्वात् ।

८३. दर्भग्रुमुष्टिर्नाम प्रभूतो दर्भमुष्टिः । तेन दर्भमुष्टिना आज्येन विविधं अवोक्षणं व्यवोक्षणम् ।

*. 'श्वेताभावे अश्वेते । अश्वाभावे अनडुहि' (कात्या. श्रौ .सू १७–३–२०) इति कात्यायनेन अनुग्रहः दर्शितः ।

॥ अथ प्रथमा चितिः ॥

अध्वर्युः – **प्रजापतिस्त्वा सादयतु तया देवतयाङ्गिरस्वद्ध्रुवा सीद** उत्तरवेदिमभिमृश्य । **मयि गृह्णाम्यग्रे अग्निꣳ रायस्पोषाय सुप्रजास्त्वाय सुवीर्याय । मयि प्रजां मयि वर्चो दधाम्यरिष्टास्स्याम तनुवा सुवीराः ॥ यो नो अग्निः पितरो हृत्स्वन्तरमर्त्यो मर्त्याꣳ आविवेश । तमात्मन् परिगृह्णीमहे वयं मा सो अस्माꣳ अवहाय परागात्** द्वाभ्यामात्मन्यग्निं गृहीत्वा[८४] । **यास्ते अग्ने समिधो यानि धाम या जिह्वा जातवेदो यो अर्चिः । ये ते अग्ने मेडयो य इन्दवस्तेभिरात्मानं चिनुहि प्रजानन्** अध्वर्युः स्वयञ्चित्याभिमृशति[८५] ।

इष्टकाभिरग्निं चिनोति अध्वर्युर्यजमानो वा । स्वयं चिन्वन्नात्मन्नग्निं[८६] गृह्णीते न स्वयञ्चित्याभिमृशति । प्राचीरुपदधाति प्रतीचीरुपदधातीति गणेषु रीतिवादः । प्राचीमुपदधाति प्रतीचीमुपदधातीति कर्तुर्मुखवादः । खण्डकृष्णादीष्टकादोषनिर्हरणार्थं यजुर्भ्रेषप्रायश्चित्तं करिष्ये । दक्षिणाग्नौ **भुवस्स्वाहा** । वायव इदम् । आहवनीये सर्वप्रायश्चित्तं हुत्वा । प्रतिचित्ययं विधिः[८७] । दक्षिणतश्श्वेतोऽश्वस्तिष्ठति तमालभ्य ।

अथोपधानम् **इन्द्रं विश्वा अवीवृधन्त्समुद्रव्यचसं गिरः । रथीतमꣳ रथीनां वाजानाꣳ सत्पतिं पतिं तया देवतयाङ्गिरस्वद्ध्रुवा सीद** उत्तरेण पुच्छाप्ययं अन्तर्विध आक्रमणं प्रतीष्टकामुपदध्यात् । ब्रह्मा दक्षिणत आस्ते । उत्तरतः पश्चाद्वोपचारोऽग्निः । **तत्त्वा यामि ब्रह्मणा वन्दमानस्तदाशास्ते यजमानो हविर्भिः । अहेडमानो वरुणेह बोध्युरुशꣳस मा न आयुः प्रमोषीस्स्वाहा** । वरुणायेदम् । शालामुखीये हुत्वा । **वाङ्म आसन्नसोः प्राणोऽक्ष्योश्चक्षुः कर्णयोश्श्रोत्रं बाहुवोर्बलमूरुवोरोजोऽरिष्टा विश्वान्यङ्गानि तनूस्तनुवा मे सह नमस्ते अस्तु मा मा हिꣳसीः** सर्वत्र आरोहन् प्रत्यवरोहंश्च जपति । सकृद्वान्ततः । अश्वेन सह

---

८४. आत्मस्थाग्नेरनपक्रमणाय धारणमतिसन्धायेत्यर्थः इति M.M पाठः । अत्र कपर्दिभाष्यम् – द्वाभ्यामात्मनि यो अग्निः संगृह्यते **मा सो अस्माꣳ अवहाय परागात्** इति । चेष्यमाणमग्निमात्मनि गृह्णातीत्यर्थः । शातपथब्राह्मणे समानप्रकरणे आत्मन्नग्निं गृह्णीते चेष्यन् इति श्रूयते । अस्य सायणभाष्यम् – चेष्यन् चयनं करिष्यन् अध्वर्युः आत्मन् आत्मनि अग्निं गृह्णीते मन्त्रेण धारयन् इति । अनेन अग्निधारणं नाम मन्त्रोच्चारणमेव नान्यत् किञ्चन इति गम्यते । तस्मात् मन्त्रार्थानुसन्धानपूर्वकं विराट्पुरुषं चीयमानमग्निं हृदये भावयेत् इत्यर्थः ।

८५. स्वयंचितिरिति यास्ते अग्ने इत्यस्य मन्त्रस्य नाम ।

८६. आत्मन्यग्निं इति पाठा० ।

८७. आन्ध्रद्राविडप्रयोगग्रन्थेषु एतत् प्रायश्चित्तं नोपलभ्यते । अत्र कपर्दिभाष्यम्–खण्डादयः प्रतिनिधित्वेनापि न क्रियन्ते प्रतिषेधात् त्वरमाणोऽपि । उपदेशस्तु खण्डाः प्रतिनिधित्वेन कार्याः। भुव इति प्रायश्चित्तं कृत्वा । इष्टकात्वसामान्यात् इति ॥

आक्रमण्यारोहणम् । प्राञ्चमश्वम् **अभ्यस्थाद्विश्वाः पृतना अरातीस्तदग्निराह तदु सोम आह । बृहस्पतिस्सविता तन्म आह पूषा माऽधात्सुकृतस्य लोके** अश्वस्य दक्षिणेन पदा दर्भस्तम्बमाक्रमय्य । प्रदक्षिणमावर्तयित्वा । **यदक्रन्दः प्रथमं जायमान उद्यन्थ्समुद्रादुत वा पुरीषात् । श्येनस्य पक्षा हरिणस्य बाहू उपस्तुतं जनिम तत्ते अर्वन्** पुनरेवाक्रमयति । **अपां पृष्ठमसि योनिरग्नेस्समुद्रमभितः पिन्वमानम् । वर्धमानं मह आ च पुष्करं दिवो मात्रया वरिणा प्रथस्व तया देवतया** अन्तरिक्षरूपमिति ध्यात्वा । अश्वस्य पदे पुष्करपर्णमुत्तान–मुपधाय । ***अपां निधिं गाय*** इति सम्प्रेष्यति । ***सत्यसाम गाय*** इति वा । **ब्रह्म जज्ञानं प्रथमं पुरस्ताद्विसीमतस्सुरुचो वेन आवः । स बुध्निया उप मा अस्य विष्ठास्सतश्च योनिमसतश्च विवस्तया** आदित्यमण्डलमिति ध्यात्वा पुष्करपर्णे उपरिष्टान्निर्बाधं रुक्ममुदक्छिद्रमुपधाय । **हिरण्यगर्भ स्समवर्तताग्रे भूतस्य जातः पतिरेक आसीत् । स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम तया** तस्मिन् हिरण्मयं पुरुषं प्राचीनमुत्तानं दक्षिणेनातृण्णं प्राङ्मुख उपधाय । **आदित्यमण्डलस्थः पुरुष** इति ध्यात्वा[८८] । ***पुरुषसाम गाय*** इति सम्प्रेष्यति । **द्रप्सश्चस्कन्द पृथिवीमनु द्यामिमं च योनिमनु यश्च पूर्वः । तृतीयं योनिमनु सञ्चरन्तं द्रप्सं जुहोम्यनु सप्त होत्राः** पुरुषमभिमृश्य । **नमो अस्तु सर्पेभ्यो ये के च पृथिवीमनु । ये अन्तरिक्षे ये दिवि तेभ्यस्सर्पेभ्यो नमः ॥ येऽदो रोचने दिवो ये वा सूर्यस्य रश्मिषु । येषामप्सु सदः कृतं तेभ्यस्सर्पेभ्यो नमः ॥ या इषवो यातुधानानां ये वा वनस्पतीॅरनु । ये वाऽवटेषु शेरते तेभ्यस्सर्पेभ्यो नमः** तिसृभिरभिमन्त्र्य ।

जुह्वां पञ्चगृहीतं गृहीत्वा **कृणुष्व पाजः प्रसितिं न पृथ्वीं याहि राजेवामवाॅ इभेन । तृष्वीमनु प्रसितिं द्रूणानोस्तासि विध्य रक्षसस्तपिष्ठैस्स्वाहा** दक्षिणमंसम् । अग्नये रक्षोघ्न इदम् । **तव भ्रमास आशुया पतन्त्यनुस्पृश धृषता शोशुचानः । तपूॅंष्यग्ने जुह्वा पतङ्गानसन्दितो वि सृज विश्वगुल्कास्स्वाहा** उत्तरां श्रोणिम् । अग्नये रक्षोघ्न इदम् । **प्रति स्पशो वि सृज तूर्णितमो भवा पायुर्विशो अस्या अदब्धः । यो नो दूरे अघशॅंसो यो अन्त्यग्ने माकिष्टे व्यथिरादधर्षीत्स्वाहा** दक्षिणां श्रोणिम् । अग्नये रक्षोघ्न इदम् । **उदग्ने तिष्ठ प्रत्याऽऽतनुष्व न्यमित्राॅं ओषतात्तिग्महेते । यो नो अरातिॅं**

---

८८. सर्वत्र ध्यात्वा उपदधातीत्यर्थः ।

समिधान चक्रे नीचा तं धक्ष्यतसन्न शुष्कꣳ स्वाहा उत्तरमंसम् । अग्नये रक्षोघ्न इदम् । **ऊर्ध्वो भव प्रतिविध्याध्यस्मदाविष्कृणुष्व दैव्यान्यग्ने । अव स्थिरा तनुहि यातुजूनां जामिमजामिं प्रमृणीहि शत्रून्त्स्वाहा** मध्यम् । अग्नये रक्षोघ्न इदम् । पञ्चभिः उत्तरवेदिवत् पुरुषं व्याघारयति हिरण्यनिधानमकुर्वन् । **भूतेभ्यस्त्वा** स्रुचमुद्गृह्य[८९] । ***अग्नेस्त्वा तेजसा सादयामि तया*** आज्यस्य पूर्णां कार्ष्मर्यमयीं स्रुचं दक्षिणेन हिरण्मयं पुरुषमुपदधाति । ***इन्द्रस्य त्वौजसा सादयामि तया*** दध्नः पूर्णामौदुम्बरीं स्रुचमुत्तरेण पुरुषम् । **अग्निर्मूर्धा दिवः ककुत्पतिः पृथिव्या अयम् । अपाꣳ रेताꣳसि जिन्वति** कार्ष्मर्यमयीमुपतिष्ठते । **भुवो यज्ञस्य रजसश्च नेता यत्रा नियुद्भिस्सचसे शिवाभिः । दिवि मूर्धानं दधिषे सुवर्षां जिह्वामग्ने चकृषे हव्यवाहम्** औदुम्बरीमुपतिष्ठते । अत्र कृणुष्व पाज इति पञ्चभिः पुरुषवद्रुक्मं व्याघार्य ।

प्रथमस्वयमातृण्णाया उपधानम् :-

ध्रुवाऽसि धरुणास्तृता विश्वकर्मणा सुकृता । मा त्वा समुद्र उद्वधीन्मा सुपर्णोऽ-व्यथमाना पृथिवीं दृꣳह स्वयमातृण्णामभिमृश्य । अश्वेनावघ्राप्य[९०] **प्रजापतिस्त्वा सादयतु पृथिव्याः पृष्ठे व्यचस्वतीं प्रथस्वतीं प्रथोऽसि पृथिव्यसि भूरसि भूमिरस्यदितिरसि विश्वधाया विश्वस्य भुवस्य धर्त्री पृथिवीं यच्छ पृथिवीं दृꣳह पृथिवीं मा हिꣳसीर्विश्वस्मै प्राणायापानाय व्यानायोदानाय प्रतिष्ठायै चरित्रायाग्निस्त्वाभि पातु मह्या स्वस्त्या छर्दिषा शन्तमेन तया देवतयाङ्गिरस्वद्ध्रुवा सीद । भूः** आसीनो मध्येऽग्नेरुपदधात्यविदुषा ब्राह्मणेन सह । अविद्वांसमध्यापयेदन्यः । **चित्तिं जुहोमि मनसा घृतेन यथा देवा इहागमन्वीतिहोत्रा ऋतावृधस्समुद्रस्य वयुनस्य पत्मञ्जुहोमि विश्वकर्मणे विश्वाहाऽमर्त्यꣳ हविस्स्वाहा ।** विश्वकर्मण इदम् । स्वयमातृण्णायां हुत्वाभिप्राणिति[९१] । यजमानद्रव्याद्गृहीत्वा अविद्वान्ब्राह्मणो वरं ददात्यध्वर्यवे एकं द्वौ त्रीन् वा । रुद्राय गामिति प्रतिग्रहः तूष्णीं वा[९२] । आसीनः प्रथमां

---

८९. प्रयोगग्रन्थेषु व्याघारणाङ्गत्वेन भूतेभ्यस्त्वा इति स्रुच उद्ग्रहणमुक्तमस्ति । भाष्येषु वृत्तिषु च अस्य उल्लेखो नास्ति ।

९०. अश्वेनोपघ्राप्य इति पाठा० A.V पाठश्च ।

९१. तस्या उपरि निश्वसितीत्यर्थः । अनुप्राणिति इति पाठान्तरम्, तस्याप्येष एव अर्थः ।

९२ इदं केवलं M.M पाठे वर्तते ।

स्वयमातृण्णामुपदधाति । ऊर्ध्वज्ञुर्द्वितीयां तिष्ठंस्तृतीयाम् । ***स्वयमातृण्णायां साम गाय*** इति सम्प्रेष्यति । एवं द्वितीयां तृतीयां चोपधाय सम्प्रेष्यति । **तेजोऽसि तेजो मे यच्छ पृथिवीं यच्छ पृथिव्यै मा पाहि तया** हिरण्येष्टकाम् । **पृथिव्युदपुरमन्नेन विष्टा मनुष्यास्ते गोप्तारोऽग्निर्वियत्तोऽस्यां तामहं प्रपद्ये सा मे शर्म च वर्म चास्तु तया** मण्डलेष्टकाम् । ***भूरसि भुवनस्य रेत इष्टकास्स्वर्गो लोको वाचा त्वान्वारोहाम्यग्निर्ज्योतिर्ज्योतिरग्नि-स्तया । सूरसि सुवनस्य रेत इष्टकास्स्वर्गो लोको मनसा त्वान्वारोहामि सूर्यो ज्योतिर्ज्योतिस्सूर्यस्तया*** अन्वारोहे द्वे ।

काण्डात्काण्डात्प्ररोहन्ती परुषः परुषः परि । एवा नो दूर्वे प्रतनु सहस्रेण शतेन च ॥ या शतेन प्रतनोषि सहस्रेण वि रोहसि । तस्यास्ते देवीष्टके विधेम हविषा वयं तया द्वाभ्यां दूर्वेष्टकां सलोष्टं हरितं दूर्वास्तम्बमप्रच्छिन्नाग्रं यथास्योपहितस्य स्वयमातृण्णामग्रं प्राप्नुयात्[९३] । प्रबाहुगिष्टकायां हिरण्यशकलावध्यूह्य ।

यास्ते अग्ने सूर्ये रुच उद्यतो दिवमातन्वन्ति रश्मिभिः । ताभिस्सर्वाभी रुचे जनाय नस्कृधि ॥ या वो देवास्सूर्ये रुचो गोष्वश्वेषु या रुचः । इन्द्राग्नी ताभिस्सर्वाभी रुचं नो धत्त बृहस्पते तया द्वाभ्यां वामभृतम् ।

विराड्ज्योतिरधारयत्तया । सम्राड्ज्योतिरधारयत्तया । स्वराड्ज्योतिरधारयत्तया तिसृभिः तिस्रो रेतस्सिचः । तासां द्वे प्रथमायां चित्यां यून उपदध्यात् । सर्वा मध्यमायां विवयसः । एकां प्रथमायां एकामुत्तमायां स्थविरस्य । अन्यतरामुपदध्याद्द्वेष्यस्य । यजुषेमां चामूंचोपदधाति मनसा मध्यमाम् ।

बृहस्पतिस्त्वा सादयतु पृथिव्याः पृष्ठे ज्योतिष्मतीं विश्वस्मै प्राणायापानाय विश्वं ज्योतिर्यच्छाग्निस्तेऽधिपतिस्तया विश्वज्योतिषम्[९३(अ)] । **अग्नेर्यान्यसि तया । देवानामग्ने यान्यसि तया** द्वे संयान्यौ ।

मधुश्च माधवश्च वासन्तिकावृतू अग्नेरन्तश्लेषोऽसि कल्पेतां द्यावापृथिवी कल्पन्तामाप

---

९३. स्वयमातृण्णायामग्रं इति पाठा० ।

९३(अ). अत्र चित्यग्निप्रणयनेन प्रणीतानां तिसृणां पादेष्टकानां प्रथमामुपदधाति ।

ओषधीः कल्पन्तामग्नयः पृथङ्मम ज्यैष्ठ्याय सव्रता येऽग्नयस्समनसोऽन्तरा द्यावापृथिवी वासन्तिकावृतू अभिकल्पमाना इन्द्रमिव देवा अभि सँव्विशन्तु तया देवतयाङ्गिरस्वद्ध्रुवे सीदतम् द्वे ऋतव्ये समानतयादेवते । हस्तद्वयेन युगपदुपदधाति । सर्वास्वृतव्यासु अवकामनूपदधाति ।

अषाढासि सहमाना सहस्वारातीस्सहस्वारातीयतः, सहस्व पृतनास्सहस्व पृतन्यतः । सहस्रवीर्यासि सा मा जिन्व तया द्वाभ्यामषाढामुपरिष्टाल्लक्ष्माणम् ।

उदस्य शुष्माद्भानुर्नार्त बिभर्ति । भारं पृथिवी न भूम । प्र शुक्रैतु देवी मनीषा । अस्मत्सुतष्टो रथो न वाजी । अर्चन्त एके महि साममन्वत । तेन सूर्यमधारयन् । तेन सूर्यमरोचयन् । घर्मश्शिरस्तदयमग्निः । पुरीषमसि सम्प्रियं प्रजया पशुभिर्भुवत् । प्रजापतिस्त्वा सादयतु तया घर्मेष्टकामुपधाय । **यास्ते अग्न आर्द्रा योनयो याः कुलायिनीः । ये ते अग्न इन्दवो या उ नाभयः । यास्ते अग्ने तनुव ऊर्जो नाम । ताभिस्त्व-मुभयीभिस्सँव्विदानः । प्रजाभिरग्ने द्रविणेह सीद । प्रजापतिस्त्वा सादयतु तया** कुलायिनीम् ।

कूर्मोपधानम् :-

मधु वाता ऋतायते मधु क्षरन्ति सिन्धवः । माध्वीर्नस्सन्त्वोषधीः ॥ मधु नक्तमुतोषसि मधुमत्पार्थिवꣳ रजः । मधु द्यौरस्तु नः पिता ॥ मधुमान्नो वनस्पतिर्मधुमाꣳ अस्तु सूर्यः । माध्वीर्गावो भवन्तु नः तिसृभिः दध्ना मधुमिश्रेण कूर्ममभ्यज्य । **मही द्यौः पृथिवी च न इमं यज्ञं मिमिक्षताम् । पिपृतान्नो भरीमभिस्तया** पुरस्तात्स्वयमातृण्णायाः प्रत्यञ्चं जीवन्तं कूर्मं प्राङ्मुख उपदधाति । अवकाभिः परीतंस्य जालेन प्रच्छाद्य । शङ्कुभिः परिणिहत्य । ***अपां गम्भीरं गच्छ मा त्वा सूर्यः परीताप्सीन्मो[९४] ऽग्निं वैश्वानरो[९५] ऽघोरः प्रजा अभि विपश्यानु त्वा दिव्या वृष्टिस्सचताꣳ सꣳ सर्प त्रीन्थ्समुद्रान् स्वर्गाँल्लोकानपां पतिर्वृषभ[९६] इष्टकानां तत्र गच्छ यत्र पूर्वे परेताः पुरीषं वसानस्स्वाँय्योनिं यथा-***

---

९४. *परिताप्सीत्* इत्येकः पाठः, *परीताप्सित्* इत्यपरः पाठः ।

९५. *अग्निर्वैश्वानरः* इति पाठान्तरम् ।

९६. *ऋषभ इष्टकानां* इति पाठान्तरम् ।

यथम्[९७] उपहितमभिमन्त्रयते ।

उलूखलादीनामुपधानम् :-

यच्चिद्धि त्वं गृहेगृह उलूखलक युज्यसे । इह द्युमत्तमं वद जयतामिव दुन्दुभिः प्रादेशमात्रं चतुस्स्रक्त्यौदुम्बरमुलूखलमुत्तरेऽंसे प्रयुनक्ति । अपरिमितं मुसलम् । *उत स्म ते*[९८] *वनस्पते वातो विवात्यग्रमित्*[९९] *। अथो इन्द्राय पातवे सुनु सोममुलूखल* उलूखलं तूष्णीं सर्वौषधस्य पूरयित्वावहत्य परापूय । **इदं विष्णुर्वि चक्रमे त्रेधा नि दधे पदम् । समूढमस्य पा७्सुरे तया** तण्डुलपूर्णमुलूखलं मध्येऽग्नेरुपदधाति । **तद्विष्णोः परमं पद७् सदा पश्यन्ति सूरयः । दिवीव चक्षुराततं तया** मुसलम् । **दिवो वा विष्णवुत वा पृथिव्या महो वा विष्णवुत वान्तरिक्षाद्धस्तौ पृणस्व बहुभिर्वसव्यैरा प्र यच्छ दक्षिणादोत सव्यात्तया** शूर्पम् ।

वायव्यपशुशिरस उपधानम् :-

अथोखायां पय आनयति । **ध्रुवासि पृथिवि सहस्व पृतन्यतः । स्यूता देवेभि-रमृतेनागास्तया**[१००] अवटे मध्येऽग्नेरुपदधाति । **अग्ने युक्ष्वा हि ये तवाश्वासो देव साधवः । अरं वहन्त्याशवस्स्वाहा** । अग्नय इदम् । **युक्ष्वा हि देवहूतमा७् अश्वा७् अग्ने रथीरिव । नि होता पूर्व्यस्सदस्स्वाहा** । अग्नय इदम् । द्वाभ्यामुखायां हुत्वा पुरुषशिरसि हिरण्यशल्कान्[१०१] प्रत्यस्यति । यदि वायव्यस्य पशोस्स्यात् मुख्यस्य स्थाने तस्मिन् हिरण्यशल्कान् प्रत्यस्यति[१०२] । **द्रप्सश्चस्कन्द पृथिवीमनु द्यामिमं च योनिमनु यश्च पूर्वः । तृतीयं योनिमनु सञ्चरन्तं**

---

९७. *अपां गम्भीरं गच्छ मा त्वा सूर्यः परीताप्सीन्मोऽग्निं वैश्वानरः । अघोरः प्रजा अभि विपश्यानु त्वा दिव्या वृष्टिस्सचताम् । स७् सर्प त्रीन्थ्समुद्रान् स्वर्गाल्लोकानपां पतिः । वृषभ इष्टकानां तत्र गच्छ यत्र पूर्वे परेताः पुरीषं वसानस्स्वाँय्योनिं यथायथम्* इति वाक्यशः पाठान्तरम् । अस्य मन्त्रस्य बहवो पाठभेदाः मातृकासूपलभ्यन्ते । अत्र दत्तः अस्मद्गुरूणां पाठः ।

९८. *उदस्य ते* इति पाठा० ।

९९. विवात्यग्रमीत् इति पाठान्तरम् ।

१००. अत्र 'न तयेति केचित् । इष्टकास्वपरिगणनात्' इति क्वचिन्मातृकाग्रन्थेषूपलभ्यते ।

१०१. हिरण्यशकलान् इति पाठा० ।

१०२.क्वचिन्मातृकाग्रन्थेषु पुरुषशिरःपक्षः नोक्तः । "**द्वाभ्यामुखायां हुत्वा वायव्यपशुशिरसि हिरण्यशल्कान् प्रत्यस्यति**" इत्येवोपलभ्यते ।

द्रप्सं जुहोम्यनु सप्त होत्राः आस्ये हिरण्यशल्कं प्रत्यस्यति । **ऋचे त्वा** दक्षिणेऽक्षिकटे । **रुचे त्वा** सव्ये । **द्युते त्वा** दक्षिणे कर्णे । **द्युते त्वा** सव्ये । **भासे त्वा** दक्षिणस्यां नासिकायाम् । **ज्योतिषे त्वा** उत्तरस्याम् । **समित्स्रवन्ति सरितो न धेनाः । अन्तर्हृदा मनसा पूयमानाः । घृतस्य धारा अभि चाकशीमि । हिरण्ययो वेतसो मध्य आसाम्** शृतातङ्क्येन दध्ना मधुमिश्रेण पशुशिरः पूरयति । **तस्मिन्त्सुपर्णो मधुकृत्कुलायी भजन्नास्ते मधु देवताभ्यः । तस्यासते हरयस्सप्त तीरे स्वधां दुहाना अमृतस्य धारां** पशुशिर आदाय ।

आदित्यं गर्भं पयसा समञ्जन्त्सहस्रस्य प्रतिमां विश्वरूपम् । परि वृङ्धि हरसा माऽभिमृक्षश्शतायुषं कृणुहि चीयमानः ॥ वातस्य ध्राजिं वरुणस्य नाभिमश्वं जज्ञान॑ सरिरस्य मध्ये । शिशुं नदीना॑ हरिमद्रिबुद्धमग्ने मा हि॑सीः परमे व्योमन् ॥ अजस्रमिन्दुमरुषं भुरण्युमग्निमीडे पूर्वचित्तौ नमोभिः । सपर्वभिर्ऋतुशः कल्पमानो गां मा हि॑सीरदितिं विराजम् ॥ वरूत्रिं त्वष्टुर्वरुणस्य नाभिमविं जज्ञाना॑ रजसः परस्मात् । मही॑ साहस्रीमसुरस्य मायामग्ने मा हि॑सीः परमे व्योमन्न् ॥ यो अग्निरग्नेस्तपसोऽधि जातश्शोचात्पृथिव्या उत वा दिवस्परि । येन प्रजा विश्वकर्मा व्यानट् तमग्ने हेडः परि ते वृणक्तु तया सर्वेषामुपधानैः पशुशिर उखायां पुरस्ताच्चुबुकं प्राचीनमुत्तानं प्राङ्मुख उपधाय । **चित्रं देवानामुदगादनीकं चक्षुर्मित्रस्य वरुणस्याग्नेस्स्वाहा** दक्षिणेऽक्षिकटे जुहोति । सूर्यायेदम् । **आऽप्रा द्यावापृथिवी अन्तरिक्ष॑ सूर्य आत्मा जगतस्तस्थुषश्च स्वाहा** सव्ये । सूर्यायेदम् । इत्यर्धर्चाभ्यामक्षिकटयोर्हुत्वा ।

इमं मा हि॑सीर्द्विपादं पशूना॑ सहस्राक्ष मेध आ चीयमानः । मयुमारण्यमनु ते दिशामि तेन चिन्वानस्तनुवो नि षीद ॥ इमं मा हि॑सीरेकशफं पशूनां कनिक्रदं वाजिनं वाजिनेषु । गौरमारण्यमनु ते दिशामि तेन चिन्वानस्तनुवो नि षीद ॥ इम॑ समुद्र॑ शतधारमुत्सं व्यच्यमानं भुवनस्य मध्ये । घृतं दुहानामदितिं जनायाग्ने मा हि॑सीः परमे व्योमन् । गवयमारण्यमनु ते दिशामि तेन चिन्वानस्तनुवो नि षीद ॥ इमामूर्णायुं वरुणस्य मायां त्वचं पशूनां द्विपदां चतुष्पदाम् । त्वष्टुः प्रजानां प्रथमं

जनित्रमग्ने मा हि७ंसीः परमे व्योमन् । उष्ट्रमारण्यमनु ते दिशामि तेन चिन्वानस्तनुवो नि षीद ॥ अजा ह्यग्नेरजनिष्ट गर्भात्सा वा अपश्यज्जनितारमग्रे । तया रोहमायन्नुप मेध्यासस्तया देवा देवतामग्र आयन् । शरभमारण्यमनु ते दिशामि तेन चिन्वानस्तनुवो नि षीद सर्वेषामुत्सर्गैरुपतिष्ठते ।

नमो अस्तु सर्पेभ्यो ये के च पृथिवीमनु । ये अन्तरिक्षे ये दिवि तेभ्यस्सर्पेभ्यो नमस्तया दक्षिणेऽंसे सर्पशिर उपदध्यात् । विषूचीनं पशुशीर्षैः, अपि वा यजुरेव वदेत् नोपदध्यात्[१०३] ।

पुरुषाकृतिचयनं यजमानोपस्थानं च :-

मा छन्दस्तत् पृथिव्यग्निर्देवता तेनर्षिणा तेन ब्रह्मणा तया ॥ प्रमा छन्दस्तदन्तरिक्षं वातो देवता तेनर्षिणा तेन ब्रह्मणा तया ॥ प्रतिमा छन्दस्तद्द्यौः सूर्यो देवता तेनर्षिणा तेन ब्रह्मणा तया ॥ अस्रीविश्छन्दस्तद्दिशः सोमो देवता तेनर्षिणा तेन ब्रह्मणा तया ॥ विराट्छन्दस्तद्वाग्वरुणो देवता तेनर्षिणा तेन ब्रह्मणा तया ॥ गायत्री छन्दस्तदजा बृहस्पतिर्देवता तेनर्षिणा तेन ब्रह्मणा तया ॥ त्रिष्टुप् छन्दस्तद्धिरण्यमिन्द्रो देवता तेनर्षिणा तेन ब्रह्मणा तया ॥ जगती छन्दस्तद्गौः प्रजापतिर्देवता तेनर्षिणा तेन ब्रह्मणा तया ॥ अनुष्टुप् छन्दस्तदायुर्मित्रो देवता तेनर्षिणा तेन ब्रह्मणा तया ॥ उष्णिहा छन्दस्तच्चक्षुः पूषा देवता तेनर्षिणा तेन ब्रह्मणा तया ॥ पङ्क्तिश्छन्दस्तत्कृषिः पर्जन्यो देवता तेनर्षिणा तेन ब्रह्मणा तया ॥ बृहती छन्दस्तदश्वः परमेष्ठी देवता तेनर्षिणा तेन ब्रह्मणा तया एताभिर्द्वादभिस्त्रिरभ्यासं पुरस्तात्प्रतीचीं पुरुषाकृतिं चिनोति पुरुषस्य शिरोऽस्याः शिरो भवति ॥

यजमानः- **सहस्रशीर्षा पुरुषः । सहस्राक्षस्सहस्रपात् । स भूमिं विश्वतो वृत्वा । अत्यतिष्ठद्दशाङ्गुलम् ॥ पुरुष एवेद७ं सर्वम् । यद्भूतं यच्च भव्यम् । उतामृतत्वस्येशानः । यदन्नेनातिरोहति ॥ एतावानस्य महिमा । अतो ज्याया७ंश्च पूरुषः । पादोऽस्य विश्वा**

---

१०३. "अथो खलूपधेयमेव इति पुनर्वचनात् प्राकृतेऽग्नौ नित्यम्" इति कपर्दिभाष्यम् ॥

भूतानि । त्रिपादस्यामृतन्दिवि ॥ त्रिपादूर्ध्व उदैत्पुरुषः । पादोऽस्येहाभवात्पुनः । ततो विष्वङ्व्यक्रामत् । साशनानशने अभि ॥ तस्माद्विराडजायत । विराजो अधि पूरुषः । स जातो अत्यरिच्यत । पश्चाद्भूमिमथो पुरः ॥ यत्पुरुषेण हविषा । देवा यज्ञमतन्वत । वसन्तो अस्यासीदाज्यम् । ग्रीष्म इध्मश्शरद्धविः ॥ सप्तास्यासन्परिधयः । त्रिस्सप्त समिधः कृताः । देवा यद्यज्ञं तन्वानाः । अबध्नन् पुरुषं पशुम् ॥ तं यज्ञं बर्हिषि प्रौक्षन् । पुरुषं जातमग्रतः । तेन देवा अयजन्त । साध्या ऋषयश्च ये ॥ तस्माद्यज्ञात्सर्वहुतः । सम्भृतं पृषदाज्यम् । पशू८स्ता८श्चक्रे वायव्यान् । आरण्यान्ग्राम्याश्च ये ॥ तस्माद्यज्ञात्सर्वहुतः । ऋचस्सामानि जज्ञिरे । छन्दा८सि जज्ञिरे तस्मात् । यजुस्तस्मादजायत ॥ तस्मादश्वा अजायन्त । ये के चोभयादतः । गावो ह जज्ञिरे तस्मात् । तस्माज्जाता अजावयः ॥ यत्पुरुषं व्यदधुः । कतिधा व्यकल्पयन् । मुखं किमस्य कौ बाहू । कावूरू पादावुच्येते ॥ ब्राह्मणोऽस्य मुखमासीत् । बाहू राजन्यः कृतः । ऊरू तदस्य यद्वैश्यः । पद्भ्या८ शूद्रो अजायत ॥ चन्द्रमा मनसो जातः । चक्षोस्सूर्यो अजायत । मुखादिन्द्रश्चाग्निश्च । प्राणाद्वायुरजायत ॥ नाभ्या आसीदन्तरिक्षम् । शीर्ष्णो द्यौस्समवर्तत । पद्भ्यां भूमिर्दिशश्श्रोत्रात् । तथा लोका८ अकल्पयन् ॥ वेदाहमेतं पुरुषं महान्तम् । आदित्यवर्णं तमसस्तु पारे । सर्वाणि रूपाणि विचित्य धीरः । नामानि कृत्वाभिवदन् यदास्ते ॥ धाता पुरस्ताद्यमुदाजहार । शक्रः प्रविद्वान्प्रदिशश्चतस्रः । तमेवँव्विद्वानमृत इह भवति । नान्यः पन्था अयनाय विद्यते ॥ यज्ञेन यज्ञमयजन्त देवाः । तानि धर्माणि प्रथमान्यासन् । ते ह नाकं महिमानस्सचन्ते । यत्र पूर्वे साध्यास्सन्ति देवाः उपहितां पुरुषेण नारायणेन यजमानः पुरस्तात् प्रत्यङ् तिष्ठन्नुपतिष्ठते ।

अथापस्याः :-

अपस्या उपदधाति । **अपां त्वेमन्त्सादयामि तया ॥ अपां त्वोद्मन्त्सादयामि तया ॥ अपां त्वा भस्मन्त्सादयामि तया ॥ अपां त्वा ज्योतिषि सादयामि तया ॥ अपां त्वायने सादयामि तया** पञ्च पुरस्तात्प्रतीचीरपस्या उपदधाति । **अर्णवे सदने सीद तया ॥ समुद्रे**

सदने सीद तया ॥ सलिले सदने सीद तया ॥ अपां क्षये सीद तया ॥ अपाꣳ सधिषि सीद तया पञ्च दक्षिणत उदीचीः ॥ **अपां त्वा सदने सादयामि तया ॥ अपां त्वा सधस्थे सादयामि तया ॥ अपां त्वा पुरीषे सादयामि तया ॥ अपां त्वा योनौ सादयामि तया ॥ अपां त्वा पाथसि सादयामि तया** पञ्च पश्चात् प्राचीः ॥ **गायत्री छन्दस्तया ॥ त्रिष्टुप् छन्दस्तया ॥ जगती छन्दस्तया ॥ अनुष्टुप् छन्दस्तया ॥ पङ्क्तिश्छन्दस्तया** पञ्चोत्तरतो दक्षिणाः ॥

ये यज्ञꣳ समगृभ्णन्देवा देवेभ्यस्परि । तान् गायत्री नयतु प्रजानतीस्स्वर्गे लोके अमृतं दुहाना तया[104] पुरस्ताद्धिरण्येष्टकामुपदधाति ॥ *ये ज्योतीꣳषि सन्दधति स्वरारोहन्तो अमृतस्य लोकम् । ते यन्तु प्रजानन्तो यज्ञं*[105] *विदानास्सुकृतस्य लोके तया* दक्षिणतः । *ये पशवो मेध्यासो यज्ञस्य योनिमभि सम्बभूवुः । तां ददन्ते*[106] *कवयो विपश्चितो यज्ञं विदानास्सुकृतस्य लोके तया* पश्चात् ॥ *यः पन्था विततो देवयानश्छन्दोभिर्विगृहीत एति । तेनातिष्ठद्दिवमन्तरिक्षं यज्ञं गृहीत्वा सुकृतस्य लोकं तया*[107] उत्तरतः ॥ *यो यज्ञः सहस्रधारो द्यावापृथिव्योरधिनिर्मितः । तेनैतु यजमानस्स्वस्त्या दिवोऽधि पृष्ठमस्थात्तया ।* मध्ये । पञ्च हिरण्येष्टकाः प्रतिदिशमेकां मध्ये ।

अथ ऋषीष्टकाः :-

आयवे स्वाहा तया ॥ आयोष्कृते स्वाहा तया ॥ आयोष्पत्वने स्वाहा तया ॥ विष्णवे स्वाहा तया ॥ बृहस्पतये स्वाहा तया पञ्चोपधाय ॥

अद्भ्यस्सम्भूतः पृथिव्यै रसाच्च । विश्वकर्मणस्समवर्तताधि । तस्य त्वष्टा विदधद्रूपमेति । तत्पुरुषस्य विश्वमाजानमग्रे तया एतामुपधाय ॥

ऋतसदसि तया ॥ सत्यसदसि तया ॥ तेजस्सदसि तया ॥ वर्चस्सदसि तया ॥ यशस्सदसि तया ॥ गृणानासि तया ॥ धामासि धाम्नै त्वा धामभ्यस्त्वा धामसु सीद तया ॥ सप्त ।[108]

---

१०४. *प्रजानती स्वर्गे लोके अमृतं दुहानास्तया, प्रजानतिः सुवर्गे* इति च पाठा० ।

१०५. *यज्ञं दुहानाः* इति पाठा० । १०६. तां *ददते* इति पाठा० । १०७. लोके तया इति पाठा० ।

१०८. आयवे स्वाहा इत्यारभ्यैतत्पर्यन्तं क्रमः विशिष्टस्थानं च प्राचीनकारिकातोऽवगन्तव्ये ।

सनिरसि सन्यै त्वा सनेयं तया ॥ वित्तिरसि वित्त्यै त्वा विदेयं तया ॥ शक्तिरसि शक्त्यै त्वा शकेयं तया ॥ भूतिरसि भूत्यै त्वा भूयासं तया ॥ कर्मासि कर्मणे त्वा क्रियासं तया ॥ गूर्दोऽसि गूर्दाय त्वा गूर्देभ्यस्त्वा गूर्दे सीद तया ॥ षट्[१०९] ॥

क्षत्रं पाहि तया ॥ क्षत्रं पिन्व तया ॥ क्षत्रं जिन्व तया ॥ क्षत्रं यच्छ तया ॥ क्षत्रं दृꣳह तया ॥ क्षत्रमसि क्षत्राय त्वा क्षत्रेभ्यस्त्वा क्षत्रे सीद तया ॥ षट् ।

विश्वेषु त्वा पार्थिवेषु सादयामि तया ॥ विश्वेषु त्वान्तरिक्षेषु सादयामि तया ॥ विश्वेषु त्वा दिव्येषु सादयामि तया ॥ विश्वेषु त्वा देवेषु सादयामि तया ॥ विश्वासु त्वाप्सु सादयामि तया ॥ विश्वासु त्वौषधीषु सादयामि तया ॥ विश्वेषु त्वा वनस्पतिषु सादयामि तया ॥ विश्वासु त्वा दिक्षु सादयामि तया ॥ विश्वासु त्वा प्रदिक्षु सादयामि तया ॥ नव । दिवि सीद तया ॥ दश ॥

स्वर्जिदसि तया ॥ पृतनाजिदसि तया ॥ भूरिजिदसि तया ॥ अभिजिदसि तया ॥ विश्वजिदसि तया ॥ सर्वजिदसि तया ॥ सत्राजिदसि तया ॥ धनजिदसि तया ॥ भ्राडसि तया ॥ विभ्राडसि तया ॥ प्रभ्राडसि तया ॥ एकादश । सनिरसीत्यारभ्य दक्षिणपक्षे त्रयस्त्रिंशत्[११०] ।

अथोत्तरपक्षे[११०] । सपत्नहनं त्वा वज्रꣳ सादयामि तया ॥ अभिमातिहनं त्वा वज्रꣳ सादयामि तया ॥ अरातिहनं त्वा वज्रꣳ सादयामि तया ॥ यातुहनं त्वा वज्रꣳ सादयामि तया ॥ पिशाचहनं त्वा वज्रꣳ सादयामि तया ॥ रक्षोहणं त्वा वज्रꣳ सादयामि तया ॥ शत्रुहणममित्रहणं भ्रातृव्यहणमसुरहणं त्वेन्द्रं वज्रꣳ सादयामि तया ॥ सप्त ॥

उद्वदसि तया ॥ उदितिरसि तया ॥ उद्यत्यसि तया ॥ आक्रममाणासि तया ॥ आक्रा-मन्त्यसि तया ॥ आक्रान्तिरसि तया ॥ सङ्क्रममाणासि तया ॥ सङ्क्रामन्त्यसि

---

१०९. वासुदेवदीक्षितकारिकारीत्या ऋषीष्टकासु आयवे स्वाहा इत्यारभ्य एतावत्पर्यन्तं नवदशेष्टकाः पुच्छे उपधेयाः । क्षत्रं पाहीत्यारभ्य स्वरसीत्यन्तं पञ्चचत्वारिंशदिष्टकाः दक्षिणे पक्षे उपधेयाः । इषि सीदेत्यारभ्य सम्पदसीत्यन्तं षट्त्रिंशदिष्टकाः सव्ये पक्षे उपधेयाः ।

११०. इदं प्राचीनकारिकानुसृतं वाक्यम् ॥

तया ॥ सङ्क्रान्तिरसि तया ॥ स्वर्ग्यासि तया ॥ स्वरसि तया ॥ एकादश ।

[१११]*इषिसीद तया ॥ ऊर्जिसीद*[११२] *तया ॥ भगे सीद तया ॥ द्रविणे सीद तया ॥ सुभूते सीद तया ॥ पृथिव्या यज्ञिये सीद तया ॥ विष्णोः पृष्ठे सीद तया ॥ इडायाः पदे सीद तया ॥ घृतवति सीद तया ॥ पिन्वमाने सीद तया ॥* दश ॥

संवत्सरे सीद तया ॥ परिवत्सरे सीद तया ॥ इदावत्सरे सीद तया ॥ इदुवत्सरे सीद तया ॥ इद्वत्सरे सीद तया ॥ वत्सरे सीद तया ॥ षट् ॥

अथ पुच्छे विंशतिः[११३] । *एकस्याꣳ सीद तया ॥ दशसु सीद तया ॥ शते सीद तया ॥ सहस्रे सीद तया ॥ अयुते सीद तया ॥ नियुते सीद तया ॥ प्रयुते सीद तया ॥ अर्बुदे सीद तया ॥ न्यर्बुदे सीद तया ॥ समुद्रे सीद तया ॥ मध्ये सीद तया ॥ पद्मे सीद तया ॥ अन्ते सीद तया ॥ परार्धे सीद तया ॥* चतुर्दश ॥

पिन्वमानासि पिन्वमानाय त्वा पिन्वमानेभ्यस्त्वा पिन्वमाने सीद तया ॥ ऋतमस्यृताय त्वर्तेभ्यस्त्वर्ते सीद तया ॥ सत्यमसि सत्याय त्वा सत्येभ्यस्त्वा सत्ये सीद तया ॥ सन्धिरसि सन्धये त्वा सन्धिभ्यस्त्वा सन्धिषु सीद तया ॥ सꣳश्लिडसि सꣳश्लिषे त्वा सꣳश्लिड्भ्यस्त्वा सꣳश्लिक्षु[११४] *सीद तया ॥ सम्पदसि सम्पदे त्वा सम्पद्भ्यस्त्वा सम्पत्सु सीद तया ॥* षट् । एताभ्यामनुवाकाभ्यां प्रतिमन्त्रमृषीष्टकाः सादनप्रवादैश्च पर्यायैः । केचिदृषीष्टका अपोह्य प्राणभृतां उपधानं कुर्वन्ति । तन्न । अक्ष्णया विरोधात् । केचित्तासां द्विषाहस्रादौ प्रयोग इति वदन्ति ।

एवमृषीष्टका उपधाय । **आयुषः प्राणꣳ सन्तनु तया ॥ प्राणादपानꣳ सन्तनु तया ॥ अपानाद्व्यानꣳ सन्तनु तया ॥ व्यानाच्चक्षुस्सन्तनु तया ॥ चक्षुषश्श्रोत्रꣳ सन्तनु तया ॥ श्रोत्रान्मनस्सन्तनु तया ॥ मनसो वाचꣳ सन्तनु तया ॥ वाच आत्मानꣳ**

---

१११. अथ दक्षिणे पक्षे इति उज्वलकारिकानुसृतप्रयोगवाक्यमत्र विद्यते ।

११२. ऊर्जिषीद इति पाठा० ।

११३. इदं प्राचीनकारिकानुसृतं वाक्यम् । अथ उत्तरे पक्षे इति उज्वलकारिकानुसृतप्रयोगवाक्यमत्र विद्यते ।

११४. सꣳश्लिषु सीद, सꣳश्लिट्सु सीद इत्यादि पाठा० ।

सन्तनु तया ॥ आत्मनः पृथिवी७ँ सन्तनु तया ॥ पृथिव्या अन्तरिक्ष७ँ सन्तनु तया ॥ अन्तरिक्षाद्दिव७ँ सन्तनु तया ॥ दिवस्सुवस्सन्तनु तया द्वादश सन्ततीर्दक्षिणे पक्षे ॥

पृथिवी वशामावास्या गर्भो वनस्पतयो जराय्वग्निर्वत्सोऽग्निहोत्रं पीयूषस्तया ॥ अन्तरिक्षं वशा धाता गर्भो रुद्रो जरायु वायुर्वत्सो घर्मः पीयूषस्तया ॥ द्यौर्वशा स्तनयित्नुर्गर्भो नक्षत्राणि जरायु सूर्यो वत्सो वृष्टिः पीयूषस्तया ॥ ऋग्वशा बृहद्रथन्तरे गर्भः प्रैषनिविदो जरायु यज्ञो वत्सो दक्षिणाः पीयूषस्तया ॥ विड्वशा राजन्यो गर्भः पशवो जरायु[११५] राजा वत्सो बलिः पीयूषस्तया पञ्चवशा उपदधाति ॥

अथ कुम्भेष्टकाः :-

अधस्तात्त्रिवृतां स्थाने कुम्भोपहितिरिष्यते ।
स्थूलः कुम्भश्च विज्ञेयः क्षुद्रा कुम्भी तयोरपः ॥
अर्थेतस्थेति मन्त्रेण क्रमादृह्णाति वै पृथक् ।
शर्म च स्थेति युगपत् ध्रुवे सीदतमिष्यते ॥
पुरस्तादनुसीतं स्यादुपधानं द्वयोरपि ।
ज्योतिषे वामिति सकृद्धेमशल्कौ विनिक्षिपेत् ॥

अर्थेत स्थाध्वगतोऽग्नेर्वस्तेजिष्ठेन तेजसा देवताभिर्गृह्णामि कुम्भं कुम्भीं चाद्भिः पूरयित्वा ॥ ***शर्म च स्थ वर्म च स्थ देवस्य वस्सवितुः प्रसवे मधुमतीस्सादयामि तया* देवतयाङ्गिरस्वद्ध्रुवास्सीदत । ध्रुवे सीदतं** इति वा । युगपत्पुरस्तादनुसीतमुपधाय । कुम्भी पूर्वा तु कुम्भतः । ***ज्योतिषे वां*** युगपत् हिरण्यशल्कौ[११६] प्रत्यस्यति । एवमुत्तरा उत्तरैर्मन्त्रैः प्रतिदिशमनुसीतम् । चतस्रो मध्ये ।

शुक्रास्थ वीर्यावतीरिन्द्रस्य व इन्द्रियावतो देवताभिर्गृह्णामि कुम्भं कुम्भीं चाद्भिः पूरयित्वा[११७] ***ऋतं च स्थ सत्यं च स्थ देवस्य वस्सवितुः प्रसवे मधुमतीस्सादयामि तया --- ध्रुवास्सीदत । ध्रुवे सीदतं*** इति वा । युगपद्दक्षिणतोऽनुसीतमुपधाय । कुम्भादुत्तरतः कुम्भी । ***चक्षुषे वां*** युगपत् हिरण्यशल्कौ प्रत्यस्यति ।

---

११५. पञ्चस्वपि मन्त्रेषु जरायुशब्दस्य जरायुः इति पाठा० ॥ ११६. हिरण्यशकलौ इति सर्वत्र पाठा० ।
११७. क्रमेण पूरणे मन्त्रस्यावृत्तिः, युगपत्पूरणे सकृदेव मन्त्रः।

मन्द्रास्थाभिभुवो विश्वेषां वो देवानां देवताभिर्गृह्णामि कुम्भं कुम्भीं चाद्भिः पूरयित्वा । ***सपत्नघ्नीश्च स्थाभिमातिघ्नीश्च स्थ देवस्य वस्सवितुः प्रसवे मधुमतीस्सादयामि तया --- ध्रुवास्सीदत । ध्रुवे सीदतं*** इति वा । युगपत्पश्चादनुसीतमुपधाय । कुम्भी पूर्वा तु कुम्भतः । ***रेतसे वां*** युगपत् हिरण्यशल्कौ प्रत्यस्यति ।

अधिपतयस्थौजस्वानादित्यानां वो देवानां देवताभिर्गृह्णामि कुम्भं कुम्भीं चाद्भिःपूरयित्वा । ***रक्षोघ्नीश्च स्थारातिघ्नीश्च स्थ देवस्य वस्सवितुः प्रसवे मधुमतीस्सादयामि तया --- ध्रुवास्सीदत । ध्रुवे सीदतं*** इति वा । युगपदुत्तरतोऽनुसीतमुपधाय । कुम्भादुत्तरः कुम्भी । ***प्रजाभ्यो वां*** युगपत् हिरण्यशल्कौ प्रत्यस्यति ।

क्षत्रभृदस्थौजस्विनीर्मित्रावरुणयोर्वो ब्रह्मणा देवताभिर्गृह्णामि कुम्भं कुम्भीं चाद्भिः पूरयित्वा । ***वसु च स्थ वामं च स्थ देवस्य वस्सवितुः प्रसवे मधुमतीस्सादयामि तया --- ध्रुवास्सीदत । ध्रुवे सीदतं*** इति वा । युगपन्मध्येऽनुसीतमुपधाय । कुम्भादीशानदिश्यत्र मध्यतः कुम्भिका मता । ***तेजसे वां*** युगपत् हिरण्यशल्कौ प्रत्यस्यति ॥

व्रजक्षितस्थोर्ध्वश्रितो बृहस्पतेर्वो ब्रह्मणा देवताभिर्गृह्णामि कुम्भं कुम्भीं चाद्भिः पूरयित्वा ॥ ***भूतं च स्थ भव्यं च स्थ देवस्य वः सवितुः प्रसवे मधुमतीः सादयामि तया --- ध्रुवास्सीदत । ध्रुवे सीदतं*** इति वा । पुनर्मध्येऽनुसीतमुपधाय ॥ कुम्भात् पूर्वा तु कुम्भिका । ***वर्चसे वां*** युगपत् हिरण्यशल्कौ प्रत्यस्यति[११८] ॥

हिरण्यवर्णाश्शुचयः पावका यासु जातः कश्यपो यास्विन्द्रः । अग्निँय्या गर्भं दधिरे विरूपास्ता न आपश्शꣳ स्योना भवन्तु ॥ यासाꣳ राजा वरुणो याति मध्ये सत्यानृते अवपश्यञ्जनानाम् । मधुश्चुतश्शुचयो याः पावकास्ता न आपश्शꣳ स्योना भवन्तु ॥ यासां देवा दिवि कृण्वन्ति भक्षँय्या अन्तरिक्षे बहुधा भवन्ति । याः पृथिवीं

---

११८. **अर्थे शर्म ज्योतिः, शुक्रा ऋतं चक्षुः, मन्द्राः सपत्नघ्नी रेतः, अधिपती रक्षोघ्नीः प्रजाः, क्षत्रभृद्वसु तेजः, व्रजक्षितो भूतं वर्चः षट्** इति क्वचित् प्रयोगेषु कुम्भेष्टकानां मन्त्रादयः सङ्ग्रहीताः । **ध्रुवे सीदतमिति कुम्भेष्टकानां सादनं वाजसनेयिनः समामनन्ति** इति क्वचित् मातृकासूपलभ्यते ।

पयसोन्दन्ति शुक्रास्ता न आपश्शꣳ स्योना भवन्तु ॥ शिवेन मा चक्षुषा पश्यतापशशिवया तनुवोपस्पृशत त्वचं मे । सर्वाꣳ अग्नीꣳ रफ्सुषदो हुवे वो मयि वर्चो बलमोजो नि धत्त ॥ यददस्सम्प्रयतीरहावनदता हते । तस्मादा नद्यो नाम स्थ ता वो नामानि सिन्धवः ॥ यत्प्रेषिता वरुणेन ताश्शीभꣳ समवल्गत । तदाप्नोदिन्द्रो वो यतीस्तस्मादापो अनु स्थन ॥ अपकामꣳ स्यन्दमाना अवीवरत वो हि कम् । इन्द्रो वश्शक्तिभिर्देवी-स्तस्माद्वार्णाम वो हितम् ॥ एको देवो अप्यतिष्ठत्स्यन्दमाना यथावशम् । उदानिषुर्महीरिति तस्मादुदकमुच्यते ॥ आपो भद्रा घृतमिदाप आसुरग्नीषोमौ बिभ्रत्याप इत्ताः । तीव्रो रसो मधुपृचामरङ्गम आ मा प्राणेन सह वर्चसा गन् । आदित्पश्याम्युत वा शृणोम्यामा घोषो गच्छति वाङ्न आसाम् । मन्ये भेजानो अमृतस्य तर्हि हिरण्यवर्णा अतृपँय्यदा वः ॥ आपो हि ष्ठा मयोभुवस्ता न ऊर्जे दधातन । महे रणाय चक्षसे ॥ यो वश्शिवतमो रसस्तस्य भाजयतेह नः । उशतीरिव मातरः ॥ तस्मा अरं गमाम वो यस्य क्षयाय जिन्वथ । आपो जनयथा च नः इत्युपहिताः कुम्भेष्टका युगपदभिमन्त्रयते ॥ **दिवि श्रयस्वान्तरिक्षे यतस्व पृथिव्या सम्भव ब्रह्मवर्चसमसि ब्रह्मवर्चसाय त्वा** बार्हस्पत्यं नैवारं पयसि चरुं मध्ये कुम्भेष्टकानामुपदधाति[११९] ॥

समन्यायन्त्युपयन्त्यन्याः समानमूर्वं नद्यः पृणन्ति । तमू शुचिꣳ शुचयो दीदिवाꣳ-समपां नपातं परितस्थुरापः ॥ ***हिरण्यवर्णस्सहिरण्यसन्दृगपां पतिः सेदु हिरण्यवर्णः । हिरण्ययात्परि योनेर्निषद्या हिरण्यदा ददत्वन्नमस्मै***[१२०] एताभ्यां च नैवारम् चरुमभिमन्त्रयते[१२१]।

अथ त्रिवृतः :-

त्रिवृत्ते अग्ने शिरस्तन्मे अग्ने शिरस्तया शिरस्युपदधाति । ***त्रिवृत्ते अग्ने शिरस्तेन माभि पाहि***[१२२] इति सन्नमयन्नुपहितां तां तामुपतिष्ठते यजमानः ।

---

११९. क्वचिन्मातृकाग्रन्थेषु चरोरुपधानेऽपि तयादेवतं कृतम् ।

१२०. *ददत्यन्नमस्मै* इति पाठा० ।   १२१. चरुमुपतिष्ठते इति पाठा० ।

१२२. तेन मा पाहि इति सर्वत्र पाठा० ।

अध्वर्युः – ***पञ्चदशौ ते अग्ने बाहू तौ मे अग्ने बाहू तया*** दक्षिणे पक्षे ।

यजमानः – ***पञ्चदशौ ते अग्ने बाहू ताभ्यां माभि पाहि*** ।

अध्वर्युः – ***सप्तदशस्ते अग्न आत्मा स मे अग्न आत्मा तया*** मध्ये ।

यजमानः – ***सप्तदशस्ते अग्न आत्मा तेन माभि पाहि ।***

अध्वर्युः – ***एकवि॒ꣳशौ ते अग्न ऊरू तौ मे अग्न ऊरू तया*** उत्तरे पक्षे ।

यजमानः – ***एकवि॒ꣳशौ ते अग्न ऊरू ताभ्यां माभि पाहि ।***

अध्वर्युः – ***त्रिणवौ ते अग्ने अष्ठीवन्तौ***[१२३] ***तौ मे अग्ने अष्ठीवन्तौ तया*** मध्ये ।

यजमानः – ***त्रिणवौ ते अग्ने अष्ठीवन्तौ ताभ्यां माभि पाहि ।***

अध्वर्युः – ***त्रयस्त्रि॒ꣳशं ते अग्ने प्रतिष्ठानं तन्मे अग्ने प्रतिष्ठानं तया*** पुच्छे । इत्येताः शिरसि पक्षयोः मध्ये पुच्छे चोपदधाति[१२४] ।

यजमानः **–** ***त्रयस्त्रि॒ꣳशं ते अग्ने प्रतिष्ठानं तेन माभि पाहि*** ।

त्वामग्ने वृषभं चेकितानं पुनर्युवानं जनयन्नुपागाम् । अस्थूरिणो गार्हपत्यानि सन्तु तिग्मेन नो ब्रह्मणा स॒ꣳशिशाधि तया ऋषभेष्टकामुपधाय । **लोकं पृण छिद्रं पृणाथो सीद शिवा त्वम् । इन्द्राग्नी त्वा बृहस्पतिरस्मिन् योनावसीषदन् । ता अस्य सूददोहसस्सोम॒ꣳ श्रीणन्ति पृश्नयः । जन्मन्देवानां विशस्त्रिष्वा रोचने दिवस्तया** द्वाभ्यां द्वाभ्यां मन्त्राभ्यामेकैकाम् । अवशिष्टा पञ्च लोकंपृणाभिः प्रच्छादयति[१२५] ।

सर्वान् वर्णानिष्टकानां कुर्यादिति लेखाधिकारो भवतीति विज्ञायते या दक्षिणावृतस्ता दक्षिणत उपदध्यात् । सव्यावृत उत्तरतः । ऋजुलेखा पश्चात् पुरस्ताच्च । त्र्यालिखिता मध्ये । ततश्चितौ हिरण्यं निधाय । **चित्तिमचित्तिं चिनवद्वि विद्वान् पृष्ठेव वीता वृजिना च मर्तान्राये च नस्स्वपत्याय देव दितिं च रास्वादितिमुरुष्य** चितिक्लृप्त्याभिमृशति ।

---

१२३. *अग्नेऽष्ठीवन्तौ* इति पाठा० ।

१२४. प्राचीनकारिकारीत्या एवमुपधानम् । वासुदेवकारिकारीत्या शिरसि, दक्षिणे पक्षे, उत्तरे पक्षे, मध्ये द्वयम्, पुच्छे अन्तिमा इति क्रमः ।

१२५. ऋषीष्टकान्ते ऋषभः इति पक्षे अष्टाविंशत्या लोकम्पृणाभिः प्रच्छादयति ।

अथ चितेरभिमर्शनादि :-

***यत्ते चितं यदु चितं ते अग्ने यदूनं यद्वात्रातिरिक्तम् । विश्वे देवा अङ्गिरसश्चिन वन्ना[१२६] दित्यास्ते चितिमा पूरयन्तु ।* यास्ते अग्ने समिधो यानि धाम या जिह्वा जातवेदो यो अर्चिः । ये ते अग्ने मेडयो य इन्दवस्तेभिरात्मानं चिनुहि प्रजानन्न् ॥ चित्तिमचित्तिं चिनवद्वि --- दितिं च रास्वादितिमुरुष्य ॥ *वयमग्ने धनवन्तस्स्यामालं यज्ञायोत दक्षिणायै । ग्रावा वदेदभि सोमस्या७ँशुनेन्द्र७ँ शिक्षेमेन्दुना सुतेन ॥ रायस्पोषं नो धेहि जातवेद ऊर्जो भागं मधुमत्सूनृतावत् ।* दधाम *यज्ञ७ँ सुनवाम सोमं यज्ञेन त्वामुप शिक्षेम शक्र ॥ ईशानं त्वा शुश्रुमो वयं धनानां धनपते गोमदग्ने । अश्वावद्भूरि पुष्ट७ँ हिरण्यवदन्नमध्येहि*[१२७] *मह्यम् ॥ दुहान्ते द्यौः बृहती*[१२८] *पयोऽजगरस्त्वा सोदको विसर्पतु प्रजापतिनात्मानमाप्रीणेऽरिक्तो*[१२९] *म आत्मा ॥* यो रुद्रो अग्नौ यो अप्सु य ओषधीषु यो रुद्रो विश्वा भुवनाविवेश तस्मै रुद्राय नमो अस्तु देवाः** एताभिः स्वयञ्चित्याभिमृशति ।

उत्तरतः कृष्णोऽश्वस्तिष्ठति । श्यावो वा । तमालभ्य चात्वालात् पुरीषमाहृत्य । **पृष्टो दिवि पृष्टो अग्निः पृथिव्यां पृष्टो विश्वा ओषधीराविवेश । वैश्वानरस्सहसा पृष्टो अग्निस्स नो दिवा स रिषः पातु नक्तम्** वैश्वानर्यर्चा चितावनुव्यूहति । सा चितिर्भवति । **वाङ्म आसन्नसोः प्राणोऽक्ष्योश्चक्षुः कर्णयोः श्रोत्रं बाहुवोर्बलमूरुवोरोजोऽरिष्टा विश्वान्यङ्गानि तनूस्तनुवा मे सह समस्ते अस्तु मा मा हि७ँसीः** प्रत्यवरोहञ्जपति ।

जुह्वां सकृत् सकृत् गृहीत्वा[१३०] ***यो अप्स्वन्तरग्निर्यो वृत्रे यः पुरुषे यो अश्मनि । य आविवेश भुवनानि विश्वा तेभ्योऽग्निभ्यो हुतमस्त्वेतत्स्वाहा ।*** अग्निभ्य इदम् । ***यस्सोमे[१३१] अन्तर्यो गोष्वन्तर्वया७ँसि य आविवेश यो मृगेषु । य आविवेश द्विपदो यश्चतुष्पदस्तेभ्योऽग्निभ्यो हुतमस्त्वेतत्स्वाहा ।*** अग्निभ्य इदम् । **पृष्टो दिवि पृष्टो ---**

---

१२६. चिन्वन् इति पाठा० ।

१२७. हिरण्यवदन्नमद्धेहि इति पाठा० ।

१२८. दुहान्ते द्यौःपृथिवी इति पाठा० ।

१२९. आप्रेणेऽरिक्तो इति पाठा० ।

१३०. जुह्वां षड्गृहीतं गृहीत्वा पाठा० ।

१३१. यस्समो इति पाठा० ।

रिषः पातु नक्तꣳ स्वाहा । अग्नये वैश्वानरायेदम् । ***येनेन्द्रस्य रथꣳ***[१३२] ***सं बभूवुर्यो वैश्वानर उत वैश्वदेव्यः । धीरो***[१३३] ***यश्शक्रः परिभूरदाभ्यस्तेभ्योऽग्निभ्यो हुतमस्त्वेतत्स्वाहा*** । अग्निभ्य इदम् । ***यꣳ हुतादमग्निं यमु काममाहुर्यं दातारं प्रतिग्रहीतारमाहुः । यो देवानां देवतमस्तपोजास्तेभ्योऽग्निभ्यो हुतमस्त्वेतत्स्वाहा*** । अग्निभ्य इदम् । **उक्षान्नाय वशान्नाय सोमपृष्ठाय वेधसे । स्तोमैर्विधेमाग्नये स्वाहा** । अग्नय इदम् । एताभिः षड्भिश्चितिं चितिमुपधायाभिजुहोति । **अग्ने भूरीणि तव जातवेदो देव स्वधावोऽमृतस्य धाम । याश्च माया मायिनां विश्वमिन्व त्वे पूर्वीस्सन्दधुः पृष्टबन्धो स्वाहा** । अग्नये धामच्छद इदम् । आग्नेय्या धामच्छदा चितिं चितिमुपधायाभिजुहोति । उपतिष्ठत इत्येके । **अग्ने देवाꣳ इहावह जज्ञानो वृक्तबर्हिषे । असि होता न ईड्यः** आग्नेय्या गायत्र्या प्रथमां चितिमभिमृशेत् ।

ततः आपराह्णिकीभ्यां प्रवर्ग्योपसद्भ्यां प्रचरन्ति । **या ते अग्नेऽयाशया** इत्युपसदाहुतिः । षडुपसदः । द्व्यहं द्व्यहमेकैकेनोपसन्मन्त्रेण जुहोति । अनूपसदमग्निं चिनोति द्व्यहमुत्तमा चितिः । त्रीणि चतुस्तनानि व्रतानि । त्रीणि त्रिस्तनानि । त्रीणि द्विस्तनानि । एकमेकस्तनम् । आपराह्णिकीभ्यां प्रचर्य सुब्रह्मण्यान्ते श्वेतमश्वं परिणीय[१३४] वसन्ति वसन्ति । अधिवृक्षसूर्ये अग्नीन् ज्योतिष्मतः कुरुतेत्यादि । रात्रौ चतुस्स्तनं व्रतं ददाति । यजमानो व्रतं प्रतिगृह्य[१३५] **या ते अग्ने रुद्रिया तनूः** इति व्रतयति । **शिवाः पीता भवथ** । रात्रौ जागरणम् ।

॥ इति प्रथमा चितिः ॥

---

१३२. *येनेन्द्रस्य रसꣳ* इति पाठा० ।   १३३. *वीरो यश्शक्रः* इति पाठा० ।

१३४. अग्नेः प्रागुदगारभ्य प्राग्वा आरभ्य प्रादक्षिण्येन सर्वतो नयन्ति ।

१३५. क्वचिन्मातृकासु अन्नपते, देवस्य त्वा इति द्वाभ्यां समिदाधानं उपसद्व्रतेष्वपि उक्तं इति पाठा० ।

॥ लाङ्गलकर्षणक्रमः॥



'▬▬▬ रेखा' कर्षणं द्योतयति । '•••••• रेखा' प्रत्यावर्तनं कर्षणाभावं च द्योतयति । सङ्ख्याः कर्षणक्रमं द्योतयन्ति । '↑' कर्षणदिशं द्योतयति ।

॥ अग्निचयने द्वितीयप्रश्नः ॥

॥ अथ द्वितीया चितिः ॥

श्वो भूते विसृष्टवाचि यजमाने पौर्वाह्णिकीभ्यां प्रवर्ग्योपसद्भ्यां प्रचर्य द्वितीयां चितिं चिनोति। या ते अग्नेऽयाशया तनूः इत्युपसदाहुतिः। सुब्रह्मण्यान्ते[१३६] इष्टकादोषप्रायश्चित्तं पूर्ववत्। दक्षिणतः श्वेतोऽश्वस्तिष्ठति तमालभ्य। **वाङ्म आसन्नसोः --- नमस्ते अस्तु मा मा हिꣳसीः** आरोहञ्जपति॥

ध्रुवक्षितिर्ध्रुवयोनिर्ध्रुवासि ध्रुवाँय्योनिमा सीद साध्या। उख्यस्य केतुं प्रथमं पुरस्तादश्विनाध्वर्यू सादयतामिह त्वा तया॥ स्वे दक्षे दक्षपितेह सीद देवत्रा पृथिवी बृहती रराणा। स्वासस्था तनुवा सँविशस्व पितेवैधि सूनव आ सुशेवाऽश्विनाध्वर्यू सादयतामिह त्वा तया॥ कुलायिनी वसुमती वयोधा रयिं नो वर्ध बहुलꣳ सुवीरम्। अपामतिं दुर्मतिं बाधमाना रायस्पोषे यज्ञपतिमाभजन्ती सुवर्धेहि यजमानाय पोषमश्विनाध्वर्यू सादयतामिह त्वा तया॥ अग्नेः पुरीषमसि देवयानी तां त्वा विश्वे अभिगृणन्तु देवाः। स्तोमपृष्ठा घृतवतीह सीद प्रजावदस्मे द्रविणाऽऽयजस्वाश्विनाध्वर्यू सादयतामिह त्वा तया॥ दिवो मूर्धासि पृथिव्या नाभिर्विष्टम्भनी दिशामधिपत्नी भुवनानाम्। ऊर्मिर्द्रप्सो अपामसि विश्वकर्मा त ऋषिरश्विनाध्वर्यू सादयतामिह त्वा तया पञ्चाश्विनीरुपदधाति॥

सजूर्ऋतुभिः सजूर्विधाभिः सजूर्वसुभिः सजूर्देवैर्वयोनाधैरग्नये त्वा वैश्वानराया-रश्विनाध्वर्यू सादयतामिह त्वा तया॥ सजूर्ऋतुभिः सजूर्विधाभिः सजू रुद्रैः सजूर्देवैर्वयोनाधैः --- इह त्वा तया॥ सजूर्ऋतुभिः सजूर्विधाभिः सजूरादित्यैः सजूर्देवैर्वयोनाधैः--- इह त्वा तया॥ सजूर्ऋतुभिः सजूर्विधाभिः सजूर्विश्वैर्देवैः सजूर्देवैर्वयोनाधैः--- इह त्वा तया॥ सजूर्ऋतुभिः सजूर्विधाभिः सजूर्देवै-

---

१३६. एतदनन्तरं 'द्वितीयप्रस्तारस्य शुल्बोपधानं कृत्वा' इति आन्ध्रपाठः।

स्सजूर्देवैर्वयोनाधैः --- इह त्वा तया पञ्चर्तव्या आश्विनीरनूपदधाति ॥

प्राणं मे पाहि तया ॥ अपानं मे पाहि तया ॥ व्यानं मे पाहि तया ॥ चक्षुर्म उर्व्या वि भाहि तया ॥ श्रोत्रं मे श्लोकय तया पञ्च प्राणभृत ऋतव्या अनूपधाय ॥

अपस्पिन्व तया ॥ ओषधीर्जिन्व तया ॥ द्विपात्पाहि तया ॥ चतुश्पादव तया ॥ दिवो वृष्टिमेरय तया पञ्चापस्या अनुपरिहारम् ॥

वायोर्यान्यसि तया ॥ देवानां वायोयान्यसि तया द्वे संयान्यौ ॥

शुक्रश्च शुचिश्च ग्रैष्मावृतू अग्नेरन्तश्लेषोऽसि कल्पेतां --- अन्तरा द्यावापृथिवी ग्रैष्मावृतू अभिकल्पमाना --- अभि संविशन्तु तया देवतयाङ्गिरस्वद्ध्रुवे सीदतम् द्वे ऋतव्ये समानतयादेवते हस्तद्वयेन युगपदुपदधाति । अवकामनूपदधाति ॥

अथ वयस्याः :-

त्र्यविर्वयस्त्रिष्टुप् छन्दस्तया । दित्यवाड्वयो विराट् छन्दस्तया । पञ्चाविर्वयो गायत्री छन्दस्तया । त्रिवत्सो वय उष्णिहा छन्दस्तया । तुर्यवाड्वयोऽनुष्टुप् छन्दस्तया पञ्च दक्षिणस्यां श्रोण्याम् ।

पष्ठवाड्वयो बृहती छन्दस्तया । उक्षा वयस्सतोबृहती छन्दस्तया । ऋषभो वयः ककुच्छन्दस्तया । धेनुर्वयो जगती छन्दस्तया । अनड्वान् वयः पङ्क्तिश्छन्दस्तया पञ्चोत्तरस्यां श्रोण्याम् ॥

बस्तो वयो विवलं छन्दस्तया दक्षिणेंऽसे ॥ **वृष्णिर्वयो विशालं छन्दस्तया** उत्तरेंऽसे । **व्याघ्रो वयोऽनाधृष्टं छन्दस्तया** दक्षिणे पक्षे । **सि७ँहो वयश्छदिश्छन्दस्तया** उत्तरे पक्षे । **पुरुषो वयस्तन्द्रं छन्दस्तया** मध्ये । **विष्टम्भो वयोऽधिपतिश्छन्दस्तया । क्षत्रं वयो मयन्दं छन्दस्तया । विश्वकर्मा वयः परमेष्ठी छन्दस्तया । मूर्धा वयः प्रजापतिश्छन्दस्तया** चतस्रो वयस्याः पुरस्तात्प्रतीचीरुपधाय[१३७] । ऋषभादिश्चित्यन्तः ॥

त्वामग्ने वृषभं चेकितानं पुनर्युवानं जनयन्नुपागाम् । अस्थूरिणो गार्हपत्यानि सन्तु तिग्मेन नो ब्रह्मणा स७ँ शिशाधि तया ऋषभमुपधाय । **लोकंपृण --- दिवस्तया ।**

१३७. मध्ये पुरस्तादारभ्य प्रत्यगपवर्गाः इति पाठा० ।

अवशिष्टाः षट्पञ्चााशदधिकशतं लोकंपृणाः ॥

ततश्चितौ हिरण्यं निधाय । **चित्तिमचित्तिं --- रास्वादितिमुरुष्य** चितिक्लृप्त्याभिमृशति ।

यत्ते चितं यदु चितं, यास्ते अग्ने, चित्तिमचित्तिं, ***वयमग्ने धनवन्तः, रायस्पोषं नो धेहि जातवेदः, ईशानं त्वा शुश्रुमो, दुहां ते द्यौः,*** **यो रुद्रो अग्नौ---नमो अस्तु देवाः** एताभिः स्वयञ्चित्याभिमृशति ।

उत्तरतः कृष्णोऽश्वस्तिष्ठति । श्यावो वा । तमालभ्य चात्वालात् पुरीषमाहृत्य । **पृष्टो दिवि --- पातु नक्तम्** वैश्वानर्यर्चा चितावनुव्यूहति । सा चितिर्भवति । **वाङ्म आसन्नसोः --- मा मा हिꣳसीः** प्रत्यवरोहञ्जपति ।

जुह्वां सकृत् सकृत् गृहीत्वा[१३८] ***यो अप्स्वन्तरग्निः, यस्सोमे अन्तः, पृष्टो दिवि, येनेन्द्रस्य रथं, यꣳहुतादमग्निं,*** **उक्षान्नाय वशान्नाय** इति षडाहुतीर्हुत्वा । **अग्ने भूरीणि तव --- पृष्टबन्धो स्वाहा** आग्नेय्या धामच्छदा चितिं चितिमुपधायाभिजुहोति ॥

अगन्म महा मनसा यविष्ठँय्यो दीदाय समिद्धस्स्वे दुरोणे । चित्रभानू रोदसी अन्तरुर्वी स्वाहुतं विश्वतः प्रत्यञ्चम् आग्नेय्या त्रिष्टुभा द्वितीयां चितिमभिमृशेत् । ततो मध्यन्दिने व्रतप्रदानम्[१३९] इत्यादि नाभ्यभिमर्शनान्तम् । तत आपराह्णिकीभ्यां प्रवर्ग्योपसद्भ्यां चरन्ति । **या ते अग्नेऽयाशया तनूः** इत्युपसदाहुतिः । सुब्रह्मण्यान्ते अश्वपरिणयनम् । अधिवृक्षसूर्ये ***अग्नीन् ज्योतिष्मतः कुरुत*** इत्यादि व्रतं कृणुतेत्यन्तम् । ततो मध्यरात्रे व्रतप्रदानम्[१३९] । न रात्रौ जागरणम् । **अग्ने त्वꣳ सुजागृहि** इत्यादि ॥

॥ इति द्वितीया चितिः ॥

---

१३८. जुह्वां षड्गृहीतं गृहीत्वा पाठा० ।

१३९. चतुस्स्तनं व्रतं ददाति ।

॥ अथ तृतीया चितिः ॥

उपोदये *अग्नीन् ज्योतिष्मतः कुरुत* इत्यादि पूर्ववत् । श्वो भूते विसृष्टवाचि यजमाने पौर्वाह्णिकीभ्यां प्रवर्ग्योपसद्भ्यां प्रचर्य तृतीयां चितिं चिनोति । **या ते अग्ने रजाशया तनूः** इत्युपसदाहुतिः ॥ सुब्रह्मण्यान्ते[१४०] इष्टकादोषप्रायश्चित्तं पूर्ववत्। श्वेतमश्वमालभ्य । **वाङ्म आसन् --- मा मा हिꣳसीः** आरोहञ्जपति ।

द्वितीयस्वयमातृण्णाया उपधानम् :-

इन्द्राग्नी अव्यथमानामिष्टकां दृꣳहतं युवम् । पृष्ठेन द्यावापृथिवी अन्तरिक्षं च विबाधताम् स्वयमातृण्णामभिमृश्याश्वेनावघ्राप्य[१४१] । **विश्वकर्मा त्वा सादयत्वन्तरिक्षस्य पृष्ठे व्यचस्वतीं प्रथस्वतीं भास्वतीꣳ सूरिमतीमा या द्यां भास्या पृथिवीमोर्वन्तरिक्षमन्तरिक्षं यच्छान्तरिक्षं दृꣳहान्तरिक्षं मा हिꣳसीर्विश्वस्मै प्राणायापानाय व्यानायोदानाय प्रतिष्ठायै चरित्राय वायुस्त्वाभि पातु मह्या स्वस्त्या छर्दिषा शन्तमेन तया देवतयाङ्गिरस्वद्ध्रुवा सीद । भुवः** ऊर्ध्वज्ञुः स्वयमातृण्णां मध्येऽग्नेरुपदधात्यविदुषा ब्राह्मणेन सह[१४२]। **चित्तिं जुहोमि --- हविस्स्वाहा** स्वयमातृण्णायां हुत्वा व्यनिति[१४३]। विश्वकर्मण इदम् । अविद्वान्ब्राह्मणोऽध्वर्यवे वरं ददाति । ***स्वयमातृण्णायाꣳ साम गाय*** इति सम्प्रेष्यति ।

ज्योतिरसि ज्योतिर्मे यच्छान्तरिक्षं यच्छान्तरिक्षान्मा पाहि तया हिरण्येष्टकां मध्ये । **अधिद्यौरन्तरिक्षं ब्रह्मणा विष्टा मरुतस्ते गोप्तारो वायुर्वियत्तोऽस्यां तामहं प्रपद्ये सा मे शर्म च वर्म चास्तु तया** मण्डलेष्टकाम् ।

अत्र तिस्रो रेतस्सिचो विवयस उपदधाति **विराड्ज्योतिरधारयत्तया । सम्म्राड्ज्योति-रधारयत्तया । स्वराड्ज्योतिरधारयत्तया** मध्यमं मन्त्रं मनसा स्मरन् ।

विश्वकर्मा त्वा सादयत्वन्तरिक्षस्य पृष्ठे ज्योतिष्मतीं विश्वस्मै प्राणायापानाय विश्वं ज्योतिर्यच्छ वायुस्तेऽधिपतिस्तया विश्वज्योतिषम्[१४३(अ)] । **अन्तरिक्षस्य यान्यसि तया ।**

---

१४०. एतदनन्तरं 'प्रथमप्रस्तारवत् शुल्बोपधानं कृत्वा' इति आन्ध्रपाठः ।

१४१. अश्वेनोपघ्राप्य इति पाठा० A.V. पाठश्च ॥

१४२. मध्ये सन्ध्यन्तराले उपधातव्यम्, मृन्मयीनामिष्टकानामबाधाय

१४३. होमं कृत्वा निरुछवासेनावतिष्ठते इत्यर्थः ।

१४३(अ). अत्र चित्यग्निप्रणयनेन प्रणीतानां तिसृणां पादेष्टकानां द्वितीयामुपदधाति ।

देवानामन्तरिक्षयान्यसि तया द्वे सँय्यान्यौ ।

नभश्च नभस्यश्च वार्षिकावृतू अग्नेरन्तश्लेषोऽसि --- अन्तरा द्यावापृथिवी वार्षिकावृतू अभिकल्पमाना --- विशन्तु तया देवतयाङ्गिरस्वद्ध्रुवे सीदतम् । अवकामनूपदधाति । **इषश्चोर्जश्च शारदावृतू अग्नेरन्तश्लेषोऽसि --- अन्तरा द्यावापृथिवी शारदावृतू अभिकल्पमाना --- विशन्तु तया देवतयाङ्गिरस्वद्ध्रुवे सीदतम्** चतस्र ऋतव्याः द्वे द्वे समानतयादेवते । अवकामनूपदधाति ।

राज्ञ्यसि प्राची दिक्तया । विराडसि दक्षिणा दिक्तया । सम्म्राडसि प्रतीची दिक्तया । स्वराडस्युदीची दिक्तया । अधिपत्न्यसि बृहती दिक्तया पञ्च दिश्याः पुरस्तादरभ्य प्रतिदिशमेकां मध्ये ।

आयुर्मे पाहि तया । प्राणं मे पाहि तया । अपानं मे पाहि तया । व्यानं मे पाहि तया । चक्षुर्मे पाहि तया । श्रोत्रं मे पाहि तया । मनो मे जिन्व तया । वाचं मे पिन्व तया । आत्मानं मे पाहि तया । ज्योतिर्मे यच्छ तया दश प्राणभृतः पुरस्तादुपधाय षट्त्रिंशतं बृहतीरुपदधाति ।

अथ बृहतीः :-

मा छन्दस्तया । प्र मा छन्दस्तया । प्रतिमा छन्दस्तया । अस्रीविश्छन्दस्तया । पङ्क्तिश्छन्दस्तया । उष्णिहा छन्दस्तया । बृहती छन्दस्तया । अनुष्टुप् छन्दस्तया । विराट् छन्दस्तया । गायत्री छन्दस्तया । त्रिष्टुप्छन्दस्तया । जगती छन्दस्तया द्वादश दक्षिणतः ।

पृथिवी छन्दस्तया । अन्तरिक्षं छन्दस्तया । द्यौश्छन्दस्तया । समाश्छन्दस्तया । नक्षत्राणि छन्दस्तया । मनश्छन्दस्तया । वाक् छन्दस्तया । कृषिश्चन्दस्तया । हिरण्यं छन्दस्तया । गौश्छन्दस्तया । अजा छन्दस्तया । अश्वश्छन्दस्तया द्वादश पश्चात् ।

अग्निर्देवता तया । वातो देवता तया । सूर्यो देवता तया । चन्द्रमा देवता तया । वसवो देवता तया । रुद्रा देवता तया । आदित्या देवता तया । विश्वे देवा देवता तया । मरुतो देवता तया । बृहस्पतिर्देवता तया । इन्द्रो देवता तया । वरुणो देवता तया द्वादशोत्तरतः ।

मूर्धासि राट् तया । ध्रुवासि धरुणा तया । यन्त्र्यसि यमित्री तया । इषे त्वा तया । ऊर्जे त्वा तया । कृष्यै त्वा तया । क्षेमाय त्वा तया सप्त वालखिल्याः पुरस्तात्प्रतीचीरुपदधाति।

यन्त्री राट् तया । ध्रुवासि धरणी तया । धर्त्र्यसि धरित्री तया । आयुषे त्वा तया । वर्चसे त्वा तया । ओजसे त्वा तया । बलाय त्वा तया सप्त पश्चात्प्राचीः ।

प्रसवाय त्वा तया । उपयामाय त्वा तया । काटाय त्वा तया । अर्णवाय त्वा तया । धर्णसाय त्वा तया । द्रविणाय त्वा तया । सिन्धवे त्वा तया । समुद्राय त्वा तया । सरस्वते त्वा तया । विश्वव्यचसे त्वा तया । सुभूताय त्वा तया । अन्तरिक्षाय त्वा तया द्वादश भूतेष्टकाः । ऋषभादिश्चित्यन्तः ।

त्वामग्ने वृषभं --- शिशाधि तया । ऋषभमुपधाय । **लोकम्पृण, ता अस्य सूददोहसः** इति द्वाभ्यां एकादशाधिकशतं लोकम्पृणाः ।

ततश्चितौ हिरण्यं निधाय । **चित्तिमचित्तिं --- रास्वादितिमुरुष्य** चितिक्लृप्त्याभिमृशति ।

यत्ते चितं यदु चितं, यास्ते अग्ने, चित्तिमचित्तिं, ***वयमग्ने धनवन्तः, रायस्पोषं नो धेहि जातवेदः, ईशानं त्वा शुश्रुमो, दुहां ते द्यौः,*** **यो रुद्रो अग्नौ---नमो अस्तु देवाः** एताभिः स्वयञ्चित्याभिमृशति ।

उत्तरतः कृष्णोऽश्वस्तिष्ठति । श्यावो वा । तमालभ्य चात्वालात् पुरीषमाहृत्य । **पृष्टो दिवि --- पातु नक्तम्** वैश्वानर्यर्चा चितावनुव्यूहति । सा चितिर्भवति । **वाङ्म आसन्नसोः --- मा मा हिꣳसीः** प्रत्यवरोहन् जपति ।

जुह्वां सकृत् सकृत् गृहीत्वा[१४४] ***यो अप्स्वन्तरग्निः, यस्सोमे अन्तः, पृष्टो दिवि, येनेन्द्रस्य रथं, यꣳहुतादमग्निं,*** **उक्षान्नाय वशान्नाय** इति षडाहुतीर्हुत्वा । **अग्ने भूरीणि तव --- पृष्टबन्धो स्वाहा** आग्नेय्या धामच्छदा चितिं चितिमुपधायाभिजुहोति ॥

मेधाकारं विदथस्य प्रसाधनमग्निꣳ होतारं परिभूतमं मतिम् । त्वामर्भस्य हविषस्स-मानमित् त्वां महो वृणते नरो नान्यन्त्वत् आग्नेय्या जगत्या तृतीयां चितिमभिमृशेत् । ततो

---

१४४. जुह्वां षड्गृहीतं गृहीत्वा पाठा० ।

व्रतकाले त्रिस्तनं व्रतं प्रयच्छति । अस्मिन्नहनि यूपकरणम् । अग्निष्ठप्रथमान् त्रयोदशयूपान् एकयूपं वा मन्त्रेण छिनत्ति[१४५]। ततः आपराह्णिकीभ्यां प्रवर्ग्योपसद्भ्यां चरन्ति । **या ते अग्ने रजाशया तनूः** इत्युपसदाहुतिः । सुब्रह्मण्यान्ते श्वेतमश्वं परिणीय वसन्ति । रात्रौ च त्रिस्तनं व्रतम् । **अग्ने त्वꣳ सुजागृहि** इत्यादि ॥

॥ इति तृतीया चितिः ॥

१४५. एतदनन्तरं " अथ यूपकर्म ततो व्रतं " इत्यान्ध्रपाठः ।

॥ अथ चतुर्थी चितिः ॥

उपोदये ***अग्नीन् ज्योतिष्मतः कुरुत*** इत्यादि पूर्ववत् । श्वो भूते विसृष्टवाचि यजमाने पौर्वाह्णिकीभ्यां प्रवर्ग्योपसद्भ्यां प्रचर्य चतुर्थीं चितिं चिनोति[१४६] । **या ते अग्ने रजाशया** इत्युपसदाहुतिः । सुब्रह्मण्यान्ते[१४७] इष्टकादोषनिमित्तप्रायश्चित्तं पूर्ववत् । श्वेतमश्वमालभ्य **वाङ्म आसन् --- मा मा हिꣳसीः** आरोहञ्जपति ।

आशुस्त्रिवृत्तया पुरस्तात् । **व्योम सप्तदशस्तया** दक्षिणतः । **धरुण एकविꣳशस्तया** पश्चात् । **भान्तः पञ्चदशस्तया** उत्तरतः । एवमग्रेऽपि । अनुवाकद्वयशेषेण चतस्रश्चतस्रः प्रतिदिश–मुपधेयाः । **प्रतूर्तिरष्टादशस्तया । अभिवर्तस्सविꣳशस्तया । वर्चो द्वाविꣳशस्तया । तपो नवदशस्तया ॥ योनिश्चतुर्विꣳशस्तया । गर्भाः पञ्चविꣳशस्तया । ओजस्त्रि–णवस्तया । सम्भरणस्त्रयोविꣳशस्तया ॥ क्रतुरेकत्रिꣳशस्तया । ब्रध्नस्य विष्टपं चतुस्त्रिꣳशस्तया । प्रतिष्ठा त्रयस्त्रिꣳशस्तया । नाकष्षट्त्रिꣳशस्तया ॥**

अग्नेर्भागोऽसि दीक्षाया आधिपत्यं ब्रह्म स्पृतं त्रिवृत् स्तोमस्तया । नृचक्षसां भागोऽसि धातुराधिपत्यं जनित्रꣳ स्पृतꣳ सप्तदशस्तोमस्तया । मित्रस्य भागोऽसि वरुणस्याधिपत्यं दिवो वृष्टिर्वाताः स्पृता एकविꣳशस्तोमस्तया । इन्द्रस्य भागोऽसि विष्णोराधिपत्यं क्षत्रꣳ स्पृतं पञ्चदशस्तोमस्तया ॥

वसूनां भागोऽसि रुद्राणामाधिपत्यं चतुष्पात् स्पृतं चतुर्विꣳशस्तोमस्तया । आदित्यानां भागोऽसि मरुतामाधिपत्यं गर्भास्स्पृताः पञ्चविꣳशस्तोमस्तया । अदित्यै भागोऽसि पूष्ण आधिपत्यमोजस्पृतं त्रिणवस्तोमस्तया । देवस्य सवितुर्भागोसि बृहस्पतेराधिपत्यꣳ समीचीर्दिशस्पृताश्चतुष्टोमस्स्तोमस्तया ।

धर्त्रश्चतुष्टोमस्तया । यावानां भागोऽस्ययावानामाधिपत्यं प्रजास्स्पृताश्चतुश्चत्वारिꣳश–स्तोमस्तया । ऋभूणां भागोऽसि विश्वेषां देवानामाधिपत्यं भूतं निशान्तꣳ स्पृतं

---

१४६. श्वोभूते चतुर्थ्योपसदहे पौर्वाह्णिकीभ्यां प्रचर्य इति पाठा०।

१४७. एतदनन्तरं " द्वितीयप्रस्तारवत् शुल्बोपधानं कृत्वा " इति आन्ध्रपाठः ।

त्रयस्त्रि७ंशस्तोमस्तया । विवर्तोऽष्टाचत्वारि७ंशस्तया एताभ्यामनुवाकभ्यां यथाब्राह्मणमुपधाय ।

अन्तरिक्षमसि तया । अन्तरिक्षाय त्वा तया । द्वे सँय्यान्यौ ।

सहश्च सहस्यश्च हैमन्तिकावृतू अग्नेरन्तश्लेषोऽसि --- अन्तरा द्यावापृथिवी हैमन्तिकावृतू अभिकल्पमाना --- विशन्तु तया देवतयाङ्गिरस्वद्ध्रुवे सीदतम् द्वे ऋतव्ये समानतयादेवते । अवकामनूपदधाति ।

अथ सृष्टीः :-

एकयाऽस्तुवत प्रजा अधीयन्त प्रजापतिरधिपतिरासीत्तया । तिसृभिरस्तुवत ब्रह्मासृज्यत ब्रह्मणस्पतिरधिपतिरासीत्तया । पञ्चभिरस्तुवत भूतान्यसृज्यन्त भूतानां पतिरधिपतिरासीत्तया । सप्तभिरस्तुवत सप्तर्षयोऽसृज्यन्त धाताऽधिपतिरासीत्तया । नवभिरस्तुवत पितरोऽसृज्यन्तादितिरधिपत्न्यासीत्तया । एकादशभिरस्तुवतर्तवोऽसृज्यन्तार्तवोऽधिपतिरासीत्तया । त्रयोदशभिरस्तुवत मासा असृज्यन्त सँव्वत्सरोऽधिपतिरासीत्तया । पञ्चदशभिरस्तुवत क्षत्रमसृज्यतेन्द्रोऽधिपतिरासीत्तया । सप्तदशभिरस्तुवत पशवोऽसृज्यन्त बृहस्पतिरधिपतिरासीत्तया । नवदशभिरस्तुवत शूद्रार्याव-सृज्येतामहोरात्रे अधिपत्नी आस्तां तया । एकवि७ंशत्याऽस्तुवतैकशफाः पशवोऽसृज्यन्त वरुणोऽधिपतिरासीत्तया । त्रयोवि७ंशत्यास्तुवत क्षुद्राः पशवोऽसृज्यन्त पूषाऽधिपतिरासीत्तया । पञ्चवि७ंशत्याऽस्तुवतारण्याः पशवोऽसृज्यन्त वायुरधिपतिरासीत्तया । सप्तवि७ंशत्याऽस्तुवत द्यावापृथिवी व्यैतां वसवो रुद्रा आदित्या अनुव्यायन् तेषामाधिपत्यमासीत्तया । नववि७ंशत्याऽस्तुवत वनस्पतयोऽसृज्यन्त सोमोऽधिपतिरासीत्तया । एकत्रि७ंशताऽस्तुवत प्रजा असृज्यन्त यावानां चायावानां चाधिपत्यमासीत्तया । त्रयस्त्रि७ंशतास्तुवत भूतान्यशाम्यन् प्रजपतिः परमेष्ठ्यधिपतिरासीत्तया सप्तदश सृष्टीर्दक्षिणे पार्श्वे ।

अथ व्युष्टीः :-

इयमेव सा या प्रथमा व्यौच्छदन्तरस्यां चरति प्रविष्टा । वधूर्जजान नवगज्जनित्री त्रय एनां महिमानस्सचन्ते तया ॥ छन्दस्वती उषसा पेपिशाने समानँय्योनिमनु सञ्चरन्ती । सूर्यपत्नी वि चरतः प्रजानती केतुं कृण्वाने अजरे भूरिरेतसा तया ॥ ऋतस्य पन्थामनु तिस्र आऽगुस्त्रयो घर्मासो अनु ज्योतिषाऽऽगुः । प्रजामेका रक्षत्यूर्जमेका व्रतमेका रक्षति देवयूनां तया ॥ चतुष्टोमो अभवद्या तुरीया यज्ञस्य पक्षावृषयो भवन्ती । गायत्रीं त्रिष्टुभं जगतीमनुष्टुभं बृहदर्कं युञ्जानास्सुवराभरन्निदं तया ॥ पञ्चभिर्धाता विदधाविदं यत्तासाᳩ स्वसॄरजनयत् पञ्चपञ्च । तासामु यन्ति प्रयवेण पञ्च नाना रूपाणि क्रतवो वसानास्तया ॥ त्रिᳩशत्स्वसार उप यन्ति निष्कृतᳩ समानं केतुं प्रतिमुञ्चमानाः । ऋतूᳩस्तन्वते कवयः प्रजानतीर्मध्येछन्दसः परि यन्ति भास्वतीस्तया ॥ ज्योतिष्मती प्रति मुञ्चते नभो रात्री देवी सूर्यस्य व्रतानि । वि पश्यन्ति पशवो जायमाना नानारूपा मातुरस्या उपस्थे तया ॥ एकाष्टका तपसा तप्यमाना जजान गर्भं महिमानमिन्द्रम् । तेन दस्यून्व्यसहन्त देवा हन्ताऽसुराणाम- भवच्छचीभिस्तया ॥ अनानुजामनुजां मामकर्त सत्यँव्वदन्त्यन्विच्छ एतत् । भूयासमस्य सुमतौ यथा यूयमन्या वो अन्यामति मा प्रयुक्त तया ॥ अभून्मम सुमतौ विश्ववेदा आष्ट प्रतिष्ठामविदद्धि गाधम् । भूयासमस्य सुमतौ यथा यूयमन्या वो अन्यामति मा प्रयुक्त तया ॥ पञ्च व्युष्टीरनु पञ्च दोहा गां पञ्चनाम्नीमृतवोऽनु पञ्च । पञ्च दिशः पञ्चदशेन क्लृप्तास्समानमूर्ध्नीरभि लोकमेकं तया ॥ ऋतस्य गर्भः प्रथमा व्यूषुष्यपामेका महिमानं बिभर्ति । सूर्यस्यैका चरति निष्कृतेषु घर्मस्यैका सवितैकान्नियच्छति तया ॥ या प्रथमा व्यौच्छत्सा धेनुरभवद्यमे । सा नः पयस्वती धुक्ष्वोत्तरामुत्तराᳩ समां तया ॥ शुक्रर्षभा नभसा ज्योतिषाऽऽगाद्विश्वरूपा शबलीर- ग्निकेतुः । समानमर्थᳩ स्वपस्यमाना बिभ्रती जरामजर उष आगास्तया ॥ ऋतूनां पत्नी प्रथमेयमागादह्नां नेत्री जनित्री प्रजानाम् । एका सती बहुधोषो व्युच्छस्यजीर्णा

त्वं जरयसि सर्वमन्यत्तया ॥ ईयुष्टे ये पूर्वतरामपश्यन्व्युच्छन्तीमुषसं मर्त्यासः । अस्माभिरू नु प्रतिचक्ष्याभूदो ते यन्ति ये अपरीषु पश्या७ँ स्तया षोडश व्युष्टीरुत्तरे पार्श्वे ।

त्वामग्ने वृषभं --- शिशाधि तया ऋषभमुपधाय । **लोकम्पृण --- । ता अस्य सूददोहस** इति द्वाभ्यां चतुस्त्रिंशदधिकशतं लोकम्पृणाः ।

ततश्चितौ हिरण्यं निधाय । **चित्तिमचित्तिं --- रास्वादितिमुरुष्य** चितिक्लृप्त्याभिमृशति ।

यत्ते चितं यदु चितं, यास्ते अग्ने, चित्तिमचित्तिं, ***वयमग्ने धनवन्तः, रायस्पोषं नो धेहि जातवेदः, ईशानं त्वा शुश्रुमो, दुहां ते द्यौः,*** **यो रुद्रो अग्नौ---नमो अस्तु देवाः** एताभिः स्वयञ्चित्याभिमृशति ।

उत्तरतः कृष्णोऽश्वस्तिष्ठति । श्यावो वा । तमालभ्य चात्वालात् पुरीषमाहृत्य । **पृष्टो दिवि --- पातु नक्तम्** वैश्वानर्यर्चा चितावनुव्यूहति । सा चितिर्भवति । **वाङ्म आसन्नसोः --- मा मा हि७ँसीः** प्रत्यवरोहन् जपति ।

जुह्वां सकृत्सकृत् गृहीत्वा[१४८] ***यो अप्स्वन्तरग्निः, यस्सोमे अन्तः, पृष्टो दिवि, येनेन्द्रस्य रथं, य७ँहुतादमग्निं,*** **उक्षान्नाय वशान्नाय** इति षडाहुतीर्हुत्वा । **अग्ने भूरीणि तव --- पृष्टबन्धो स्वाहा** आग्नेय्या धामच्छदा चितिं चितिमुपधायाभिजुहोति ॥

मनुष्वत्त्वा निधीमहि मनुष्वत्समिधीमहि । अग्ने मनुष्वदङ्गिरो देवान्देवायते यज आग्नेय्यानुष्टुभा चतुर्थीं चितिमभिमृशेत् । पूर्ववन्मध्यन्दिने त्रिस्तनव्रतम् । आपराह्णिकीभ्यां प्रवर्ग्योपसद्भ्यां चरन्ति । **या ते अग्ने रजाशया तनूः** इत्युपसदाहुतिः । सुब्रह्मण्यान्ते श्वेतमश्वं परिणीय वसन्ति । रात्रौ द्विस्तनं व्रतम् । **अग्ने त्व७ँ सुजागृहि** इत्यादि ॥

॥ इति चतुर्थी चितिः ॥

---

१४८. जुह्वां षड्गृहीतं गृहीत्वा इति पाठा० ।

॥ अथ पञ्चमी चितिः ॥

उपोदये *अग्नीन् ज्योतिष्मतः कुरुत* इत्यादि पूर्ववत् । श्वो भूते विसृष्टवाचि यजमाने पौर्वाह्णिकीभ्यां प्रवर्ग्योपसद्भ्यां प्रचर्य पञ्चमीं चितिं चिनोति । **या ते अग्ने हराशया** इत्युपसदाहुतिः । सुब्रह्मण्यान्ते[१४९] इष्टकादोषनिमित्तप्रायश्चित्तं पूर्ववत् । श्वेतमश्वमालभ्य **वाङ्म आसन् --- मा मा हिꣳसीः** आरोहञ्जपति ।

अथ असपत्नाः :-

अग्ने जातान्प्रणुदा नस्सपत्नान्प्रत्यजाताञ्जातवेदो नुदस्व । अस्मे दीदिहि सुमना अहेडन् तव स्याꣳ शर्मन् त्रिवरूथ उद्भित्तया पुरस्तादुपदधाति । **सहसा जातान्प्र णुदा नस्सपत्नान्प्रत्यजाताञ्जातवेदो नुदस्व । अधि नो ब्रूहि सुमनस्यमानो वयꣳ स्याम प्रणुदा नस्सपत्नान्तया** पश्चात् । **चतुश्चत्वारिꣳशस्स्तोमो वर्चो द्रविणं तया** दक्षिणतः । **षोडश स्तोम ओजो द्रविणं तया** उत्तरतः । इष्टकायां पुरीषमध्यूह्य । **पृथिव्याः पुरीषमस्यप्सो नाम तया** मध्येऽग्नेः पुरीषवतीम् ।

अथ विराजः :-

एवश्छन्दस्तया । वरिवश्छन्दस्तया । शम्भूश्छन्दस्तया । परिभूश्छन्दस्तया । आच्छच्छन्दस्तया । मनश्छन्दस्तया । व्यचश्छन्दस्तया । सिन्धुश्छन्दस्तया । समुद्रञ्छन्दस्तया । सलिलञ्छन्दस्तया दश पूर्वस्याम् ॥

सँय्यच्छन्दस्तया । वियच्छन्दस्तया । बृहच्छन्दस्तया । रथन्तरञ्छन्दस्तया । निकायश्छन्दस्तया । विवधश्छन्दस्तया । गिरश्छन्दस्तया । भ्रजश्छन्दस्तया । स्रष्टुप् छन्दस्तया । अनुष्टुप् छन्दस्तया दश दक्षिणतः ।

ककुच्छन्दस्तया । त्रिककुच्छन्दस्तया । काव्यञ्छन्दस्तया । अङ्कुपञ्छन्दस्तया । पदपङ्क्तिश्छन्दस्तया । अक्षरपङ्क्तिश्छन्दस्तया । विष्टारपङ्क्तिश्छन्दस्तया । क्षुरो भृज्वान् छन्दस्तया । प्रच्छच्छन्दस्तया । पक्षश्छन्दस्तया दश पश्चात् ।

एवश्छन्दस्तया । वरिवश्छन्दस्तया । वयश्छन्दस्तया । वयस्कृच्छन्दस्तया ।

---

१४९. एतदनन्तरं 'प्रथमप्रस्तारवत् शुल्बोपधानं कृत्वा' इति आन्ध्रपाठः ।

विशालञ्छन्दस्तया । विष्पर्धाश्छन्दस्तया । छदिश्छन्दस्तया । दूरोहणञ्छन्दस्तया । तन्द्रञ्छन्दस्तया । अङ्काङ्कञ्छन्दस्तया दशोत्तरतः । चत्वारिंशतं विराजो दश दश प्रतिदिशमक्ष्णया ॥

अथ स्तोमभागाः :–

रश्मिरसि क्षयाय त्वा क्षयं जिन्व तया । प्रेतिरसि धर्माय त्वा धर्मं जिन्व तया । अन्वितिरसि दिवे त्वा दिवं जिन्व तया । सन्धिरस्यन्तरिक्षाय त्वान्तरिक्षं जिन्व तया । प्रतिधिरसि पृथिव्यै त्वा पृथिवीं जिन्व तया । विष्टम्भोऽसि वृष्ट्यै त्वा वृष्टिं जिन्व तया । प्रवास्यह्ने त्वाहर्जिन्व तया । सप्त पुरस्तात् ।

अनुवासि रात्रियै त्वा रात्रिं जिन्व तया । उशिगसि वसुभ्यस्त्वा वसून् जिन्व तया । प्रकेतोऽसि रुद्रेभ्यस्त्वा रुद्रान् जिन्व तया । सुदीतिरस्यादिभ्यस्त्वाऽऽदित्यान् जिन्व तया । ओजोऽसि पितृभ्यस्त्वा पितॄन् जिन्व तया । तन्तुरसि प्रजाभ्यस्त्वा प्रजा जिन्व तया । पृतनाषाडसि पशुभ्यस्त्वा पशून् जिन्व तया । सप्त दक्षिणतः ।

रेवदस्योषधीभ्यस्त्वौषधीर्जिन्व तया । अभिजिदसि युक्तग्रावेन्द्राय त्वेन्द्रं जिन्व तया । अधिपतिरसि प्राणाय त्वा प्राणं जिन्व तया । यन्तास्यपानाय त्वाऽपानं जिन्व तया । सꣳसर्पोऽसि चक्षुषे त्वा चक्षुर्जिन्व तया । वयोधा असि श्रोत्राय त्वा श्रोत्रं जिन्व तया । त्रिवृदसि तया । सप्त पश्चात् ।

प्रवृदसि तया । सँव्वृदसि तया । विवृदसि तया । सꣳरोहोऽसि तया । नीरोहोऽसि तया । प्ररोहोऽसि तया । अनुरोहोऽसि तया । सप्त उत्तरतः । **वसुकोऽसि तया । वेषश्रिरसि तया । वस्यष्टिरसि तया** तिस्रो मध्ये । एकत्रिंशत् स्तोमभागाः सप्तसप्त प्रतिदिशं अवशिष्टा मध्ये।

अथ नाकसदः :–

राज्ञ्यसि प्राची दिग्वसवस्ते देवा अधिपतयोऽग्निर्हेतीनां प्रतिधर्ता त्रिवृत्त्वा स्तोमः पृथिव्याꣳ श्रयत्वाज्यमुक्थमव्यथयथ्स्तभ्नातु रथन्तरꣳ साम प्रतिष्ठित्या अन्तरिक्षाय– र्‌षयस्त्वा प्रथमजा देवेषु दिवो मात्रया वरिणा प्रथन्तु विधर्ता चायमधिपतिश्च ते त्वा

सर्वे सँव्विदाना नाकस्य पृष्ठे सुवर्गे लोके यजमानं च सादयन्तु तया ॥

विराडसि दक्षिणा दिग्रुद्रास्ते देवा अधिपतय इन्द्रो हेतीनां प्रतिधर्ता पञ्चदशस्त्वा स्तोमः पृथिव्या९ँ श्रयतु प्रउगमुक्थमव्यथयथ्स्तभ्नातु बृहत्साम प्रतिष्ठित्या अन्तरिक्षायर्षयस्त्वा --- यजमानं च सादयन्तु तया ॥

सम्राडसि प्रतीची दिगादित्यास्ते देवा अधिपतयस्सोमो हेतीनां प्रतिधर्ता सप्तदशस्त्वा स्तोमः पृथिव्या९ँ श्रयतु मरुत्वतीयमुक्थमव्यथयथ्स्तभ्नातु वैरूप९ँ साम प्रतिष्ठित्या अन्तरिक्षायर्षयस्त्वा --- यजमानं च सादयन्तु तया ॥

स्वराडस्युदीची दिग्विश्वे ते देवा अधिपतयो वरुणो हेतीनां प्रतिधर्तैकवि९ँशस्त्वा स्तोमः पृथिव्या९ँ श्रयतु निष्केवल्यमुक्थमव्यथस्यथ्स्तभ्नातु वैराज९ँ साम प्रतिष्ठित्या अन्तरिक्षायर्षयस्त्वा --- यजमानं च सादयन्तु तया ॥

अधिपत्न्यसि बृहती दिङ्मरुतस्ते देवा अधिपतयो बृहस्पतिर्हेतीनां प्रतिधर्ता त्रिणवत्रयस्त्रि९ँशौ त्वा स्तोमौ पृथिव्या९ँ श्रयतां वैश्वदेवाग्निमारुते उक्थे अव्यथयन्ती-स्तभ्नीता९ँ शाक्वररैवते सामनी प्रतिष्ठित्या अन्तरिक्षायर्षयस्त्वा --- यजमानं च सादयन्तु तया पञ्च नाकसदः प्रतिदिशमेकां मध्ये । तासु पुरीषमध्यूह्य ।

अथ पञ्चचोडाः :-

अयं पुरो हरिकेशस्सूर्यरश्मिस्तस्य रथगृत्सश्च रथौजाश्च सेनानिग्रामण्यौ पुञ्जिकस्थला च कृतस्थला चाप्सरसौ यातुधाना हेती रक्षा९ँसि प्रहेतिस्तेभ्यो नमस्ते नो मृडयन्तु ते यं द्विष्मो यश्च नो द्वेष्टि तं वो जम्भे दधामि पाप्मानं तया ॥

अयं दक्षिणा विश्वकर्मा तस्य रथस्वनश्च रथेचित्रश्च सेनानिग्रामण्यौ मेनका च सहजन्या चाप्सरसौ दङ्क्ष्णवः पशवो हेतिः पौरुषेयो वधः प्रहेतिस्तेभ्यो नमस्ते नो --- जम्भे दधामि पाप्मानं तया ॥

अयमुत्तराथ्सँय्यद्वसुस्तस्य सेनजिच्च सुषेणश्च सेनानिग्रामण्यौ विश्वाची च घृताची चाप्सरसावापो हेतिर्वातः प्रहेतिस्तेभ्यो नमस्ते नो --- जम्भे दधामि पाप्मानं तया ॥

अयमुपर्यर्वाग्वसुस्तस्य तार्क्ष्यश्चारिष्टनेमिश्च सेनानिग्रामण्यावुर्वशी च पूर्वचित्तिश्चाप्सरसौ विद्युद्धेतिरवस्फूर्जन् प्रहेतिस्तेभ्यो नमस्ते नो --- जम्भे दधामि पाप्मानं तया ॥

अयं पश्चाद्विश्वव्यचास्तस्य रथप्रोतश्चासमरथश्च सेनानिग्रामण्यौ प्रम्लोचन्ती चाऽनुम्लोचन्ती चाप्सरसौ सर्पा हेतिर्व्याघ्राः प्रहेतिस्तेभ्यो नमस्ते नो --- जम्भे दधामि पाप्मानं तया पञ्चचोडा अभ्युपदधाति द्वेष्यं मनसा ध्यायन् । पश्चात्प्राचीमुत्तमाम् ।

अथोत्तमस्वयमातृण्णाया उपधानम् :-

आयोस्त्वा सदने सादयाम्यवतश्छायायां नमस्समुद्राय नमस्समुद्रस्य चक्षसे स्वयमातृण्णामभिमृश्य अश्वेनावघ्राप्य[१५०] **परमेष्ठी त्वा सादयतु दिवः पृष्ठे व्यचस्वतीं प्रथस्वतीं विभूमतीं प्रभूमतीं परिभूमतीं दिवँय्यच्छ दिवं दृꣳह दिवं मा हिꣳसीर्विश्वस्मै प्राणायापानाय व्यानायोदानाय प्रतिष्ठायै चरित्राय सूर्यस्त्वाभि पातु मह्या स्वस्त्या छर्दिषा शन्तमेन तया देवतयाङ्गिरस्वद्ध्रुवा सीद । सुवः** तिष्ठन्नविदुषा ब्राह्मणेन सह मध्येऽग्नेरुपदधाति । सुवरिति चैतया व्याहृत्या ।

चित्तिं जुहोमि --- हविः स्वाहा स्वयमातृण्ण्यायां हुत्वापानिति । **अविद्वान् ब्राह्मणो वरं ददाति ।** ***स्वयमातृण्णायाꣳ साम गाय*** इति सम्प्रेष्यति ।

प्रोथदश्वो न यवसे अविष्यन् यदा महस्सँव्वरणाद्व्यस्थात् । आदस्य वातो अनुवाति शोचिरध स्म ते व्रजनं कृष्णमस्ति तया उत्तरेऽंसे विकर्णीम् । ते नान्याभिरिष्टकाभिरभ्युपदधाति[१५१] ।

सुवरसि सुवर्मे यच्छ दिवं यच्छ दिवो मा पाहि तया हिरण्येष्टकाम् । **द्यौरपराजितामृतेन विष्टादित्यास्ते गोप्तारस्सूर्यो वियत्तोऽस्यां तामहं प्रपद्ये सा मे शर्म च वर्म चास्तु तया** मण्डलेष्टकाम् ।

---

१५०. अश्वेनोपघ्राप्य इति पाठा० A.V. पाठश्च ।

१५१. अत्र कपर्दिभाष्यम् – 'ते त्विष्टके स्वयमातृण्णा च विकर्णी च । तयोरुपरि नान्यामिष्टकामुपदधाति । यत्रापि द्विप्रस्तारः(रा) त्रिप्रस्तारो(रा) वा चितिः तदाप्येना(ने) उपधाय तासामुपरि स्वयमातृण्णा विकर्णी चोपधीयते । अथवा अत्र वा विकर्णीं स्वयमातृण्णां चोपदध्यादिति वा करोति पक्षम्' इति ।

अत्रैकां रेतस्सिचं स्थविरस्य **स्वराड्ज्योतिरधारयत्तया । प्रजापतिस्त्वा सादयतु दिवः पृष्ठे ज्योतिष्मतीं विश्वस्मै प्राणायापानाय विश्वं ज्योतिर्यच्छ परमेष्ठी तेऽधिपतिस्तया** विश्वज्योतिषम्[१५१(अ)] ।

तपश्च तपस्यश्च शैशिरावृतू अग्नेरन्तश्लेषोऽसि --- द्यावापृथिवी शैशिरावृतू अभिकल्पमाना --- विशन्तु तया देवतयाङ्गिरस्वद्ध्रुवे सीदतम् द्वे ऋतव्ये समानतयादेवते । अवकामनूपदधाति ।

देवानां यान्यसि तया । देवानां देवयान्यसि तया द्वे संयान्यौ ।

विरम्य तूष्णीं प्रत्यवरुह्य मध्यन्दिने द्विस्तनं व्रतम् । ततः आपराह्णिकीभ्यां प्रवर्ग्योपसद्भ्यां प्रचर्य । **या ते अग्ने हराशया** इत्युपसदाहुतिः । सुब्रह्मण्यान्ते नाश्वपरिणयनम्[१५२] । औदुम्बरीस्समिधो घृते वासयति । घृतं चाप्सु । रात्रौ च द्विस्तनव्रतम् । **अग्ने त्वꣳ सु जागृहि** इत्यादि ।

॥ अथ याज्ञसेनी चितिः ॥

उपोदये ***अग्नीन् ज्योतिष्मतः कुरुत*** इत्यादि पूर्ववत् । श्वो भूते विसृष्टवाचि यजमाने पौर्वाह्णिकीभ्यां प्रवर्ग्योपसद्भ्यां प्रचर्य पञ्चम्याश्चितेश्शेषं याज्ञसेनीं चितिं चिनोति । **या ते अग्ने हराशया** इत्युपसदाहुतिः । सुब्रह्मण्यान्ते तूष्णीमारुह्य **अग्निर्मूर्धा दिवः ककुत्पतिः पृथिव्या अयम् । अपाꣳ रेताꣳसि जिन्वति तया ॥ त्वामग्ने पुष्करादध्यथर्वा निरमन्थत । मूर्ध्नो विश्वस्य वाघतस्तया ॥ अयमग्निस्सहस्रिणो वाजस्य शतिनस्पतिः । मूर्धा कवी रयीणान्तया** तिस्रो गायत्रीः पुरस्तादुपदधाति ।

भुवो यज्ञस्य रजसश्च नेता यत्रा नियुद्भिस्सचसे शिवाभिः । दिवि मूर्धानं दधिषे सुवर्षां जिह्वामग्ने चकृषे हव्यवाहन्तया ॥ अबोध्यग्निः समिधा जनानां प्रति धेनुमिवाऽऽयतीमुषासम् । यह्वा इव प्र वयामुज्जिहानाः प्र भानवः सिस्रते नाकमच्छ तया ॥ अवोचाम कवये मेध्याय वचो वन्दारु वृषभाय वृष्णे । गविष्ठिरो नमसास्तोममग्नौ दिवीव रुक्ममुर्व्यञ्चमश्रेत्तया तिस्रस्त्रिष्टुभो दक्षिणतः ।

१५१(अ). अत्र चित्यग्निप्रणयनेन प्रणीतानां तिसृणां पादेष्टकानां तृतीयामुपदधाति ।

१५२. अत्र 'सुब्रह्मण्याह्वयान्ते तु श्वेतोऽश्वः परिणीयते' इति वासुदेवकारिका ।

जनस्य गोपा अजनिष्ट जागृविरग्निः सुदख्षः सुविताय नव्यसे । घृतप्रतीको बृहता दिविस्पृशा द्युमद्विभाति भरतेभ्यः शुचिस्तया ॥ त्वामग्ने अङ्गिरसो गुहा हितमन्वविन्दञ्छिश्रियाणं वनेवने । स जायसे मथ्यमानः सहो महत्त्वामाहुः सहसस्पुत्र-मङ्गिरस्तया ॥ यज्ञस्य केतुं प्रथमं पुरोहितमग्निं नरस्त्रिषधस्थे समिन्धते । इन्द्रेण देवैस्सरथꣳ स बर्हिषि सीदन्नि होता यजथाय सुक्रतुस्तया तिस्रो जगतीः पश्चात् ।

त्वां चित्रश्रवस्तम हवन्ते विख्षु जन्तवः । शोचिष्केशं पुरुप्रियाग्ने हव्याय वोढवे तया ॥ सखायः सँव्वः सम्यञ्चमिषꣳ स्तोमं चाग्नये । वर्षिष्ठाय ख्षितीनामूर्जो नप्त्रे सहस्वते तया ॥ सꣳसमिद्युवसे वृषन्नग्ने विश्वान्यर्य आ । इडस्पदे समिध्यसे स नो वसून्या भर तया तिस्रोऽनुष्टुभ उत्तरतः ।

एना वो अग्निं नमसोर्जो नपातमा हुवे । प्रियं चेतिष्ठमरतिꣳ स्वध्वरं विश्वस्य दूतममृतन्तया ॥ स योजते अरुषो विश्वभोजसा स दुद्रवथ्स्वाहुतः । सुब्रह्मा यज्ञस्सुशमी वसूनां देवꣳ राधो जनानान्तया ॥ उदस्य शोचिरस्थादाजुह्वानस्य मीढुषः । उद्धूमासो अरुषासो दिविस्पृशः समग्निमिन्धते नरस्तया तिस्रो बृहतीर्यथावकाशम् ।

अग्ने वाजस्य गोमत ईशानस्सहसो यहो । अस्मे धेहि जातवेदो महि श्रवस्तया ॥ स इधानो वसुष्कविरग्निरीडेन्यो गिरा । रेवदस्मभ्यं पुर्वणीक दीदिहि तया ॥ ख्षपो राजन्नुत त्मनाऽग्ने वस्तोरुतोषसः । स तिग्मजम्भ रख्षसो दह प्रति तया तिस्र उष्णिहो यथावकाशम् ॥

आ ते अग्न इधीमहि द्युमन्तं देवाजरम् । यद्ध स्या ते पनीयसी समिद्दीदयति द्यवीषꣳ स्तोतृभ्य आ भर तया ॥ आ ते अग्न ऋचा हविः शुक्रस्य ज्योतिषस्पते । सुश्चन्द्र दस्म विश्पते हव्यवाट्तुभ्यꣳ हूयत इषꣳ स्तोतृभ्य आ भर तया ॥ उभे सुश्चन्द्र सर्पिषो दर्वी श्रीणीष आसनि । उतो न उत्पुपूर्या उक्थेषु शवसस्पत इषꣳ स्तोतृभ्य आ भर तया तिस्रः पङ्क्तीर्यथावकाशम् ।

अग्ने तमद्याश्वं न स्तोमैः क्रतुं न भद्रꣳ हृदि स्पृशम् । ऋध्यामा त ओहैस्तया ॥ अधा ह्यग्ने क्रतोर्भद्रस्य दख्षस्य साधोः । रथीर्ऋतस्य बृहतो बभूथ तया ॥ आभिष्टे

अद्य गीर्भिर्गृणन्तोऽग्ने दाशेम । प्र ते दिवो न स्तनयन्ति शुष्मास्तया । तिस्रोऽक्षर– पङ्क्तीर्यथावकाशम्[153] ।

अग्नि७ँ होतारं मन्ये दास्वन्तं वसोस्सूनु७ँ सहसो जातवेदसम् । विप्रं न जातवेदसम् । य ऊर्ध्वया स्वध्वरो देवो देवाच्या कृपा । घृतस्य विभ्राष्टिमनु शुक्रशोचिष आजुह्वानस्य सर्पिषस्तया अतिछन्दसं मध्ये ।

अग्ने त्वं नो अन्तम उत त्राता शिवो भव वरूथ्यस्तया ॥ तं त्वा शोचिष्ठ दीदिवस्सुम्नाय नूनमीमहे सखिभ्यस्तया ॥ वसुरग्निर्वसुश्रवा अच्छा नक्षि द्युमत्तमो रयिं दास्तया तिस्रो द्विपदा अन्ततः[154] ।

इन्द्राग्निभ्यां त्वा सयुजा युजा युनज्मि तया । आघाराभ्यां त्वा सयुजा युजा युनज्मि तया । तेजसा त्वा सयुजा युजा युनज्मि तया । वर्चसा त्वा सयुजा युजा युनज्मितया । उक्थेभिस्त्वा सयुजा युजा युनज्मि तया । स्तोमेभिस्त्वा सयुजा युजा युनज्मि तया । छन्दोभिस्त्वा सयुजा युजा युनज्मि तया । रय्यै पोषाय सजातानां मध्यमस्थेयाय मया त्वा सयुजा युजा युनज्मि तया अष्टौ सयुजः ॥

रोहितेषु त्वा जीमूतेषु सादयामि तया । अरुणेषु त्वा जीमूतेषु सादयामि तया । कृष्णेषु त्वा जीमूतेषु सादयामि तया । नीलेषु त्वा जीमूतेषु सादयामि तया । सितेषु त्वा जीमूतेषु सादयामि तया पञ्च जीमूताः ॥

अम्बा नामासि प्रजापतिना त्वा विश्वाभिर्धीभिरुप दधामि तया ॥ दुला नामासि प्रजापतिना त्वा विश्वाभिर्धीभिरुप दधामि तया ॥ नितत्निर्नामासि प्रजापतिना त्वा विश्वाभिर्धीभिरुप दधामि तया ॥ अभ्रयन्ती नामासि प्रजापतिना त्वा विश्वाभिर्धीभिरुप

---

१५३. **एभिर्नो अर्कैर्भवा नो अर्वाङ्सुवर्न ज्योतिः । अग्ने विश्वेभिः सुमना अनीकैस्तया** इति चतुर्थी अक्षरपङ्क्तिर्विकल्प्यते ।

१५४. उपधानकाले एतेषां मन्त्राणां पाठविषये भूमिका द्रष्टव्या । कपर्दिभाष्यानुसारेण वासुदेवदीक्षितकारिकानुसारेण च एवं अर्धर्चे विरामो न भवति ।

दधामि तया ॥ मेघयन्ती नामासि प्रजापतिना त्वा विश्वाभिर्धीभिरुप दधामि तया ॥ वर्षयन्ती नामासि प्रजापतिना त्वा विश्वाभिर्धीभिरुप दधामि तया ॥ चुपुणीका नामासि प्रजापतिना त्वा विश्वाभिर्धीभिरुप दधामि तया सप्त कृत्तिकाः ॥

पुरोवातसनिरसि तया । अभ्रसनिरसि तया । विद्युथ्सनिरसि तया । स्तनयित्नुसनिरसि तया । वृष्टिसनिरसि तया पञ्च वृष्टिसनीरनुपरिहारम् । प्रतिदिशमेकां मध्ये ॥

सलिलाय त्वा तया । सर्णीकाया त्वा तया । सतीकाय त्वा तया । केताय त्वा तया । प्रचेतसे त्वा तया । विवस्वते त्वा तया । दिवस्त्वा ज्योतिषे तया । आदित्येभ्यस्त्वा तया अष्टावादित्येष्टकाः ॥

ऋचे त्वा तया । रुचे त्वा तया । द्युते त्वा तया । भासे त्वा तया । ज्योतिषे त्वा तया पञ्च घृतेष्टका अनुपरिहारम् ॥

यशोदां त्वा यशसि सादयामि तेनर्षिणा तेन ब्रह्मणा तया । तेजोदां त्वा तेजसि सादयामि तेनर्षिणा तेन ब्रह्मणा तया । पयोदां त्वा पयसि सादयामि तेनर्षिणा तेन ब्रह्मणा तया । वर्चोदां त्वा वर्चसि सादयामि तेनर्षिणा तेन ब्रह्मणा तया । द्रविणोदां त्वा दविणे सादयामि तेनर्षिणा तेन ब्रह्मणा तया पञ्च यशोदाः[१५५] ॥

भूयस्कृदसि तया । वरिवस्कृदसि तया । प्राच्यसि तया । ऊर्ध्वासि तया । अन्तरिख्षसदस्यन्तरिख्षे सीद तया पञ्च भूयस्कृतः ॥

अप्सुषदसि तया । श्येनसदसि तया । गृध्रसदसि तया । सुपर्णसदसि तया । नाकसदसि तया । पञ्चाग्निरूपाणि ॥

पृथिव्यास्त्वा द्रविणे सादयामि तया । अन्तरिख्षस्य त्वा द्रविणे सादयामि तया ।

---

१५५. उज्वलकारिकारीत्या अष्टोत्तरशतद्वये पञ्चमे प्रस्तारे यशोदानन्तरं ऋषभः प्राजापत्या पञ्चाज्यान्यः । पृथिव्यै त्वा, अन्तरिक्षाय त्वा, दिवे त्वा इति तिस्रो लोकेष्टकाः । अग्नये त्वा पवमानाय, अग्नये त्वा पावकाय, अग्नये त्वा शुचये इति तिस्रः पावमान्यः । ऋचा त्वा छन्दसा सादयामि, वषट्कारेण त्वा छन्दसा सादयामि, हिङ्कारेण त्वा छन्दसा सादयामि, प्रस्तावेन त्वा छन्दसा सादयामि, प्रतिहारेण त्वा छन्दसा सादयामि, उद्गीथेन त्वा छन्दसा सादयामि, निधनेन त्वा छन्दसा सादयामि इति सप्त छन्दस्याः । चतस्रो राष्ट्रभृतः । अवशिष्टाः एकोनत्रिंशत् लोकंपृणा इत्युपधानक्रमः ।

दिवस्त्वा द्रविणे सादयमि तया । दिशां त्वा द्रविणे सादयमि तया । द्रविणोदां त्वा द्रविणे सादयमि तया पञ्च द्रविणोदाः ॥

प्राणं मे पाहि तया । अपानं मे पाहि तया । व्यानं मे पाहि तया । आयुर्मे पाहि तया । विश्वायुर्मे पाहि तया । सर्वायुर्मे पाहि तया षडायुष्याः ॥

अग्ने यत्ते पर७ँ हृन्नाम तावेहि स७ँरभावहै पाञ्चजन्येष्वप्येध्यग्ने तया अग्नेर्हृदयम् ॥

यावास्तया । अयावास्तया । एवास्तया । ऊमास्तया । सब्दस्तया । सगरस्तया । सुमेकस्तया सप्तर्तव्याः । एतासु ऋतव्यासु न अवकामनूपदधाति ॥

विश्वकर्मा दिशां पतिस्स नः पशून्पातु सोऽस्मान् पातु तस्मै नमस्तया । प्रजापतिर्दिशां पतिस्स नः पशून्पातु सोऽस्मान् पातु तस्मै नमस्तया । रुद्रो दिशां पतिस्स नः पशून्पातु सोऽस्मान् पातु तस्मै नमस्तया । वरुणो दिशां पतिस्स नः पशून्पातु सोऽस्मान् पातु तस्मै नमस्तया । अग्निर्दिशां पतिस्स नः पशून्पातु सोऽस्मान् पातु तस्मै नमस्तया पञ्च हिरण्येष्टकाः प्रतिदिशमेकां मध्ये ॥

प्राणाय त्वा चक्षुषे त्वा तया । व्यानाय त्वा चक्षुषे त्वा तया । अपानाय त्वा चक्षुषे त्वा तया । वाचे त्वा चक्षुषे त्वा तया चतस्रः स्वयमातृण्णाः प्रतिदिशम् ॥

त्वामग्ने वृषभं चेकितानं पुनर्युवानं जनयन्नुपागाम् । अस्थूरि णो गार्हपत्यानि सन्तु तिग्मेन नो ब्रह्मणा स७ँ शिशाधि तया ऋषभेष्टकामुपदधाय ।

संवथ्सरस्य प्रतिमां यां त्वा रात्र्युपासते । प्रजा७ँ सुवीराङ्कृत्वा विश्वमायुर्व्यश्नवत्तया प्राजापत्याम् ।

शतायुधाय शतवीर्याय शतोतयेऽभिमातिषाहे । शतं यो नश्शरदो अजीतानिन्द्रो नेषदति दुरितानि विश्वा तया ॥ ये चत्वारः पथयो देवयाना अन्तरा द्यावापृथिवी वियन्ति । तेषां यो अज्यानिमजीतिमावहात्तस्मै नो देवाः परि दत्तेह सर्वे तया ॥ ग्रीष्मो हेमन्त उत नो वसन्तश्शरद्वर्षास्सुवितन्नो अस्तु । तेषामृतूना७ँ शतशारदानान्निवात एषामभये स्याम तया ॥ इदुवथ्सराय परिवथ्सराय सँव्वथ्सराय कृणुता बृहन्नमः ।

तेषां वय७ँ सुमतौ यज्ञियानां ज्योगजीता अहतास्स्याम तया ॥ भद्रान्नश्श्रेयस्समनैष्ट देवास्त्वयाऽवसेन समशीमहि त्वा । स नो मयोभूः पितो आ विशस्व शन्तोकाय तनुवे स्योनस्तया पञ्चाज्यानीः प्रतिदिशमेकां मध्ये ॥

इन्द्रस्य वज्रोऽसि वार्त्रघ्नस्तनूपा नः प्रतिस्पशः । यो नः पुरस्स्तादघायुरभिदासत्येत७ँ सोऽश्मानमृच्छतु तया ॥ इन्द्रस्य वज्रोऽसि वार्त्रघ्नस्तनूपा नः प्रतिस्पशः । यो नो दख्षिणतोऽघायुरभिदासत्येत७ँ सोऽश्मानमृच्छतु तया ॥ इन्द्रस्य वज्रोऽसि वार्त्रघ्नस्तनूपा नः प्रतिस्पशः । यो नः पश्चादघायुरभिदासत्येत७ँ सोऽश्मानमृच्छतु तया ॥ इन्द्रस्य वज्रोऽसि वार्त्रघ्नस्तनूपा नः प्रतिस्पशः । यो न उत्तरतोऽघायुरभिदासत्येत७ँ सोऽश्मानमृच्छतु तया चतस्रो वज्रिणीः प्रतिदिशमश्मनः इषुहस्त उपदधाति ।

इन्द्रस्य वज्रोऽसि वार्त्रघ्नस्तनूपा नः प्रतिस्पशः । यो न उपरिष्टादघायुरभिदासत्येत७ँ सोऽश्मानमृच्छतु तया मध्ये पञ्चमीमेके समामनन्ति ।

अग्ने यशस्विन् यशसेममर्पयेन्द्रावतीमपचितीमिहाऽऽवह । अयं मूर्धा परमेष्ठी सुवर्चास्समानानामुत्तमश्लोको अस्तु तया ॥ भद्रं पश्यन्त उप सेदुरग्रे तपो दीख्षामृषयस्सुवर्विदः । ततः ख्षत्रं बलमोजश्च जातन्तदस्मै देवा अभि सन्नमन्तु तया ॥ धाता विधाता परमोत सन्दृक्प्रजापतिः परमेष्ठी विराजा । स्तोमाश्छन्दा७ँसि निविदो म आहुरेतस्मै राष्ट्रमभिसन्नमाम तया ॥ अभ्यावर्तध्वमुपमेत साकमय७ँ शास्ताऽधिपतिर्वो अस्तु । अस्य विज्ञानमनु स७ँरभध्वमिमं पश्चादनु जीवाथ सर्वे तया चतस्रो राष्ट्रभृतः पुरस्तादुपधाय हिरण्येष्टकाभिः सर्वतोमुखमुपदधाति ।

अग्निर्मूर्धा दिवः ककुत्पतिः पृथिव्या अयम् । अपा७ँ रेता७ँसि जिन्वति तया गायत्रीं पुरस्तादुपदधाति ॥

भुवो यज्ञस्य रजसश्च नेता यत्रा नियुद्भिस्सचसे शिवाभिः । दिवि मूर्धानं दधिषे सुवर्षां जिह्वामग्ने चकृषे हव्यवाहं तया त्रिष्टुभम् दक्षिणे पक्षे ॥

जनस्य गोपा अजनिष्ट जागृविरग्निस्सुदख्षः सुविताय नव्यसे । घृतप्रतीको बृहता दिविस्पृशा द्युमद्वि भाति भरतेभ्यः शुचिस्तया जगतीम् पुच्छे ॥

त्वां चित्रश्रवस्तम हवन्ते विख्षु जन्तवः । शोचिष्केशं पुरुप्रियाग्ने हव्याय वोढवे तया अनुष्टुभमुत्तरे पक्षे ॥

अग्ने तमद्याश्वं न स्तोमैः क्रतुं न भद्र७ँ हृदिस्पृशम् । ऋध्यामा त ओहैस्तया पङ्क्तिं मध्ये ॥

लोकम्पृण --- असीषदन् ॥ **ता अस्य सददोहसः --- दिवस्तया** । इति द्वाभ्यां अवशिष्टमेकविंशत्या[१५६] पञ्चभिर्वा लोकम्पृणाभिः प्रच्छादयति ॥

ततश्चितौ हिरण्यं निधाय । **चित्तिमचित्तिं --- रास्वादितिमुरुष्य** चितिक्लृप्त्याभिमृशति ।

यत्ते चितं यदु चितं, यास्ते अग्ने, चित्तिमचित्तिं, *वयमग्ने धनवन्तः, रायस्पोषं नो धेहि जातवेदः, ईशानं त्वा शुश्रुमो, दुहां ते द्यौः,* यो रुद्रो अग्नौ---नमो अस्तु देवाः एताभिः स्वयञ्चित्याभिमृशति ।

उत्तरतः कृष्णोऽश्वस्तिष्ठति । श्यावो वा । तमालभ्य चात्वालात् पुरीषमाहृत्य । **पृष्टो दिवि --- पातु नक्तम्** वैश्वानर्यर्चा चितावनुव्यूहति । सा चितिर्भवति । **वाङ्म आसन्नसोः --- मा मा हि७ँसीः** प्रत्यवरोहन् जपति ।

जुह्वां सकृत् सकृत् गृहीत्वा[१५७] ***यो अप्स्वन्तरग्निः, यस्सोमे अन्तः, पृष्टो दिवि, येनेन्द्रस्य रथं, य७ँहुतादमग्निं,*** **उक्षान्नाय वशान्नाय** इति षडाहुतीर्हुत्वा । **अग्ने भूरीणि तव --- पृष्टबन्धो स्वाहा** आग्नेय्या धामच्छदा चितिं चितिमुपधायाभिजुहोति ॥

अग्निर्हि वाजिनं विशे ददाति विश्वचर्षणिः । अग्नी राये स्वाभुवं सप्रीतो याति वार्यमिष७ँ स्तोतृभ्य आभर आग्नेय्या पङ्क्त्या पञ्चमीं चितिमभिमृशति ॥

तदानीमेव आपराह्णिकीभ्यां प्रवर्ग्योपसद्भ्यां प्रचरन्ति । प्रवर्ग्येण प्रचरिष्यन्त इत्यादि समानम् । तूष्णीं समिधमाधाय **भूः स्वाहा** इत्यग्निहोत्रहोमः । **या ते अग्ने हराशया** इत्युपसदाहुतिः ।

---

१५६. पञ्चम्यां चितौ अस्मिन् द्विशते प्रस्तारे यशोदान्ते ऋषभः, प्राजापत्या, पञ्चाज्यान्यः, तिस्रो लोकेष्टकाः, तिस्रः पावमान्यः, सप्त छन्दस्याः, चतस्रो राष्ट्रभृतः इत्येवंक्रमेण उपधाने अवशिष्टा एकविंशतिर्लोकम्पृणास्सम्पद्यन्ते।

१५७. जुह्वां षड्गृहीतं गृहीत्वा इति पाठा० ।

॥ अथ सञ्चितकर्म ॥

सुब्रह्मण्यान्ते श्वेतमश्वं परिणीय **अग्ने युक्ष्वा हि ये तवाश्वासो देव साधवः । अरं वहन्त्याशवः ॥ युक्ष्वा हि देवहूतमाँ॒ अश्वाँ॒ अग्ने रथीरिव । नि होता पूर्व्यस्सदः** द्वाभ्यां सञ्चितमग्निमभिमृशति । ब्रह्मा दक्षिणत आस्ते ।

वसवस्त्वा रुद्रैः पुरस्तात्पान्तु पुरस्तात् प्रत्यङ्मुखः । न प्राचीनावीती[१५८] **पितरस्त्वा यमराजानः पितृभिर्दखिषणतः पान्तु** दक्षिणत उदङ्मुखः । प्रसव्यमेत्य **आदित्यास्त्वा विश्वैर्देवैः पश्चात्पान्तु** पश्चात् प्राङ्मुखः । **द्युतानस्त्वा मारुतो मरुद्भिरुत्तरतः पातु** उत्तरतो दक्षिणामुखः । **देवास्त्वेन्द्रज्येष्ठा वरुणराजानोऽधस्ताच्चोपरिष्टाच्च पान्तु** एतैर्यथालिङ्गं सञ्चितमग्निमाज्येन प्रोक्षति । मध्य उत्तमेन प्राङ्मुखः ।

सहस्रस्य प्रमा असि । सहस्रस्य प्रतिमा असि । सहस्रस्य विमा असि । सहस्रस्योन्मा असि । साहस्रोऽसि सहस्राय त्वा सहस्रेण हिरण्यशल्कैः ऊर्ध्वस्तिष्ठन् प्रतिदिशमग्निं प्रोक्षति द्वाभ्यां द्वाभ्यां शताभ्याम् । मध्य उत्तमाभ्यां प्राङ्मुखः ॥

इमा मे अग्न इष्टका धेनवस्सन्त्वेका च शतं च सहस्रं चायुतं च नियुतं च प्रयुतं चार्बुदं च न्यर्बुदं च समुद्रश्च मध्यं चान्तश्च परार्धश्चेमा मे अग्न इष्टका धेनवस्सन्तु षष्टिस्सहस्रमयुतमक्षीयमाणा ऋतस्थास्स्थर्तावृधो घृतश्चुतो मधुश्चुत ऊर्जस्वतीस्स्वधाविनीस्ता मे अग्न इष्टका धेनवस्सन्तु विराजो नाम कामदुघा अमुत्रामुष्मिँल्लोके इष्टका धेनूः यजमानः कुरुते ॥

अध्वर्युः – **अग्निरसि वैश्वानरोऽसि । सँव्वत्सरोऽसि परिवत्सरोऽसि । इदावत्सरोऽसीदुवत्सरोऽसि । इद्वत्सरोऽसि वत्सरोऽसि । तस्य ते वसन्तश्शिरः । ग्रीष्मो दक्षिणः पक्षः । वर्षाः पुच्छम् । शरदुत्तरः पक्षः । हेमन्तो मध्यम् । पूर्वपक्षाश्चितयः । अपरपक्षाः पुरीषम् । अहोरात्राणीष्टकाः । तस्य ते मासाश्चार्धमासाश्च कल्पन्ताम् । ऋतवस्ते कल्पन्ताम् । सँव्वत्सरस्ते कल्पताम् । अहोरात्राणि ते कल्पन्ताम् । एति**

---

१५८. अग्निसंस्कारत्वात्, अपितृकर्मत्वात् ।

प्रेति वीति समित्युदिति । प्रजापतिस्त्वा सादायतु । तया देवतयाङ्गिरस्वद्ध्रुवस्सीद । ऐडिक्या चित्या अध्वर्युरग्निमभिमृश्य । शतरुद्रीयं जुहोति ।

शतरुद्रीयहोमः :-

जर्तिलयवाग्वा गवीधुकयवाग्वा वा जर्तिलैर्गवीधुकसक्तुभिः कुसयसर्पिषाऽजाक्षीरेण मृगीक्षीरेण वा जुहुयात् अर्कपर्णेन उदङ्मुखस्तिष्ठन् । उत्तरस्य पक्षस्य उत्तरापरस्यां स्रक्त्यां विकर्ण्यां स्वयमातृण्णायां अनुपरिचारं वा । नमस्ते रुद्रमन्यव इत्येताननुवाकान् त्रैधं विभज्य[१५९] उक्तक्षीराणामन्यतमेन माहिषक्षीरेण वा उत्तरपक्षस्य अपरकोणसमीपे लौकिकेष्टकाभिः अग्निसंमितं पीठं कृत्वा तत्रस्थ एव दक्षिणेनार्कपर्णेन सन्ततया धारया शतरुद्रियानुवाकानां तृतीयेन **नमस्ते रुद्रमन्यव** इत्यारभ्य **नमस्सभाभ्यः सभापतिभ्यश्च वो नमः स्वाहा** इत्यन्तं जानुदघ्ने धारयमाणो जुहोति । रुद्रेभ्य इदम्[१६०] । स्वयमातृण्णायां चेद्दीर्घवंशान्तर्गतपर्वस्थलानि छित्वा तदन्तेऽर्कपर्णं बध्वा वंशे पय आसिच्य तेन सन्ततया धारया जुहुयात् । **नमो अश्वेभ्योऽश्वपतिभ्यश्च वो नम** इत्यारभ्य **नमः पार्याय चावार्याय च स्वाहा** नाभिदघ्ने जुहोति । रुद्रेभ्य इदम् ॥ **नमः प्रतरणाय च** इत्यारभ्य **य एतावन्तश्च --- तन्मसि स्वाहा** आस्यदघ्ने जुहोति । रुद्रेभ्य इदम् ॥

अस्मिन् महत्यादिषु चाष्टकेषु तेषां सहस्रेत्यनुषङ्ग इष्टः ।

नमो रुद्रेभ्यो ये पृथिव्यां येषामन्नमिषवस्तेभ्यो दश प्राचीर्दश दक्षिणा दश प्रतीचीर्दशोदीचीर्दशोर्ध्वास्तेभ्यो नमस्ते नो मृडयन्तु ते यं द्विष्मो यश्च नो द्वेष्टि तँव्वो जम्भे दधामि स्वाहा जानुदघ्ने जुहोति । रुद्रेभ्य इदम् ॥

नमो रुद्रेभ्यो येऽन्तरिक्षे येषां वात इषवस्तेभ्यो दश प्राचीर्दश दक्षिणा दश प्रतीचीर्दशोदीचीर्दशोर्ध्वास्तेभ्यो नमस्ते नो मृडयन्तु ते यं द्विष्मो यश्च नो द्वेष्टि तँव्वो जम्भे दधामि स्वाहा नाभिदघ्ने जुहोति । रुद्रेभ्य इदम् ॥

नमो रुद्रेभ्यो ये दिवि येषां वर्षमिषवस्तेभ्यो दश प्राचीर्दश दक्षिणा दश प्रतीचीर्दशोदीचीर्दशोर्ध्वास्तेभ्यो नमस्ते नो मृडयन्तु ते यं द्विष्मो यश्च नो द्वेष्टि

---

१५९. त्रेधाविभागस्य होमविषये भूमिका द्रष्टव्या ।

१६०. शतरुद्रेभ्य इदं इति पाठा० ।

तँव्वो जम्भे दधामि स्वाहा आस्यदघ्ने जुहोति[१६१]। रुद्रेभ्य इदम् ॥ नमो रुद्रेभ्यः इत्येतानेव यजमानं वाचयति ।

[१६२]अपि वा **नमस्ते रुद्रमन्यव** इत्युपक्रम्य **नमस्तक्षभ्यस्स्वाहा** जानुदघ्ने धारयमाणो जुहोति । रुद्रेभ्य इदम् । **रथकारेभ्यश्च वो नम** इत्युपक्रम्य **नमस्स्वायुधाय च स्वाहा** नाभिदघ्ने धारयमाणो जुहोति । रुद्रेभ्य इदम् । **सुधन्वने च** इत्युपक्रम्य **पराचीना मुखा कृधि स्वाहा** आस्यदघ्ने धारयमाणो जुहोति । रुद्रेभ्य इदमिति सर्वत्र त्यागः ।

---

१६१. अयमेव क्रमः सर्वेषु मातृकाग्रन्थेषु दृश्यते । किं तु कपर्दिभाष्ये 'आस्यदघ्ने च उत्तरास्तिस्रः' इति । प्राचीनकारिकासु 'क्रमेण सर्वा अपि चास्यदघ्ने' इति । आन्ध्रपाठे च 'आस्यदघ्ने एव तिस्र आहुतीः' इति । पक्षद्वयस्याप्याधारं नैवोपलभामहे । प्रयोगस्य भाष्यादिभिर्विप्रतिपत्तेः कारणं न जानीमः । विमृशन्तु सूक्ष्मदृष्टयो विद्वांसः । K.D.M. पाठे एतदनन्तरं 'एतानेव विपरीतान् प्रत्यवरोहान् जपति जुहोतीत्येके' इति विद्यते ।

१६२. अपि वा प्रथमादिति पक्षमाश्रित्योत्तरस्य पक्षस्योत्तरापरस्यां स्रक्त्यामिति च पक्षमाश्रित्याजाक्षीरपक्षमाश्रित्य च प्रयोगः । अग्निसंमितां वेदिमुद्धत्य तस्यामर्कपर्णं धारयन्नध्वर्युरुदङ्मुखस्तिष्ठति । अन्यः कश्चित्तस्मिन्नर्कपुटे अजाक्षीरमासिञ्चन् तिष्ठति । यदा धाराग्निं प्राप्नोति तत्प्रतिपद्यते । जानुदघ्ने धारयन् नमस्ते रुद्रमन्यव इति प्रथमं द्वितीयं तृतीयं चानुवाकं निगद्य चतुर्थेनुवाके नमस्तक्षभ्य इत्युक्त्वा स्वाहाकरोति । रुद्रेभ्य इदम् । अथ नाभिदघ्ने धारयन् रथकारेभ्यश्च व इति शिष्टमनुवाकं पञ्चमं षष्ठं चानुवाकं सप्तमानुवाके नमस्स्वायुधायेत्यन्तमुक्त्वा स्वाहाकरोति । रुद्रेभ्य इदम् । अथ मुखदघ्ने धारयन् सुधन्वने चेत्यादि शिष्टमनुवाकमष्टमं नवमं दशमं चानुवाकं निगद्य पराचीना मुखा कृधीत्यन्ते स्वाहाकरोति । रुद्रेभ्य इदम् । सहस्राणि सहस्रशो --- तन्मसि स्वाहा ॥ रुद्रेभ्य इदम् । अस्मिन्महत्यर्णवे --- तन्मसि स्वाहा ॥ रुद्रेभ्य इदम् । नीलग्रीवाः शितिकण्ठाः --- तन्मसि स्वाहा ॥ रुद्रेभ्य इदम् । नीलग्रीवाः शितिकण्ठा --- तन्मसि स्वाहा ॥ रुद्रेभ्य इदम् । ये वृक्षेषु --- तन्मसि स्वाहा ॥ रुद्रेभ्य इदम् । ये भूतानामधिपतयो --- तन्मसि स्वाहा ॥ रुद्रेभ्य इदम् । ये अन्नेषु --- तन्मसि स्वाहा ॥ रुद्रेभ्य इदम् । ये पथां --- तन्मसि स्वाहा ॥ रुद्रेभ्य इदम् । ये तीर्थानि --- तन्मसि स्वाहा ॥ रुद्रेभ्य इदम् । य एतावन्तश्च --- तन्मसि स्वाहा ॥ रुद्रेभ्य इदम् । इति मुखदघ्ने धारयन्नेव दशावतानान् हुत्वा अथान्वारोहान् जुहोति । नमो रुद्रेभ्यो ये पृथिव्यां येषामन्नमिषवस्तेभ्यो --- दधामि स्वाहा जानुदघ्ने जुहोति । रुद्रेभ्य इदम् ॥ नमो रुद्रेभ्यो येऽन्तरिक्षे येषां वात इषवस्तेभ्यो --- दधामि स्वाहा नाभिदघ्ने जुहोति । रुद्रेभ्य इदम् ॥ नमो रुद्रेभ्यो ये दिवि येषां वर्षमिषवस्तेभ्यो --- दधामि स्वाहा आस्यदघ्ने जुहोति । रुद्रेभ्य इदम् ॥ आरोहान् हुत्वा एतानेव यजमानं वाचयित्वा एतानेव विपरीतान् प्रत्यवरोहान् जुहोति । नमो रुद्रेभ्यो ये दिवि --- दधामि स्वाहा इत्यास्यदघ्ने । नमो रुद्रेभ्यो येऽन्तरिक्षे --- दधामि स्वाहा इति नाभिदघ्ने । नमो रुद्रेभ्यो ये पृथिव्यां --- दधामि स्वाहा इति जानुदघ्ने । असञ्चरे पशूनामर्कपर्णमुदस्यति । अप उपस्पृश्य इति M.M पाठः ।

सहस्राणि सहस्रशो ये रुद्रा अधि भूम्याम् । तेषा७्ँ सहस्रयोजनेऽव धन्वानि तन्मसि स्वाहा ॥

अस्मिन्महत्यर्णवेऽन्तरिख्खे भवा अधि । तेषा७्ँ सहस्रयोजनेऽव धन्वानि तन्मसि स्वाहा ॥

नीलग्रीवाः शितिकण्ठाः शर्वा अधः, ख्खमाचराः । तेषा७्ँ सहस्रयोजनेऽव धन्वानि तन्मसि स्वाहा ॥

नीलग्रीवाः शितिकण्ठा दिव७्ँ रुद्रा उपश्रिताः । तेषा७्ँ सहस्रयोजनेऽव धन्वानि तन्मसि स्वाहा ॥

ये वृख्खेषु सस्पिञ्जरा नीलग्रीवा विलोहिताः । तेषा७्ँ सहस्रयोजनेऽव धन्वानि तन्मसि स्वाहा ॥

ये भूतानामधिपतयो विशिखासः कपर्दिनः । तेषा७्ँ सहस्रयोजनेऽव धन्वानि तन्मसि स्वाहा ॥

ये अन्नेषु विविध्यन्ति पात्रेषु पिबतो जनान् । तेषा७्ँ सहस्रयोजनेऽव धन्वानि तन्मसि स्वाहा ॥

ये पथां पथिरख्खय ऐलबृदा यव्युधः । तेषा७्ँ सहस्रयोजनेऽव धन्वानि तन्मसि स्वाहा ॥

ये तीर्थानि प्रचरन्ति सृकावन्तो निषङ्गिणः । तेषा७्ँ सहस्रयोजनेऽव धन्वानि तन्मसि स्वाहा ॥

य एतावन्तश्च भूया७्ँसश्च दिशो रुद्रा वितस्थिरे । तेषा७्ँ सहस्रयोजनेऽव धन्वानि तन्मसि स्वाहा ॥ इत्येताभिः दशभिः प्रतिमन्त्रं जुहोति ।

नमो रुद्रेभ्य इति तिसृभिः पूर्ववदन्वारोहं जुहोति । **नमो रुद्रेभ्यो ये पृथिव्यां --- दधामि स्वाहा** इति जानुदघ्ने । **नमो रुद्रेभ्यो येऽन्तरिक्षे --- दधामि स्वाहा** इति नाभिदघ्ने । **नमो रुद्रेभ्यो ये दिवि --- दधामि स्वाहा** इत्यास्यदघ्ने । आरोहान् हुत्वा एतानेव यजमानं वाचयित्वा एतानेव विपरीतान् प्रत्यवरोहान् जुहोति ।

नमो रुद्रेभ्यो ये दिवि --- दधामि स्वाहा इत्यास्यदघ्ने । **नमो रुद्रेभ्यो येऽन्तरिक्षे**

--- दधामि स्वाहा इति नाभिदघ्ने । **नमो रुद्रेभ्यो ये पृथिव्यां --- दधामि स्वाहा** इति जानुदघ्ने । असञ्चरे पशूनामर्कपर्णमुदस्यति । अप उपस्पृश्य । **यो रुद्रो अग्नौ यो अप्सु य ओषधीषु यो रुद्रो विश्वा भुवनाविवेश तस्मै रुद्राय नमो अस्तु** रौद्रं गावीधुकं चरुं लौकिकेऽग्नौ श्रपयित्वा एतेन यजुषा यस्यामिष्टकायां शतरुद्रीयं जुहोति तस्यां प्रतिष्ठापयति ।

तिसृधन्वमयाचितं यजमानो ब्राह्मणाय दत्वा अध्वर्यवे[१६३] । **यत्ते रुद्र पुरो धनुस्तद्वातो अनु वातु ते तस्मै ते रुद्र सँव्वत्सरेण नमस्करोमि** इति पुरस्तात्प्रत्यङ्मुखः । **यत्ते रुद्र दखिणा धनुस्तद्वातो अनु वातु ते तस्मै ते रुद्र परिवथ्सरेण नमस्करोमि** इति दक्षिणत उदङ्मुखः। **यत्ते रुद्र पश्चाद्धनुस्तद्वातो अनु वातु ते तस्मै ते रुद्रेदावत्सरेण नमस्करोमि** इति पश्चात्प्राङ्मुखः। **यत्ते रुद्रोत्तराद्धनुस्तद्वातो अनु वातु ते तस्मै ते रुद्रेदुवथ्सरेण नमस्करोमि** इति उत्तरतो दक्षिणामुखः। **यत्ते रुद्रोपरि धनुस्तद्वातो अनु वातु ते तस्मै ते रुद्र वत्सरेण नमस्करोमि** इति पश्चात्प्राङ्मुख उपरिष्टात् । एवमेतैः सञ्चितमग्निं यथालिङ्गमुपतिष्ठते ।

उदकुम्भमादायाध्वर्युः । **अश्मन्नूर्जं पर्वते शिश्रियाणां वाते पर्जन्ये वरुणस्य शुष्मे । अद्भ्य ओषधीभ्यो वनस्पतिभ्योऽधि सम्भृतां तां न इषमूर्जं धत्त मरुतः स७ँरराणाः** त्रिः प्रदक्षिणमग्निं परिषिञ्चन् पर्येति । निधाय कुम्भं पुनरादाय । **अश्म७ँस्ते क्षुत्पाप्मानं**[१६४] **ते शुगृच्छतु यं द्विष्मः** त्रिरपरिषिञ्चन् प्रतिपर्येति[१६५] । अवकां वेतसशाखां मण्डूकं च दीर्घवंशे प्रबध्य **समुद्रस्य त्वाऽवाकयाऽग्ने परि व्ययामसि । पावको अस्मभ्य७ँ शिवो भव ॥ हिमस्य त्वा जरायुणाऽग्ने परि व्ययामसि । पावको अस्मभ्य७ँ शिवो भव ॥ उप ज्मन्नुपवेतसेऽवत्तरं नदीष्वा । अग्ने पित्तमपामसि ॥ मण्डूकि ताभिरा गहि सेमं नो यज्ञम् । पावकवर्ण७ँ शिवं कृधि ॥ पावक आ चितयन्त्या कृपा । क्षामन्रुरुच उषसो न भानुना ॥ तूर्वन्न यामन्नेतशस्य नू रण आ यो घृणे । न ततृषाणो अजरः ॥ अग्ने पावक रोचिषा मन्द्रया देव जिह्वया । आ देवान् वक्षि यक्षि च ॥ स नः पावक**

---

१६३. तिसृभिरिषुभिर्युक्तमेकं धनुः अयाचितमपि ब्राह्मणाय दद्यात् इति सायणभाष्यम् ॥ 'अध्वर्यो तिसृधन्वं ते ददामि । अध्वर्युः उत्तानस्त्वाङ्गीरसः प्रतिगृह्णातु इति प्रतिगृह्णाति' इति पाठा० ।

१६४ क्षुदमुं इति पाठा० ।

१६५. निधाय कुम्भं अश्म७ँस्ते --- यं द्विष्मः त्रिरपरिषिञ्चन् प्रतिपर्येति इति पाठा० ।

दीदिवोऽग्ने देवा७ँ इहाऽऽवह । उप यज्ञ७ँ हविश्च नः सप्तभिरष्टाभिर्वा अग्निं विकर्षति । विकर्षन्नेवानुगमयित्वा मण्डूकस्य प्राणान् सर्वान् सँल्लोभ्योत्करे उदस्याप उपस्पृश्य पृष्ठैरुपतिष्ठते ।

गायत्रेण पुरस्तादुपतिष्ठते । बृहद्रथन्तराभ्यां पक्षौ । ऋतुस्थायज्ञायज्ञियेन पुच्छम् । दक्षिणस्यां श्रोण्यां वारवन्तीयेन । उत्तरस्यां वामदेव्येन । अपिपक्षे प्रजापतेः सामानृचं[१६६] गायति । अथवा प्रस्तोता स्वाधीतेन[१६७] अग्न आयूंषीत्यादि । **स्तुतस्य स्तुतमसि --- पतयो रयीणां** अध्वर्युर्यजमानं वाचयति । अथाग्निं सञ्चितमनुगीतमनुशंसेत्[१६८] । यजमानः पश्चादग्निपुच्छस्योपविश्य[१६९] अभिहिङ्कृत्य ***हिं भर्भुवस्सुवरो३म् अग्निरस्मि जन्मना जातवेदा घृतं मे चक्षुरमृतं म आसन् अर्कस्त्रिधातू रजसो विमानोऽजस्रो घर्मो हविरस्मि नामो३म्*** इति त्रिः मध्यमया वाचा । **शस्त्रस्य शस्त्रमसि --- पतयो रयीणां** अध्वर्युर्यजमानं वाचयति । अग्ने युक्ष्वाहीत्याद्येतदन्तं ब्रह्मा दक्षिणत आस्ते । एतत्संचितं कर्म ॥

अत्र प्रवर्ग्यमुद्वासयति । प्रवर्ग्यमुद्वासयिष्यन्नित्यादि इममूषुत्यमस्मभ्यमित्यन्तम् ।

जुह्वां पञ्चगृहीतं गृहीत्वा । **स्वयं कृण्वानस्सुगमप्रयावं तिग्मशृङ्गो वृषभश्शोशुचानः । प्रत्न७ँ सधस्थमनुपश्यमान आतन्तुमग्निर्दिव्यं ततान स्वाहा** । अग्नये तन्तुमत इदम् । **त्वं नस्स्तन्तुरुत सेतुरग्ने त्वं पन्था भवसि देवयानः । त्वयाग्ने पृष्ठं वयमारुहेमाथा देवैस्सधमादं मदेम स्वाहा** । अग्नये तन्तुमत इदम् । ***अतिसर्गं वदतो मानवायजुँ पन्थामनु पश्यमानाः । अजुषन्त मरुतो यज्ञमेतं वृष्टिर्देवानाममृत७ँ स्वर्विद७ँ स्वाहा***[१७०] ।

---

१६६. साम अनृचमिति छेदः । ऋग्वर्जितस्तोभवता साम्ना इत्यर्थः । पक्षस्य आत्मनश्च सन्धिस्थानमपिपक्षः ।

१६७. स्वविधिना इति पाठा० ।

१६८. सञ्चितमग्निं प्रस्तोत्रा सामभिरनुगीतं सन्तं होता यजमानो वा वक्ष्यमाणेन विधिनाऽनुशंसेत् । अनुगीतमिति वचनात् प्रस्तोतुरनुगानानन्तरमेव अनुशंसनं क्रियते ।

१६९. अत्रैवं सूत्रं- 'पिता मातरिश्वेति सञ्चितोक्थ्येन होतानुशंसति । होतर्यकामयमानेऽध्वर्युः' इति । अस्य कपर्दिभाष्यं- ''पिता मातरिश्वेति सञ्चितस्याग्नेः यच्छस्त्रं तेन होताग्नेः पश्चात्स्थितः शंसति । अकामयमाने अनिच्छति होतरि शंसनं कर्तुं, अध्वर्युरेव शंसति । पिता मातरिश्वेत्यारभ्य पदानुतक्षुरिति विरम्य बृहस्पतिरुक्थामदानि शंसिषों इत्येतामेव त्रिः । पराचानुशंसतीति वचनात् । अथवा बह्वृचानामेका ऋक् अग्निरस्मि जन्मना इत्यनूच्यते । सकृदेव प्रयोगः इत्युपदेशः' इति ।

१७०. आजुषन्त---सुवर्विद७ँ स्वाहा इति पाठा० । वृष्टिं देवानां इति पाठा० ।

मरुद्भ्य इदम् । *आवर्तमानो भुवनस्य मध्ये प्रजा विकुर्वन् जनयन्विरूपाः । संवत्सरः परमेष्ठी धृतव्रतो यज्ञं नः पातु रजसः पुरस्तात्स्वाहा*[१७१] संवत्सराय परमेष्ठिन इदम् । *प्रजां दधातु परिवत्सरो नो धाता ददातु सुमनस्यमानः । बह्वीस्साकं बहुधा विश्वरूपा एकव्रता मामभि*[१७२] *संविशन्तु स्वाहा ।* परिवत्सराय धात्र इदम् । पञ्चान्वारोहान् शालामुखीये हुत्वा अपरं पञ्चगृहीतं गृहीत्वा कार्ष्णी उपानहावुपमुञ्चते । *चिते त्वा* दक्षिणाम् । *मनुचिते*[१७३] *त्वा* उत्तराम् । एवं यजमानः कार्ष्णी उपानहौ *चिते त्वा , मनुचिते त्वा* । **अपामिदं न्ययन७ समुद्रस्य निवेशनम् । अन्यं ते अस्मत्तपन्तु हेतयः पावको अस्मभ्य७ शिवो भव ॥ नमस्ते हरसे शोचिषे नमस्ते अस्त्वर्चिषे । अन्यं ते अस्मत्तपन्तु हेतयः पावको अस्मभ्य७ शिवो भव** द्वाभ्यामध्वर्युरग्निमधिरोहति ।

पृथिवीमाक्रमिषं प्राणो मा मा हासीत् । अन्तरिषमाक्रमिषं प्रजा मा मा हासीत् । दिवमाक्रमिष७ सुवरगन्म । एतैर्यजमानोऽधिरोहति ।

सर्वत्र हिरण्यमुपास्यन् । **नृषदे वट्** दक्षिणमंसम् । नृषद इदम् । **अप्सुषदे वट्** उत्तरां श्रोणिम् । अप्सुषद इदम् । **वनसदे वट्** दक्षिणां श्रोणिम् । वनसद इदम् । **बर्हिषदे वट्** उत्तरमंसम् । बर्हिषद इदम् । **सुवर्विदे वट्** मध्ये । सुवर्विद इदम् । पञ्चभिरुत्तरवेदिवत् अग्निं स्वयमातृण्णां वा व्याघार्य । उद्ग्रहणान्तम् । न स्वाहाकारः । सर्वत्र अग्नय इदमिति वा ।

ये देवा देवानां यज्ञिया यज्ञियाना७ सँव्वत्सरीणमुप भागमासते । अहुतादो हविषो यज्ञे अस्मिन्थ्स्वयं जुहुध्वं मधुनो घृतस्य ॥ ये देवा देवेष्वधि देवत्वमायन् ये ब्रह्मणः पुरएतारो अस्य । येभ्यो नर्ते पवते धाम किञ्चन न ते दिवो न पृथिव्या अधि स्नुषु द्वाभ्यामनुपरिचारं दध्ना मधुमिश्रेण दर्भग्रुमुष्टिना अग्निं व्यवोक्ष्य कूर्मपृषन्तं[१७४] कृत्वा ॥ **प्राणदा अपानदा व्यानदाश्चक्षुर्दा वर्चोदा वरिवोदाः। अन्यं ते अस्मत्तपन्तु हेतयः पावको अस्मभ्य७ शिवो भव** प्रत्यवरुह्य । तूष्णीं यजमानः प्रत्यवरोहति । उभावुपानहावुन्मुच्य । जुह्वां सकृद्गृहीत्वा **अग्निस्तिग्मेन शोचिषा य७सद्विश्वं न्यत्रिणम् । अग्निर्नो व७सते रयिम् ॥ सैनाऽनीकेन सुविदत्रो अस्मे यष्टा देवा७ आयजिष्ठः स्वस्ति । अदब्धो**

---

१७१. *परस्तात्स्वाहा* इति पाठा० ।

१७२. एकव्रतानामभि इति पाठा० ।

१७३. अनुचिते, मनचिते इति पाठा० ।

१७४. कूर्मपृष्ठं यथा तथा कृत्वा ।

गोपा उत नः परस्पा अग्ने द्युमदुत रेवद्दिदीहि स्वाहा द्वाभ्यां शालामुखीये अग्नयेऽनीकवत एकामाहुतिं जुहोति ॥ अग्नयेऽनीकवत इदम् ॥

वैश्वकर्महोमः :-

षोडशगृहीतेन स्रुचं पूरयित्वा शालामुखीये एव वैश्वकर्मणानि जुहोति । **य इमा विश्वा भुवनानि जुह्वदृषिर्होता निषसादा पिता नः । स आशिषा द्रविणमिच्छमानः परमच्छदो वर आ विवेश ॥ विश्वकर्मा मनसा यद्विहाया धाता विधाता परमोत सन्दृक् । तेषामिष्टानि समिषा मदन्ति यत्र सप्तऋषीन् पर एकमाहुः ॥ यो नः पिता जनिता यो विधाता यो नस्सतो अभ्या सज्जजान । यो देवानां नामधा एक एव त७ं सम्प्रश्नं भुवना यन्त्यन्या ॥ त आऽयजन्त द्रविण७ं समस्मा ऋषयः पूर्वे जरितारो न भूना । असूर्ता सूर्ता रजसो विमाने ये भूतानि समकृण्वन्निमानि ॥ न तं विदाथ य इदं जजाना-न्यद्युष्माकमन्तरं भवाति । नीहारेण प्रावृता जल्प्या चासुतृप उक्थशासश्चरन्ति ॥ परो दिवा पर एना पृथिव्या परो देवेभिरसुरैर्गुहा यत् । क७ं स्विद्गर्भं प्रथमं दध्र आपो यत्र देवाः समगच्छन्त विश्वे ॥ तमिद्गर्भं प्रथमं दध्र आपो यत्र देवास्समगच्छन्त विश्वे । अजस्य नाभावध्येकमर्पितं यस्मिन्निदं विश्वं भुवनमधि श्रितम् ॥ विश्वकर्मा ह्यजनिष्ट देव आदिद्गन्धर्वो अभवद् द्वितीयः । तृतीयः पिता जनितौषधीनामपां गर्भं व्यदधात् पुरुत्रा स्वाहा ॥** अर्धमाज्यं जुहोति । विश्वकर्मण इदं ।

चख्युषः पिता मनसा हि धीरो घृतमेने अजनन्नन्नमाने । यदेदन्ता अददृ७हन्त पूर्व आदिद्द्यावापृथिवी अप्रथेताम् ॥ विश्वतश्चख्युरुत विश्वतोमुखो विश्वतोहस्त उत विश्वतस्पात् । सं बाहुभ्यां नमति सं पतत्रैर्द्यावापृथिवी जनयन् देव एकः ॥ कि७ं स्विदासीदधिष्ठानमारम्भणं कतमत्स्वित्किमासीत् । यदी भूमिं जनयन्विश्वकर्मा वि द्यामौर्णोन्महिना विश्वचक्षाः ॥ कि७ं स्विद्वनं क उ स वृक्ष आसीद्यतो द्यावापृथिवी निष्टतक्षुः । मनीषिणो मनसा पृच्छतेदु तद्यदध्यतिष्ठद् भुवनानि धारयन्न् ॥ या ते धामानि परमाणि याऽवमा या मध्यमा विश्वकर्मन्नुतेमा । शिक्षा सखिभ्यो हविषि स्वधावस्स्वयं यजस्व तनुवं जुषाणः ॥ वाचस्पतिं विश्वकर्माणमूतये मनोयुजं वाजे

अद्या हुवेम । स नो नेदिष्ठा हवनानि जोषते विश्वशम्भूरवसे साधुकर्मा ॥ विश्वकर्मन् हविषा वावृधानः स्वयं यजस्व तनुवं जुषाणः । मुह्यन्त्वन्ये अभितस्सपत्ना इहास्माकं मघवा सूरिरस्तु ॥ विश्वकर्मन्, हविषा वर्धनेन त्रातारमिन्द्रमकृणोरवध्यम् । तस्मै विशस्समनमन्त पूर्वीरयमुग्रो विहव्यो यथाऽसत्स्वाहा । विश्वकर्मण इदम् । नानासूक्ताभ्यां द्वे आहुती हुत्वा ।

अग्निप्रणयनम् :-

उदेनमुत्तरां नयाग्ने घृतेनाऽऽहुत । रायस्पोषेण स७ँ सृज प्रजया च धनेन च ॥ अग्नय इदम् । **इन्द्रेमं प्रतरां कृधि सजातानामसद्वशी । समेनं वर्चसा सृज देवेभ्यो भागधा असत् ॥** इन्द्रायेदम् । **यस्य कुर्मो हविर्गृहे तमग्ने वर्धया त्वम् । तस्मै देवा अधि ब्रवन्नयं च ब्रह्मणस्पतिः** अग्नय इदम् । औदुम्बरीस्समिधो घृतोषितास्तिसृभिस्तिस्र आधाय । पशुबन्धवदग्निं प्रणयति । आहवनीये प्रणयनीयमिध्ममादीप्य सिकताभिरुपयम्य ***अग्नये प्रणीयमानायानुब्रू३हि*** । **उदु त्वा विश्वे देवा अग्ने भरन्तु चित्तिभिः । स नो भव शिवतमः सुप्रतीको विभावसुः** उद्यम्याग्निमाहनीय उद्यतहोमं जुहोति ***यत्ते पावक चकृम --- पुरस्तात्स्वाहा*** । अपादानभूतायाग्नय इदम् । प्रथमायां त्रिरनूक्तायां **पञ्च दिशो दैवीर्यज्ञमवन्तु देवीरपामतिं दुर्मतिं बाधमानाः । रायस्पोषे यज्ञपतिमाभजन्तीः ॥ रायस्पोषे अधि यज्ञो अस्थात्समिद्धे अग्नावधि मामहानः । उक्थपत्र ईड्यो गृभीतस्तप्तं घर्मं परिगृह्यायजन्त ॥ ऊर्जा यद्यज्ञमशमन्त देवा दैव्याय धर्त्रे जोष्ट्रे । देवश्रीश्श्रीमणा-श्शतपयाः परिगृह्य देवा यज्ञमायन् ॥ सूर्यरश्मिर् हरिकेशः पुरस्तात्सविता ज्योतिरुदया७ँ अजस्रम् । तस्य पूषा प्रसवँ्याति देवः सम्पश्यन्विश्वा भुवनानि गोपाः ॥ देवा देवेभ्यो अध्वर्यन्तो अस्थुर्वीत७ँ शमित्रे शमिता यजध्यै । तुरीयो यज्ञो यत्र हव्यमेति ततः पावका आशिषो नो जुषन्ताम्** पञ्चभिर्हरत्याग्नीध्रात् ।

आशुश्शिशान इति दक्षिणतो ब्रह्मा दशर्चेनान्वेति । **आशुश्शिशानो वृषभो न युध्मो घनाघनः, क्षोभणश्चर्षणीनाम् । सङ्क्रन्दनोऽनिमिष एकवीरश्शत७ँ सेना अजयत् साकमिन्द्रः ॥ सङ्क्रन्दनेनानिमिषेण जिष्णुना युत्कारेण दुश्च्यवनेन धृष्णुना । तदिन्द्रेण**

जयत तत्सहध्वं युधो नर इषुहस्तेन वृष्णा । स इषुहस्तैस्स निषङ्गिभिर्वशी स७ँस्रष्टा स युध इन्द्रो गणेन । स७ँसृष्टजित्सोमपा बाहुशर्ध्यूर्ध्वधन्वा प्रति-हिताभिरस्ता । बृहस्पते परि दीया रथेन रक्षोहाऽमित्रा७ँ अपबाधमानः । प्रभञ्जन्त्सेनाः प्रमृणो युधा जयन्नस्माकमेध्यविता रथानाम् । गोत्रभिदं गोविदं वज्रबाहुं जयन्तमज्म प्रमृणन्तमोजसा । इम७ँ सजाता अनु वीरयध्वमिन्द्र७ँ सखायोऽनु स७ँ रभध्वम् । बलविज्ञायस्स्थविरः प्रवीरस्सहस्वान्, वाजी सहमान उग्रः । अभिवीरो अभिसत्वा सहोजा जैत्रमिन्द्र रथमा तिष्ठ गोवित् । अभि गोत्राणि सहसा गाहमानोऽदायो वीरश्शतमन्युरिन्द्रः । दुश्च्यवनः पृतनाषाडयुध्योऽस्माक७ँ सेना अवतु प्रयुत्सु । इन्द्र आसां नेता बृहस्पतिर्दक्षिणा यज्ञः पुर एतु सोमः । देवसेनानामभिभञ्जतीनां जयन्तीनां मरुतो यन्त्वग्रे । इन्द्रस्य वृष्णो वरुणस्य राज्ञ आदित्यानां मरुता७ँ शर्ध उग्रम् । महामनसां भुवनच्यवानां घोषो देवानां जयतामुदस्थात् । अस्माकमिन्द्रस्समृतेषु ध्वजेष्वस्माकँय्या इषवस्ता जयन्तु । अस्माकँव्वीरा उत्तरे भवन्त्वस्मानु देवा अवता हवेषु इति ॥

अध्वर्युः – आग्नीध्रदेशं प्राप्य विमान एष दिवो मध्य आस्त आपप्रिवान्रोदसी अन्तरिक्षम् । स विश्वाचीरभि चष्टे घृताचीरन्तरा पूर्वमपरं च केतुम् ॥ उक्षा समुद्रो अरुणस्सुपर्णः पूर्वस्य योनिं पितुरा विवेश । मध्ये दिवो निहितः पृश्निरश्मा वि चक्रमे रजसः पात्यन्तौ द्वाभ्यामाग्नीध्रीयेऽश्मानं निधाय[१७५] ।

इन्द्रँव्विश्वा अवीवृधन्त्समुद्रव्यचसं गिरः । रथीतम७ँ रथीनां वाजाना७ँ सत्पतिं पतिम् ॥ सुम्नहूर्यज्ञो देवा७ँ आ च वक्षद्यक्षदग्निर्देवो देवा७ँ आ च वक्षत् ॥ वाजस्य मा प्रसवेनोऽद्ग्राभेणोदग्रभीत् । अथा सपत्ना७ँ इन्द्रो मे निग्राभेणाधरा७ँ अकः ॥ उद्ग्राभं च निग्राभं च ब्रह्म देवा अवीवृधन् । अथा सपत्नानिन्द्राग्नी मे

---

१७५. अश्मा श्वेतवर्णः स्यात् 'निहितः पृश्निरश्मेति' लिङ्गात् ।

विषूचीनान्व्यस्यताम् चतसृभिः आपुच्छात् गत्वा ।

प्राचीमनु प्रदिशं प्रेहि विद्वानग्नेरग्ने पुरोअग्निर्भवेह । विश्वा आशा दीद्यानो वि भाह्यूर्जं नो धेहि द्विपदे चतुष्पदे ॥ क्रमध्वमग्निना नाकमुख्य७ँ हस्तेषु बिभ्रतः । दिवः पृष्ठ७ँ सुवर्गत्वा मिश्रा देवेभिराध्वम् ॥ पृथिव्या अहमुदन्तरिक्षमाऽरुहमन्तरिक्षा-द्दिवमाऽरुहम् । दिवो नाकस्य पृष्ठात्सुवर्ज्योतिरगामहम् ॥ सुवर्यन्तो नापेक्षन्त आ द्या७ँ रोहन्ति रोदसी । यज्ञँय्ये विश्वतोधार७ँ सुविद्वा७ँसो वितेनिरे ॥ अग्ने प्रेहि प्रथमो देवयतां चक्षुर्देवानामुत मर्त्यानाम् । इयक्षमाणा भृगुभिस्सजोषास्सुवर्यन्तु यजमानास्स्वस्ति इति पञ्चभिरध्वर्युरग्निमधिरोहति । प्रतिप्रस्थात्रेऽग्निं प्रदाय ।

नक्तोषासा समनसा विरूपे धापयेते शिशुमेक७ँ समीची । द्यावा क्षामा रुक्मो अन्तर्विभाति देवा अग्निं धारयन् द्रविणोदा अग्ने सहस्राक्ष शतमूर्धञ्छतं ते प्राणाः सहस्रमपानाः । त्व७ँ साहस्रस्य राय ईशिषे तस्मै ते विधेम वाजाय स्वाहा द्वाभ्यां संहिताभ्यां[१७६] दध्नः पूर्णामौदुम्बरीं[१७६अ] स्वयमातृण्णायां जुहोति । अग्नय इदम् ।

नक्तोषासा --- द्रविणोदास्स्वाहा जुह्वा कृष्णायै श्वेतवत्सायै पयसा स्वयमातृण्णायामेव जुहोति । अग्नय इदम् ।

ऊर्णावन्तं प्रथमस्सीद योनिमिति होतुरभिज्ञाय विश्वायुरसीत्यादिभिः पौतुद्रवैः परिधिभिरग्निं परिदधाति[१७७] । अग्नेर्भस्मासीति स्वयमातृण्णायां सम्भारान्निवपति गुल्गुलु सुगन्धितेजनमित्यादीन् । **सुपर्णोऽसि गरुत्मान् पृथिव्या७ँ सीद पृष्ठे पृथिव्यास्सीद, भासाऽन्तरिक्षमा पृण ज्योतिषा दिवमुत्तभान तेजसा दिश उद्दृ७ँह ॥ आजुह्वानस्सुप्रतीकः पुरस्तादग्ने स्वाँय्योनिमा सीद साध्या । अस्मिन्थ्सधस्थे अध्युत्तरस्मिन्विश्वे देवा यजमानश्च**

---

१७६. 'देवा अग्निं धारयन् द्रविणोदा अग्ने सहस्राक्षेत्येवं संहिताभ्याम् । अन्ये त्वाहुः अवसानं क्रियते नोच्छ्वस्यते मध्ये ऋचा' इति कपर्दिभाष्यम् ।

१७६अ. अन्यया औदुम्बर्या स्रुचा । 'औदुम्बरीस्थं दधि अभेदेन उच्यते' इति भट्टभास्करभाष्यम् । स्वयमातृण्णायां दधि जुहोतीत्यर्थः ।

१७७. 'अनवतीर्ण एव (चितेरुपरिस्थित एव) विश्वायुरसीत्यादि परिधिपरिधानादि कर्म कुर्यात् । अग्नेरधस्तात् (चितेरधस्तात्) परिधानम् ' इति कपर्दिभाष्यम् ।

सीदत तिसृभिः स्वयमातृण्णायामग्निं प्रतिष्ठाप्य[१७८] । **अग्नेर्भस्मास्यग्नेः पुरीषमसि** । उत्तरत उपयमनीर्न्युप्य । **मनुष्वत्त्वा -- देवायते यज** उपसमिध्य ।

प्रेद्धो अग्ने दीदिहि पुरो नोऽजस्रया सूर्म्या यविष्ठ । त्वा७ँ शश्वन्त उप यन्ति वाजाः औदुम्बरीं समिधमादधाति । अग्नय इदम् । **विधेम ते परमे जन्मन्नग्ने विधेम स्तोमैरवरे सधस्थे । यस्माद्योनेरुदारिथा यजे तं प्र त्वे हवी७ँषि जुहुरे समिद्धे** वैकङ्कतीम् । अग्नय इदम् । **ता७ँ सवितुर्वरेण्यस्य चित्रामाऽहं वृणे सुमतिं विश्वजन्याम् । यामस्य कण्वो अदुहत्प्रपीना७ँ सहस्रधारां पयसा महीं गाम्** शमीमयीम् । सवित्र इदम् ।

ततः सकृत्सकृद्गृहीत्वा **चित्तिं जुहोमि मनसा घृतेन यथा देवा इहागमन्वीतिहोत्रा ऋतावृधस्समुद्रस्य वयुनस्य पत्मन् जुहोमि विश्वकर्मणे विश्वाहामर्त्य७ँ हविस्स्वाहा ।** अग्नय इदम्, विश्वकर्मण इदम् इति वा । **अग्ने तमद्याश्वं न स्तोमैः क्रतुं न भद्र७ँ हृदिस्पृषम् । ऋध्यामा त ओहैस्स्वाहा** । अग्नय इदम् । द्वे आहुती हुत्वा । द्वादशगृहीतेन स्रुचं पूरयित्वा **सप्त ते अग्ने समिधस्सप्त जिह्वास्सप्तर्षयस्सप्त धाम प्रियाणि । सप्त होत्रास्सप्तधा त्वा यजन्ति सप्त योनीरा पृणस्वा घृतेन स्वाहा ।** अग्नये सप्तवत इदम् । तां जुह्वत् ***यो दिक्ष्वग्निरिह सोऽस्तु*** इति दिग्भ्योऽग्निं मनसा ध्ययति ।

अथ अग्निर्यज्ञं नयतु प्रजानन्नित्यादि चतस्रोऽतिमुक्तीर्जुहोति । अग्निवत्युत्तरं परिग्राहं परिगृह्णाति । **वसवस्त्वा । धा असि ।** अत्र प्रतिप्रस्थाता मैत्रावरुण्याः पयस्याया वत्सानपाकरोति । **इषे त्वा** इत्यादि कुम्भीलेपनान्तम् । प्रोक्ष्य बर्हिस्त्रिर्वेदिं प्रोक्षति ॥

---

१७८. 'स्वयमातृण्णायां संभारवत्यां प्रतिष्ठापनमग्नेः इति' कपर्दिभाष्यम् ।

॥ वैश्वानरेष्टिः ॥

ततो वैश्वानरस्य तन्त्रं प्रक्रमयति । पौर्णमासं तन्त्रम् । उत्तरेण गार्हपत्यमित्यादि प्रस्तरबर्हिषामाहरणम्[१७९] । अपि वा जुहूमेव प्रस्तरे इत्यस्मिन् पक्षे न प्रस्तराहरणम् । न व्रतप्रवेशः । ततो परिस्तरणादि । एकोनविंशतिदारुरिध्मः । **यत्कृष्णो रूपं --- ततस्त्वामेकोनविꣳशतिधा ---सुसम्भृता । त्रीन्परिधीनेकाꣳ समिधं यज्ञायुरनुसञ्चरान्** । इध्मप्रवृश्चननिधानम् । **त्वया वेदिम् । उपवेषोऽसि** । समूहन्त्यग्न्यगारम् । प्राजहितवर्जानां अलङ्कृत्य परिस्तरणम् । **देवा देवेषु । कर्मणे वाम्** इत्यादि । पात्रप्रयोगकाले वैश्वानरस्य द्वादशकपालानि मारुतानामेकोनपञ्चाशत्कपालानि स्फ्यश्च द्वन्द्वम् । अग्निहोत्रहवणी शूर्पद्वयञ्च द्वन्द्वम्, कृष्णाजिनादि षट् । पुरतः स्रुवं जुहूमित्यादि, पात्रीद्वयम् । प्राशित्रेडापात्रप्रणीतान्वाहार्यस्थालीवर्जम् । इतराणि प्रकृतिवत् । पवित्रे कृत्वा न ब्रह्मवरणम् । **वेषाय त्वा** इत्येव शूर्पद्वयग्रहणम्[१८०] । निर्वपणकाले **अग्नये वैश्वानराय जुष्टं निर्वपामि** । अन्वावापान्तं कृत्वा अन्यस्मिन् शूर्पे सप्तानां मारुतानां तूष्णीं निर्वापः । सप्तकृत्वोऽन्वावापान्तम् । इदं देवानामित्यादि । **अग्ने वैश्वानर हव्यꣳ रक्षस्व** । तूष्णीं मारुतानामुपसादनम् । निर्वापवत्प्रोक्षणाधिवापसँवापाभिघाराः । **अग्नये वैश्वानराय वो जुष्टं प्रोक्षामि ।** मारुतानां तूष्णीं प्रोक्षणम् । वैश्वानरस्य कृष्णाजिनादानादि तण्डुलप्रस्कन्दनान्तं कृत्वा । तूष्णीं हविरावपनादि मारुतानामेवमन्तम् । वैश्वानरस्य **अदब्धेन व** इत्यादि । मारुतानां तूष्णीं फलीकरणम् । **त्रिष्फली क्रियमाणानाम् ।** कृष्णाजिनादानादि **अग्नये वैश्वानराय जुष्टमधिवपामि धान्यमसि** इत्यादि । मारुतानां तूष्णीमधिवापः । वैश्वानरस्य कपालोपधानकाले युग्मानामावृत्तिः । मारुतानां तूष्णीमुपधानम् । **भृगूणामङ्गिरसां** वैश्वानरस्याङ्गाराध्यूहनादि । मारुतानां तूष्णीमङ्गाराध्यूहनम् । **अग्नये वैश्वानराय जुष्टं सँव्वपामि ।** मारुतानामन्यस्यां पात्र्यां सँव्वापः । पिष्टान्युत्पूय अन्या आपो यजुषोत्पूय **समापो अद्भिरग्मत** इत्यादि । वैश्वानरस्य **मखस्य शिरोऽसि** इति पिण्डं कृत्वा । मारुतानां तूष्णीं उत्पवनादि, पिण्डं कृत्वा विभज्य लक्षणानि करोति । प्रथमो

---

१७९. बर्हिराहरणकाले प्रस्तरमेव आहरेत् इति पाठा० ।

१८०. वैश्वानरहविषः शूर्पस्य **वेषाय त्वा** इति ग्रहणम् । मारुतानां हविषः शूर्पस्य तूष्णीं इत्यर्थः । **वेषाय वाम्** शूर्पद्वयं इति पाठा० ।

द्वितीय इत्यादि । एवं क्रमेण उत्तरेषु कर्मसु सप्तानां मारुतानां आहोमात् । **घर्मोऽसि** वैश्वानरमधिश्रित्य मारुतानां तूष्णीमधिश्रयणम् । **उरु प्रथस्व** इत्यादि । प्रथनादि सर्वं तूष्णीं मारुतानाम् । आप्यलेपं निनीय ।

न वेदिकरणम् । ***प्रोक्षणीरासादय --- स्रुचौ च संमृड्ढ्याज्येनोदेहि*** इति संप्रैषः[१८१] । नोपभृत्संमार्गः न च प्राशित्रसम्मृजिः । **अग्ने गृहपत** इत्यादि शालामुखीये[१८२] ।

आज्यग्रहणकाले ध्रुवायामेव गृह्णाति । **सुप्रजास्त्वाय त्वा** । **आपो देवीः** इत्यादि **सूर्यस्त्वा पुरस्तात्** इत्यन्तम् । **वीतिहोत्रं** इत्येका समित् । स्तरणकाले अपरेणाग्निं बर्हिस्तृणाति । **विशो यन्त्रे स्थः । विच्छिनद्मि । वसूनाम् । अयं प्रस्तरः** । तूष्णीं जुहूपभृतावासाद्य । **ध्रुवासि** ध्रुवामासाद्य । **यो मा वाचा । ऋषभोऽसि । स्योनो मे सीद । इय९ॅं स्थाली । एतावसदताम् । विष्ण्वसि । इदमह९ॅं सेनाया** इत्यादि । **अग्नये वैश्वानराय जुष्टमभिघारयामि । प्रियेण** इत्यासादनम् । मारुतानां तूष्णीमभिघारणमुद्वासनमलङ्करणमासादनं च । **यज्ञोऽस्ययं यज्ञो ममाग्ने** चतुर्होता । **अयं वेद** इत्यादि । ***अग्नये समिध्यमानायानुब्रूहि*** । नानूयाजसमिधमवशिनष्टि । स्रौवमाघार्य आप्यायनान्तम् । न सम्प्रेष्यति । न संमार्ष्टि । स्रुच्याघारस्य लोपः । क इदमित्यादि मानुष इत्यन्तम् । **देवाः पितरः** । न प्रयाजान् यजति । आज्यभागाभ्यां प्रचर्य । आज्यभागान्त्यावदाने न ध्रौव्वाप्यायनम्[१८३] । जुह्वामुपस्तीर्य । **अग्निर्होता** । तूष्णीं कृत्स्नं वैश्वानरमवदाय । द्विरभिघार्य पञ्चावत्तिनां त्रिः । वैश्वानरप्रचारे ध्रौव्वसमाप्तिः। ***अग्नये वैश्वानरायानुब्रू३हि*** । उच्चैर्वैश्वानरस्याश्रावयति । ***अग्निं वैश्वानरं यज*** । वषट्कृते सर्वहुतं जुहोति । अग्नये वैश्वानरायेदम् । **अग्नेर्वैश्वानरस्याहं --- अन्नादः** । प्रत्याक्रम्य प्रस्तरादन्यत्र स्रुचौ सादयित्वा हस्तं प्रक्षाल्य । उपांशु मारुतान्त्सर्वहुतानासीनो हस्तेन गणेन गणमनुद्रुत्य जुहोति।

मारुतहोमः :-

ईदृङ्चाऽन्यादृङ्चैतादृङ्च प्रतिदृङ्च मितश्च सम्मितश्च सभराः । शुक्रज्योतिश्च चित्रज्योतिश्च सत्यज्योतिश्च ज्योतिष्मा९ॅंश्च सत्यश्चर्तपाश्चात्य९ॅंहाः । मितासश्च सम्मितासश्च

---

१८१. एषः प्राचीनकारिकानुसृतः पाठः, वासुदेवदीक्षितकारिकानुसृतपाठस्तु स्रुचस्सम्मृड्ढि इत्येव ।

१८२. प्राजहिते पत्नीकर्माणि, आज्याधिश्रयणं शालामुखीये इति आन्ध्र प्र.पा. एवमेव वासु.का. मतम् ।

१८३. न हि असिदादानप्रभृति एतत्क्षणपर्यंतमित्यादि इति पाठा० ।

न ऊतये सभरसो मरुतो यज्ञे अस्मिन्निन्द्रं दैवीर्विशो मरुतोऽनुवर्त्मानो यथेन्द्रं दैवीर्विशो मरुतोऽनुवर्त्मान एवमिमँय्यजमानं दैवीश्च विशो मानुषीश्चानुवर्त्मानो भवन्तु स्वाहा ॥ मरुद्भ्य इदम् ।

शुक्रज्योतिश्च चित्रज्योतिश्च सत्यज्योतिश्च ज्योतिष्माꣳश्च सत्यश्चर्तपाश्चाऽत्यꣳहाः । ऋतजिच्च सत्यजिच्च सेनजिच्च सुषेणश्चान्त्यमित्रश्च दूरेअमित्रश्च गणः ॥ मितासश्च सम्मितासश्च --- भवन्तु स्वाहा ॥ मरुद्भ्य इदम् ।

ऋतजिच्च सत्यजिच्च सेनजिच्च सुषेणश्चान्त्यमित्रश्च दूरेअमित्रश्च गणः । धुनिश्च ध्वान्तश्च ध्वनश्च ध्वनयꣳश्च निलिम्पश्च विलिम्पश्च विक्षिपः । मितासश्च सम्मितासश्च --- भवन्तु स्वाहा ॥ मरुद्भ्य इदम् ।

धुनिश्च ध्वान्तश्च ध्वनश्च ध्वनयꣳश्च निलिम्पश्च विलिम्पश्च विक्षिपः । ऋतश्च सत्यश्च ध्रुवश्च धरुणश्च धर्ता च विधर्ता च विधारयः । मितासश्च सम्मितासश्च --- भवन्तु स्वाहा ॥ मरुद्भ्य इदम् ।

ऋतश्च सत्यश्च ध्रुवश्च धरुणश्च धर्ता च विधर्ता च विधारयः । ***स्वतवाꣳश्च प्रघासी च सान्तपनश्च गृहमेधी च क्रीडी च साकीचोर्जिषी च ।*** **मितासश्च संमितासश्च --- भवन्तु स्वाहा ॥** मरुद्भ्य इदम् ।

स्वतवाꣳश्च प्रघासी च सान्तपनश्च गृहमेधी च क्रीडी च साकीचोर्जिषी च । **ईदृक्षास एतादृक्षास ऊ षु णः सदृक्षासः प्रतिसदृक्षास एतन । मितासश्च सम्मितासश्च --- भवन्तु स्वाहा ॥** मरुद्भ्य इदम् ।

ईदृक्षास एतादृक्षास ऊ षु णः सदृक्षासः प्रतिसदृक्षास एतन । ईदृङ् चान्यादृङ् चैतादृङ् च प्रतिदृङ् च मितश्च सम्मितश्च सभराः । मितासश्च सम्मितासश्च--- भवन्तु स्वाहा ॥ मरुद्भ्य इदम् ।[१८४]

---

१८४. वैश्वनरी मारुतान्ता उपदेशमतादिह इति आन्ध्र. प्र.पा.। एतन्मतेऽत्रैवेष्टिस्सन्तिष्ठते ततो वसोर्धाराहोम एव।

एवं मारुतान् हुत्वा स्रुचावादाय नारिष्ठान् जुहोति । न स्विष्टकृत् । वैश्वानरे हविः । आयतने स्रुचौ सादयित्वा ।

न प्राशित्रम् । न चेडा । न मार्जनम् । न दक्षिणा । न सम्प्रेष्यति । नानूयाजसमित् । न सम्मार्ष्टि । **यो भूतानां** इध्मसन्नहनप्रहरणम् । नानूयाजाः । वाजस्य मा प्रसवेनेत्यादि । सूक्तवाके **अग्नेर्वैश्वानरस्याहमुज्जितिम् । एमा अग्मन्, सा मे सत्याशीः** इति न भवति । अग्नीद्गमयेत्यादि । पत्नीस्सँय्याजयन्ति । प्रायश्चित्तहोमान्ते न समिष्टयजुर्जुहोति । तूष्णीं बर्हिप्रहरणम् । **अभिस्तृणीहि । यं देवा मनुष्येषु । यानि घर्मे ।** तूष्णीं मारुतकपालानां विमोकः । **विष्णोः क्रमोऽसि** इत्यादि । न व्रतविसर्गः । ***यज्ञ शं च म,* वृष्टि** वर्जम् । ब्राह्मणतर्पणान्तम्[१८५] ।

वसोर्धारा :-

जुह्वां चतुर्गृहीतं गृहीत्वा । **अग्नाविष्णू सजोषसेमा वर्धन्तु वां गिरः । द्युम्नैर्वाजेभिरागतꣳ स्वाहा ।** अग्नाविष्णुभ्यामिदम् । औदुम्बरीं स्रुचं व्यायाममात्रीं मृदा प्रदिग्धां पश्चादासेचनवतीं घृतस्य पूरयित्वा सन्ततां वसोर्धारां जुहोति । मन्त्रादेः धारायाश्च सहोपक्रमः । **वाजश्च मे प्रसवश्च मे** इत्यादि **भुवनश्चाधिपतिश्च स्वाहा** एकादशानुवाकान्ते सकृत् स्वाहाकारः[१८६] । **{वाजश्च मे स्वाहा प्रसवश्च मे स्वाहा** इत्यादि । **अष्टाचत्वारिꣳशच्च मे स्वाहा** इत्यन्तम् । **वाजश्च प्रसवश्चापिजश्च क्रतुश्च सुवश्च मूर्धा च व्यश्नियश्चाऽऽन्त्यायनश्चान्त्यश्च भौवनश्च भुवनश्चाधिपतिश्च स्वाहा ।}** अग्नाविष्णुभ्यामिदम् , वाजादिभ्यो वसोर्धारादेवताभ्य इदम् इति वा । आज्यमवशेषयित्वा जुहोति ।

समुद्रादूर्मिर्मधुमाꣳ उदारदुपाꣳशुना सममृतत्वमानट् । घृतस्य नाम गुह्यं यदस्ति जिह्वा देवानाममृतस्य नाभिः ॥ वयं नाम प्रब्रवामा घृतेनास्मिन् यज्ञे धारयामा नमोभिः । उप ब्रह्मा शृणवच्छस्यमानं चतुश्शृङ्गोवमीद्गौर एतत् ॥ चत्वारि शृङ्गा त्रयो अस्य पादा द्वे शीर्षे सप्त हस्तासो अस्य । त्रिधा बद्धो वृषभो रोरवीति महो

१८५. यज्ञो बभूव यज्ञ शञ्च म वृष्टि वर्जम् इति वासुदेवकारिका ।

१८६. मातृकाग्रन्थेषु वसोर्धाराहोमस्य द्विधा प्रयोगो दृष्यते । तथैव अनुष्ठानञ्च द्विधा उपलभ्यते । कपर्दिभाष्ये पक्षद्वयमपि दर्शितम् ॥

देवो मर्त्यां॑ आविवेश ॥ त्रिधा हितं पणिभिर्गुह्यमानं गवि देवासो घृतमन्वविन्दन् । इन्द्र एकं॑ सूर्य एकं जजान वेनादेकं॑ स्वधया निष्टतक्षुः ॥ ***एता अर्षन्ति हृद्यात्समुद्राच्छतव्रजा रिपुणा नावचक्षे । घृतस्य धारा अभि चाकशीमि हिरण्ययो वेतसो मध्य आसाम् ॥ सम्यक् स्रवन्ति सरितो न धेना अन्तर्हृदा मनसा पूयमानाः । एते अर्षन्त्यूर्मयो घृतस्य मृगा इव क्षिपणो रीषमाणाः ॥ सिन्धोरिव प्राध्वनेशूघनासो वातप्रमियः पतयन्ति यह्वाः । घृतस्य धारा अरुषो न वाजी काष्ठा भिन्दन्नूर्मिभिः पिन्वमानः ॥ अभिप्रवन्त समनेव योषाः कल्याण्य १॒ः स्मयमानासो अग्निम् । घृतस्य धारास्समिधो नसन्त ता जुषाणो हर्यति जातवेदाः ॥ कन्या इव वहतुमेतवा उ अञ्ज्यञ्जाना अभि चाकशीमि । यत्र सोमस्सूयते यत्र यज्ञो घृतस्य धारा अभि तत्पवन्ते ॥ अभ्यर्षत सुष्टुतिं गव्यमाजिमस्मासु भद्रा द्रविणानि धत्त । इमँय्यज्ञं नयत देवता नो घृतस्य धारा मधुमत्पवन्ते ॥ धामन्ते विश्वं भुवनमधि श्रितमन्तस्समुद्रे हृद्य १॒न्तरायुषि । अपामनीके समिथे य आभृतस्तमश्याम मधुमन्तं त ऊर्मिम्*** हुतां हूयमानां वा यजमानोऽनुमन्त्रयते[१८७] ॥ (स्वरसहितो मन्त्रपाठः १६६ पृष्ठे दत्तः) ।

ब्रह्मौदनं वाजप्रसवीयहोमाश्च :-

यदाज्यमुच्छिष्येत तस्मिन् ब्रह्मौदनं पक्त्वा चतुरो ब्राह्मणान् भोजयेत् । चतुश्शरावमोदनं लौकिकेऽग्नौ तस्मिन् घृते श्रपयित्वा अध्वर्यवादींश्चतुरो महर्त्विजो भोजयेत्[१८८] । प्राशितवद्भ्यः चतस्रो धेनूर्दद्यात् । रुद्राय गामिति प्रतिग्रहः । वाजप्रसवीयं जुहोति । सप्त ग्राम्या ओषधयस्सप्तारण्याः । लौकिकेऽग्नौ श्रपयित्वा पृथगन्नानि द्रवीकृत्य औदुम्बरेण स्रुवेण तिलमाषादि यवागूञ्जुहोति । अथ ग्राम्याः । **वाजस्येमं प्रसवस्सुषुवे अग्रे सोमं॑ राजानमोषधीष्वप्सु । ता अस्मभ्यं मधुमतीर्भवन्तु वयं॑ राष्ट्रे जाग्रियाम पुरोहितास्स्वाहा** तिलयवागूञ्जुहोति । हुत्वा हुत्वा पात्र्यां सम्पातमवनयति ।

---

१८७. सूत्रपाठक्रमे यजमानस्य घृतसूक्तेन वसोर्धारानुमन्त्रणं ब्रह्मौदनात् परमेव विद्यते । क्वचिन्मातृकाग्रन्थेषु तु ब्रह्मौदनात् पूर्वं क्वचित्परं च दृश्यते । अनुमन्त्रणस्य ब्रह्मौदनात् पूर्ववर्तित्वात् पूर्वमेव दत्तम् ।

१८८. चतुश्शरावं वौदनं पक्त्वा तद्व्यञ्जनं भोजयेत् इति सूत्रे पक्षान्तरमप्युक्तम् । एवमेव प्रायोऽनुष्ठीयते ।

अग्नय इदमिति सर्वत्र त्यागः ॥

वाजस्येदं प्रसव आ बभूवेमा च विश्वा भुवनानि सर्वतः । स विराजं पर्येति प्रजानन्प्रजां पुष्टिं वर्धयमानो अस्मे स्वाहा माषयवागूम् ॥

वाजस्येमां प्रसवः शिश्रिये दिवमिमा च विश्वा भुवनानि सम्राट् । अदित्सन्तं दापयतु प्रजानन्रयिं च नः सर्ववीरां नि यच्छतु स्वाहा व्रीहियवागूम् ॥

अग्ने अच्छा वदेह नः प्रति नः सुमना भव । प्रणो यच्छ भुवस्पते धनदा असि नस्त्वꣳ स्वाहा यवकृतयवागूम् ॥

प्र णो यच्छत्वर्यमा प्र भगः प्र बृहस्पतिः । प्र देवाः प्रोत सूनृता प्र वाग्देवी ददातु नस्स्वाहा प्रियङ्गुयवागूम् ॥

अर्यमणं बृहस्पतिमिन्द्रं दानाय चोदय । वाचं विष्णुꣳ सरस्वतीꣳ सवितारं च वाजिनꣳ स्वाहा अणुयवागूम् ॥

सोमꣳ राजानं वरुणमग्निमन्वारभामहे । आदित्यान्, विष्णुꣳ सूर्यं ब्रह्माणं च बृहस्पतिꣳ स्वाहा गोधूमयवागूम् । एते सप्त ग्राम्याः ॥

अथारण्याः = **वाजो नस्सप्त प्रदिशश्चतस्रो वा परावतः । वाजो नो विश्वैर्देवैर्धनसाता– विहावतु स्वाहा** वेणुयवागूम् ॥

विश्वे अद्य मरुतो विश्व ऊती विश्वे भवन्त्वग्नयस्समिद्धाः । विश्वे नो देवा अवसाऽऽगमन्तु विश्वमस्तु द्रविणं वाजो अस्मे स्वाहा श्यामाकयवागूम् ॥

वाजस्य प्रसवं देवा रथैर्याता हिरण्ययैः । अग्निरिन्द्रो बृहस्पतिर्मरुतस्सोमपीतये स्वाहा नीवारयवागूम् ॥

वाजेवाजेऽवत वाजिनो नो धनेषु विप्रा अमृता ऋतज्ञाः । अस्य मध्वः पिबत मादयध्वं तृप्ता यात पथिभिर्देवयानैस्स्वाहा जर्तिलयवागूम् ॥

वाजः पुरस्तादुत मध्यतो नो वाजो देवाꣳ ऋतुभिः कल्पयाति । वाजस्य हि प्रसवो नन्नमीति विश्वा आशा वाजपतिर्भवेयꣳ स्वाहा गवीधुकयवागूम् ॥

पयः पृथिव्यां पय ओषधीषु पयो दिव्यन्तरिक्षे पयो धाम् । पयस्वतीः प्रदिशस्सन्तु मह्य९ँ स्वाहा मर्कटकयवागूम् ॥

सं मा सृजामि पयसा घृतेन सं मा सृजाम्यप ओषधीभिः । सोऽहं वाज९ँ सनेयमग्ने स्वाहा गार्मुतयवागूम् । इति सप्तरण्याः ॥

सम्पाताभिषेकः :-

दक्षिणं प्रत्यपिपक्षं औदुम्बरीमासन्दीं प्रतिष्ठाप्य तस्यां कृष्णाजिनं प्राचीनग्रीवमुत्तरलोमास्तीर्य तस्मिन्नासीनं यजमानं अग्निमन्वारब्धं सम्पातैरभिषिञ्चति । **देवस्य त्वा सवितुः प्रसवेऽश्विनो-र्बाहुभ्यां पूष्णो हस्ताभ्या९ँ सरस्वत्यै वाचो यन्तुर्यन्त्रेणाग्नेस्त्वा साम्राज्येनाभिषिञ्चामि** प्राङ्मुखमासीनं प्रत्यङ्मुखस्तिष्ठन् शीर्षतोऽभिषिच्यामुखादन्ववस्रावयति ।

राष्ट्रभृद्धोमः :-

नक्तोषासा समनसा --- द्रविणोदास्स्वाहा जुह्वा कृष्णायै श्वेतवत्सायै पयसा जुहोति । अग्नय इदम् । षड्भिः पर्यायैर्द्वादश राष्ट्रभृतो जुहोति ॥ **ऋताषाड् तधामाग्निर्गन्धर्वस्तस्यौ-षधयोऽप्सरस ऊर्जो नाम स इदं ब्रह्म क्षत्रं पातु ता इदं ब्रह्म क्षत्रं पान्तु तस्मै स्वाहा** । अग्नये गन्धर्वायेदम् । **ताभ्यस्स्वाहा** । ओषधीभ्योऽप्सरोभ्य ऊर्ग्भ्य इदम् । ओषधीभ्योऽप्सरोभ्य इदम् इति वा ।

स९ँहितो विश्वसामा सूर्यो गन्धर्वस्तस्य मरीचयोऽप्सरस आयुवो नाम स इदं ब्रह्म --- तस्मै स्वाहा । सूर्याय गन्धर्वायेदम् । **ताभ्यस्स्वाहा** । मरीचिभ्योऽप्सरोभ्य आयुभ्य इदम् । मरीचिभ्योऽप्सरोभ्य इदम् इति वा ।

सुषुम्नस्सूर्यरश्मिश्चन्द्रमा गन्धर्वस्तस्य नक्षत्राण्यप्सरसो बेकुरयो नाम स इदं ब्रह्म --- तस्मै स्वाहा । चन्द्रमसे गन्धर्वायेदम् । **ताभ्यस्स्वाहा ।** नक्षत्रेभ्योऽप्सरोभ्यो बेकुरिभ्य इदम् । नक्षत्रेभ्योऽप्सरोभ्यो इदम् इति वा ।

भुज्युस्सुपर्णो यज्ञो गन्धर्वस्तस्य दक्षिणा अप्सरसस्स्तवा नाम स इदं ब्रह्म --- तस्मै स्वाहा । यज्ञाय गन्धर्वायेदम् । **ताभ्यस्स्वाहा ।** दक्षिणाभ्योऽप्सरोभ्यस्स्तवाभ्य इदम् । दक्षिणाभ्योऽप्सरोभ्य इदम् इति वा ।

प्रजापतिर्विश्वकर्मा मनो गन्धर्वस्तस्यर्क्सामान्यप्सरसो वह्नयो नाम स इदं ब्रह्म

--- तस्मै स्वाहा । मनसे गन्धर्वायेदम् । **ताभ्यस्स्वाहा** । ऋख्सामेभ्योऽप्सरेभ्यो वह्निभ्य इदम् । ऋख्सामेभ्योऽप्सरेभ्य इदम् इति वा ।

इषिरो विश्वव्यचा वातो गन्धर्वस्तस्यापोऽप्सरसो मुदा नाम स इदं ब्रह्म --- तस्मै स्वाहा । वाताय गन्धर्वायेदम् । **ताभ्यस्स्वाहा** । अद्भ्योऽप्सरोभ्यो मुदाभ्य इदम् । अद्भ्योऽप्सरोभ्यो इदम् इति वा ।

भुवनस्य पते यस्य त उपरि गृहा इह च । स नो रास्वाज्यानिँ रायस्पोषँ सुवीर्यँ सँव्वथ्सरीणाँ स्वस्तिँ स्वाहा । भुवनस्य पतय इदम् । प्रजापतय इदम् इति वा।

अथ भुवनस्य पत इति रथमुखे पञ्चाहुतीर्जुहोति । दश वा । उपर्याहवनीये रथशिरो धार्यमाणमभि जुहोतीत्येके[१८९] । पुनः **भुवनस्य पते यस्य त उपरि गृहा इह च । स नो रास्वाज्यानिँ रायस्पोषँ सुवीर्यँ सँव्वथ्सरीणाँ स्वस्तिँ स्वाहा** । भुवनस्य पतय इदम् । प्रजापतय इदम् इति वा ।

परमेष्ठ्यधिपतिर्मृत्युर्गन्धर्वस्तस्य विश्वमप्सरसो भुवो नाम स इदं ब्रह्म --- तस्मै स्वाहा । मृत्यवे गन्धर्वायेदम् । **ताभ्यस्स्वाहा** । विश्वस्मा अप्सरोभ्यो भूभ्य इदम् । विश्वस्मा अप्सरोभ्य इदम् इति वा ।

सुक्षितिस्सुभूतिर्भद्रकृथ्सुवर्वान् पर्जन्यो गन्धर्वस्तस्य विद्युतोऽप्सरसो रुचो नाम स इदं ब्रह्म --- तस्मै स्वाहा । पर्जन्याय गन्धर्वायेदम् । **ताभ्यस्स्वाहा** । विद्युद्भ्योऽप्सरोभ्यो रुग्भ्य इदम् । विद्युद्भ्योऽप्सरोभ्य इदम् इति वा ।

दूरेहेतिरमृडयो मृत्युर्गन्धर्वस्तस्य प्रजा अप्सरसो भीरुवो नाम स इदं ब्रह्म --- तस्मै स्वाहा । मृत्यवे गन्धर्वायेदम् । **ताभ्यस्स्वाहा** । प्रजाभ्योऽप्सरोभ्यो भीरुभ्य इदम् । प्रजाभ्योऽप्सरोभ्य इदम् इति वा ।

चारुः कृपणकाशी कामो गन्धर्वस्तस्याधयोऽप्सरसश्शोचयन्तीर्नाम स इदं ब्रह्म --- तस्मै स्वाहा । कामाय गन्धर्वायेदम् । **ताभ्यस्स्वाहा** । आधिभ्योऽप्सरोभ्यश्शोचयन्तीभ्य इदम् । आधिभ्योऽप्सरोभ्य इदम् इति वा ।

---

१८९. रथमुखं प्राचीनं भवेदिति आन्ध्रसम्प्रदायः ।

स नो भुवनस्य पते यस्य त उपरि गृहा इह च । उरु ब्रह्मणेऽस्मै क्षत्राय मयि शर्म यच्छ स्वाहा । भुवनस्य पतय इदम् । प्रजापतय इदम् इति वा ।

एवं दशाहुतीर्हुत्वा । अभिहुतमुद्यम्याध्वर्योरावसथं हरन्ति । अनुनयन्ति त्रीनश्वान्श्चतुरो वा । तान् सरथान् अध्वर्यवे ददाति । अध्वर्यो सरथान् अश्वांस्ते ददामि । सप्तदशकृत्वोऽपान्यात् । **देवस्य त्वा --- देवि दक्षिणे वरुणायाश्वम् । तेनामृतत्वमश्यां --- प्रतिगृह्णातु । देवस्य त्वा --- देवि दक्षिणे वैश्वानराय रथम् । वैश्वानरः प्रत्नथा नाकमारुहत् । दिवः पृष्ठं भन्दमानस्सुमन्मभिः । सपूर्ववज्जनयज्जन्तवे धनम् । समानमज्मा परि याति जागृविः । राजा त्वा वरुणो नयतु देवि दक्षिणे वैश्वानराय रथम् । तेनामृतत्वमश्यां --- प्रतिगृह्णातु** इति उभयोः प्रतिग्रहः[१९०] ॥

अञ्जलिना त्रीणि वातनामानि जुहोति । वात एव द्रव्यम् । **समुद्रोऽसि नभस्वानार्द्रदानु-श्शम्भूर्मयोभूरभि मा वाहि स्वाहा ॥ मारुतोऽसि मरुतां गणश्शम्भूर्मयोभूरभि मा वाहि स्वाहा ॥ अवस्युरसि दुवस्वाञ्छम्भूर्मयोभूरभि मा वाहि स्वाहा ॥** प्रजापतय इदमिति सर्वत्र । वातायेदमिति वा ।

अथ पञ्चाज्याहुतीः । **अग्न उदधे या त इषुर्युवा नाम तया नो मृड तस्यास्ते नमस्तस्यास्त उप जीवन्तो भूयास्म स्वाहा ॥ अग्ने दुध्र या त इषुर्युवा नाम तया नो मृड तस्यास्ते नमस्तस्यास्त उप जीवन्तो भूयास्म स्वाहा ॥ अग्ने गह्य या त इषुर्युवा नाम तया नो मृड तस्यास्ते नमस्तस्यास्त उप जीवन्तो भूयास्म स्वाहा ॥ अग्ने कि ७शिल या त इषुर्युवा नाम तया नो मृड तस्यास्ते नमस्तस्यास्त उप जीवन्तो भूयास्म स्वाहा ॥ अग्ने वन्य या त इषुर्युवा नाम तया नो मृड तस्यास्ते नमस्तस्यास्त उप जीवन्तो भूयास्म स्वाहा ॥** सर्वत्र अग्नय इदम् ।

सर्पाहुतीः :-

दध्ना मधुमिश्रेण षट् सर्पाहुतीरनुपरिचारं जुहोति । मधुमिश्रं दधि स्रुवेण जुह्वामादाय पुरस्तात्

---

१९०. अङ्गदक्षिणात्वात् तूष्णीं प्रतिग्रह इति पाठा० ।

प्रत्यङ्मुखस्स्थित्वा अग्निं प्रदक्षिणीकृत्य पुनः तत्रैवोपविश्य[१९१] जुहोति । **समीची नामासि प्राची दिक्तस्यास्तेऽग्निरधिपतिरसितो रक्षिता यश्चाधिपतिर्यश्च गोप्ता ताभ्यां नमस्तौ नो मृडयतां ते यन्द्विष्मो यश्च नो द्वेष्टि तं वां जम्भे दधामि स्वाहा** अग्नये असितायेदम् । **ओजस्विनी नामासि दक्षिणा दिक्तस्यास्त इन्द्रोऽधिपतिः पृदाकू रक्षिता यश्चाधिपतिर्यश्च गोप्ता ताभ्यां --- जम्भे दधामि स्वाहा** । दक्षिणतो गत्वा पूर्ववत् परिक्रम्य उदङ्मुख उपविश्य । इन्द्राय पृदाकव इदम् । **प्राची नामासि प्रतीची दिक्तस्यास्ते सोमोऽधिपतिस्स्वजो रक्षिता यश्चाधिपतिर्यश्च गोप्ता ताभ्यां --- जम्भे दधामि स्वाहा** पश्चात् प्राङ्मुखः । सोमाय स्वजायेदम् । **अवस्थावा नामास्युदीची दिक्तस्यास्ते वरुणोऽधिपतिस्तिरश्चराजी रक्षिता यश्चाधिपतिर्यश्च गोप्ता ताभ्यां --- जम्भे दधामि स्वाहा** । उत्तरतो दक्षिणामुखः । वरुणाय तिरश्चराजय इदम् । **अधिपत्नी नामासि बृहती दिक्तस्यास्ते बृहस्पतिरधिपतिश्श्वित्रो रक्षिता यश्चाधिपतिर्यश्च गोप्ता ताभ्यां --- जम्भे दधामि स्वाहा** पश्चात् प्राङ्मुखो जुहोति । बृहस्पतये श्वित्रायेदम् । **वशिनी नामासीयन्दिक्तस्यास्ते यमोऽधिपतिः कल्माषग्रीवो रक्षिता यश्चाधिपतिर्यश्च गोप्ता ताभ्यां --- जम्भे दधामि स्वाहा** पश्चात् प्राङ्मुखो जुहोति । यमाय कल्माषग्रीवायेदम् ।

महाहुतीः :-

अथ षण्महाहुतीः यथा सर्पाहुतीरनुपरिचारं जुहोति[१९२] । **हेतयो नाम स्थ तेषां वः पुरो गृहा अग्निर्व इषवस्सलिलो वातनामन्तेभ्यो वो नमस्ते नो मृडयत ते यन्द्विष्मो यश्च नो द्वेष्टि तं वो जम्भे दधामि स्वाहा** ॥ हेतिभ्य इदम् । **निलिम्पा नाम स्थ तेषां वो दख्षिणा गृहाः पितरो व इषवस्सगरो वातनामन्तेभ्यो---दधामि स्वाहा** ॥ निलिम्पेभ्य इदम् ॥ **वज्रिणो नाम स्थ तेषां वः पश्चाद्गृहास्स्वप्नो व इषवो गह्वरो वातनामन्तेभ्यो --- दधामि स्वाहा** ॥ वज्रिभ्य इदम् । **अवस्थावानो नाम स्थ तेषां व उत्तराद्गृहा आपो व इषवस्समुद्रो वातनामन्तेभ्यो --- दधामि स्वाहा** ॥ अवस्थावभ्य इदम् । **अधिपतयो**

---

१९१. पुरस्तात् प्रत्यङ्मुख उपविश्य इत्यर्थः । अनुपरिचारं जुहोतीति विहिताः सर्वा आहुतीः एवमेव होतव्याः।
१९२. दध्ना मधुमिश्रेणैव इति कपर्दिभाष्यम् ।

नाम स्थ तेषां व उपरि गृहा वर्षं व इषवोऽवस्वान् वातनामन्तेभ्यो --- दधामि स्वाहा ॥ अधिपतिभ्य इदम् । **क्रव्या नाम स्थ पार्थिवास्तेषां व इह गृहा अन्नं व इषवो निमिषो वातनामन्तेभ्यो --- दधामि स्वाहा** ॥ क्रव्येभ्य इदम् ।

अथ पञ्च अर्काहुतीराज्येन जुहोति । **सुवर्न घर्मस्स्वाहा** । घर्मायेदम् । **सुवर्नार्कस्स्वाहा ।** अर्कायेदम् । **सुवर्न शुक्रस्स्वाहा** । शुक्रायेदम् । **सुवर्न ज्योतिस्वाहा** । ज्योतिष इदम् । **सुवर्न सूर्यस्वाहा ।** सूर्यायेदम् । **यास्ते अग्ने सूर्ये रुच उद्यतो दिवमातन्वन्ति रश्मिभिः । ताभिस्सर्वाभी रुचे जनाय नस्कृधिस्वाहा** । अग्नय इदम् । **या वो देवास्सूर्ये रुचो गोष्वश्वेषु या रुचः । इन्द्राग्नी ताभिस्सर्वाभी रुचं नो धत्त बृहस्पते स्वाहा** । देवेन्द्राग्निबृहस्पतिभ्य इदम् । **रुचं नो धेहि ब्राह्मणेषु रुच॑ राजसु नस्कृधि । रुचं विश्येषु शूद्रेषु मयि धेहि रुचा रुच॑ स्वाहा ।** अग्नय इदम् । तिस्रो रुच आज्येनैव जुहोति ।

वेद्यास्स्तरणादि सौमिकं कर्म प्रतिपद्यते । अथैनां बर्हिषा बहुलं प्राचीनं स्तीर्त्वेत्यादि । सदःकरणकाले अग्निष्टोमश्चेत् प्रकृतिवत् नव छदींषि । अतिरात्राप्तोर्यामयोः सप्तदश छदींषि । **ऐन्द्रमसी**ति पञ्च मध्यमानि छदींष्यध्यूहति । **विश्वजनस्य छाया** पञ्च दक्षिणानि । **इन्द्रस्य सदोऽसि** सप्तोत्तराणि । एकवदुपरवमन्त्रानेके समामनन्ति । उत्तरेषु ऋतुष्विति विशेषः । **रक्षोहणं वलगहनं वैष्णवं खनामि** इत्यादि । चतुरस्रं खरं करोति सोमपात्रेभ्य आप्तमित्यन्तं कृत्वा ।

धिष्णियानां चयनम् :-

ममाग्ने वर्चो विहवेष्वस्त्वित्यनुवाकेन प्रतिमन्त्रमिष्टकाभिर्धिष्णियांश्चिनोति । अश्मनवमा आग्नीध्रीय उपदधाति । द्वादश होत्रीये । एकादश ब्राह्मणाच्छंसीये । षण्मार्जालीये । अष्टावष्टावन्येषु धिष्णियेषूपदधाति । चतुरश्राः परिमण्डला वा धिष्णियाः । तेषां यावत्य इष्टकास्तावतीश्शर्कराः परिश्रिताः[१९३] । चतुरश्रपक्षमाश्रित्य प्रयोगः । अथाग्नीध्रीयं नवभिः शर्कराभिः परिश्रयति । अथाग्नीध्रीयस्येष्टकोपधानम् । **ममाग्ने --- जयेम तया देवतया । मम देवा -- अस्मिन्तया देवतया । मयि देवा ---**

१९३. सर्वेषां धिष्णियानां तूष्णीमेव परिश्रयणम् । अत्र क्वचित् मातृकाग्रन्थेषु उपधानात् प्रागेव परिश्रयणवाक्यानि एकत्रैव संगृह्य दर्शितानि यथा 'होत्रीयं द्वादशभिः शर्कराभिः परिश्रित्य **ममाग्ने वर्चः** । एकादशभिः ब्राह्मणाच्छंसीयं परिश्रित्य **ममाग्ने वर्चः** इत्यादि' इत्येवम् ।

सुवीरास्तया देवतया । मह्यं यजन्तु -- अधिवोचता मे तया देवतया । देवीष्षडुर्वीरुरु-- सोमराजन् तया देवतया । अग्निर्मन्युं --- विनेशत् तया देवतया । धाता धातॄणां --- न्यर्थात्तया देवतया । उरुव्यचा नो --- मा परा दास्तया देवतया । एवमादित अष्टाभिः क्रमेण अष्टाविष्टका उपधाय । **ये नस्सपत्ना --- अधिराजमक्रन्तया देवतया ।** मध्ये पूर्वनिहितमश्मानमुपदधाति । चात्वालात्पुरीषमाहृत्य तूष्णीं तासु व्यूहति[१९४] ।

अथ होत्रीयं द्वादशभिश्शर्कराभिः परिश्रित्य । ममाग्ने वर्च इति पञ्चभिः पञ्चोपधाय देवीष्षडुर्वीरित्यावृत्तिः । अग्निर्मन्युमित्यारभ्य पञ्चोपधाय अर्वाञ्चमित्यावृत्तिः । अथ पुरीषम् ॥

अग्रेणाहवनीयं गत्वा प्रशास्त्रीयमष्टाभिः परिश्रित्य ममाग्ने वर्च इत्यरभ्य अष्टावुपधाय पुरीषम् । यथेतं गत्वा ब्राह्मणाच्छंसीयमेकादशभिः परिश्रित्य ममाग्ने वर्च इति दशभिर्दशोपधाय अर्वाञ्चमित्यावृत्तिः । एवमेकादश । अथ पुरीषम् ।

पोतृनेष्टृच्छावाकानां क्रमेण अष्टाभिः परिश्रित्य ममाग्ने वर्च इत्याष्टाभिरष्टावष्टावुपधाय पुरीषम् । प्रशास्त्रीयस्य दक्षिणतः[१९५] सञ्चरमवशिष्य ब्रह्मसदनम् । अष्टाभिः परिश्रित्य ममाग्ने वर्च इति आदितः पञ्चभिः पञ्चोपधाय । ***तव श्रिये व्यजिहीत पर्वतो गवां गोत्रमुदसृजो यदङ्गिरः । इन्द्रेण युजा तमसा परीवृतं बृहस्पते निरपामौब्जो अर्णवन्तया देवतया ।*** **बृहस्पते अति यदर्यो अर्हाद्द्युमद्विभाति क्रतुमज्जनेषु । यद्दीदयच्छवसर्तप्रजात तदस्मासु द्रविणं धेहि चित्रं तया । बृहस्पतिस्समजयद्वसूनि महो व्रजाङ्गोमतो देव एषः । अपस्सिषासन्थ्सुवरप्रतीत्तो बृहस्पतिर्हन्त्यमित्रमर्कैस्तया** इत्यष्टौ, पुरीषं च ।

मार्जालीयं षड्भिः परिश्रित्य ममाग्ने वर्च इति आदितः तिसृभिस्तिस्र उपधाय । **यमो दाधार पृथिवीं यमो विश्वमिदं जगत् । यमाय सर्वमित्रस्थे यत्प्राणद्वायुरक्षितम् तया । यथा पञ्च यथा षड्यथा पञ्च दशर्षयः । यमं यो विद्यात्स ब्रूयाद्यथैक ऋषिर्विजानते तया । त्रिकद्रुकेभिः पतति षडुर्वीरेकमिद्बृहत् । गायत्री त्रिष्टुप् छन्दा॑ᳬसि सर्वा ता यम आहिता तया ।** इति षट् पुरीषं च । चात्वालमष्टाभिः परिश्रित्य ममाग्ने इति पञ्च । **मृडा नो**

---

१९४. धिष्णियानां इष्टकोपधानान्ते सर्वत्र तूष्णीं पुरीषव्यूहनम् ।

१९५. प्रशास्त्रीयस्य पुरतः इति द्रा. प्र ।

रुद्रोत नो--- रुद्र प्रणीतौ तया । ***अश्याम ते सुमतिं देवयज्यया क्षयद्वीरस्य तव रुद्र मीढ्वः । सुम्नायन्निद्विशो अस्माकमाचरारिष्ट वीरा जुहुवाम ते हविस्तया । त्वेषं वय९ँ रुद्रं यज्ञसाधनं वङ्कुं कविमवसे निह्वयामहे । आरे अस्मदमति९ँहेडो अस्य तु सुमतिमिद्वयमस्या वृणीमहे तया*** इत्यष्टौ, पुरीषं च ।

शामित्रमष्टाभिः परिश्रित्य । ***हव्यं प्रीणीहि तया । हव्य९ँ श्रीणीहि तया । हव्यं पच तया । हव्य९ँ श्रपय तया । हव्यमसि तया । हव्याय त्वा तया । हव्येभ्यस्त्वा तया । हव्ये सीद तया*** इत्यष्टौ, पुरीषं च ।

अवभृथस्थानं गत्वा अष्टाभिश्शर्कराभिः परिश्रित्य[१९६] ममाग्ने वर्च इति पञ्च । **अव ते हेडो वरुण नमोभिरव यज्ञेभिरीमहे हविर्भिः । क्षयन्नस्मभ्यमसुर प्रचेतो राजन्नेना९ँसि शिश्रथः कृतानि तया । उदुत्तमं वरुण --- स्याम तया । तत्त्वा यामि --- प्रमोषीस्तया ।** इत्यष्टौ, पुरीषं च । तासु प्रचरन्ति । अवभृथकाले अवभृथेष्टका उपधीयन्त इति केचित्[१९७] । तदा अवभृथेष्टकाश्शर्कराश्च प्रज्ञातानि निदधाति । खण्डाः कृष्णा लक्ष्मणा चोत्कर उदस्यति । अवशिष्टाश्च भित्वा चोत्करे क्षिपति । धिष्णियानां न विभूरसीति निवपनम् । अध्वनामध्वपत इत्याद्यग्निष्टोमवत्[१९८] । एकस्तनं व्रतम् । अपरेणोत्तरवेदिं व्रतं प्रयच्छति । **या ते अग्ने रुद्रिया ।** ***शिवाः पीता भवथ॥***

---

१९६. "सर्वतः कृत्वा परिश्रयणं पूर्वम्, पश्चादुपधानमिष्टकानाम् । इहापि अवभृथे तासु प्रचरणम् । साङ्गस्यावभृथस्य प्रधानकालत्वादङ्गानाम् । उदके यथा (इष्टकाः) तिष्ठन्ति तासु च यथा आहुतयो भवन्ति तथा कर्तव्यमवभृथकाले" इति कपर्दिभाष्यम् । 'यस्मिन्देशे उपहिताश्चेष्टकाः साङ्गप्रधानाहुतयः तासु भवन्ति तस्मिन् स्थले जले अष्टाभिः शर्कराभिः परिश्रयणम् । प्रधानदेशत्वादङ्गानाम्' इति T.G..M पाठे एव विद्यते ।

१९७. 'उपदेशस्तु बर्हिरभिजुहोत्याहुतीनां प्रतिष्ठित्या इति बर्हिप्रत्याम्नायत्वादिष्टकानां तासु प्रचरन्तीति तस्मिन्नेव काल उपदधाति नास्मिन्काल इति । अस्मिन्काल इति न्यायः । अस्मिन्काल उपहिता अपि तृणप्रत्याम्नाय एव । नैव तृणं प्रह्रियते' इति कपर्दिभाष्यम् ।

१९८. एतानेवोपस्थानान् व्याघारणांश्चैके समामनन्ति इति सूत्रकारेण सोमप्रकरणे पक्षान्तरमप्युक्तम् । तस्मिन्पक्षे धिष्णियचयनानन्तरं विभूरसीत्यादिभिरुपस्थानं कर्तव्यम् । तत अध्वनामध्वपत इत्यादि । अग्निष्टोमे येषां आग्नीध्रीयादीनां धिष्णियानां निवपनं विहितं तेषां निवपनमत्र निवर्तते निवपनप्रत्याम्नायाच्चयनस्य । चात्वालाशामित्रयोः कृतोऽपि चयने अनुदेशस्तु न निवर्तते । अनुदेशस्य प्रत्याम्नायेन अनुक्तत्वात् ।

॥ चयने अग्नीषोमीयपशुप्रयोगः ॥

अग्नीषोमीयस्य पशोस्तन्त्रं प्रक्रमयति । **इषे त्वा** इत्यादि । **विष्णूनि स्थ** इत्याज्याभिमन्त्रणान्तं समानमग्निष्टोमवत् । एकयूपमेकादश वा यूपान्थ्सम्मिनोति । यूपसम्मानादि, अग्नीषोमीयवपाहोमान्ते सुब्रह्मण्याह्वानं वसतीवरीग्रहणं च । अग्नीषोमीयस्य पशुपुरोडाशं अष्टौ देवसुवां हवींषि अनुनिर्वपति । उत्तरेण गार्हपत्याहवनीयौ दर्भान् संस्तीर्य द्वन्द्वं न्यञ्चि पात्राणि प्रयुनक्ति । द्विचत्वारिंशत्कपालानि पञ्च स्थाल्यो नव शूर्पाणि च द्वन्द्वम् । इतरत् समानं पशुपुरोडाशेन । नव पात्र्यः, नवगृहयुक्ता एकैव वा पात्री प्राशित्रहरणं मदन्तीं मेक्षणमुपवेषमुत्पवनार्थं पात्रं तृणं च । पवित्रकरणादि ।

वेषाय वः शूर्पाण्यादत्ते । नवग्रहयुक्तायामेकस्यां पात्र्यामसंस्पृष्टानि बीजानि स्थापयित्वा । **धूरसि** इत्यादि । **निरस्तं** इति तन्त्रेण निरसनम् । शूर्पे पवित्रे निधायेत्यन्तं कृत्वा । **देवस्य त्वा –– हस्ताभ्यामग्नीषोमाभ्यां जुष्टं निर्वपामि ।** पुरोडाशार्थान् । अन्वावापान्तम् । एकैकस्य निर्वापं कृत्वाग्निहोत्रहवणीं पवित्रे हस्तौ च प्रक्षालयति । यजमानः अग्नि्ँ होतारमिति प्रतिहविर्निरुप्यमाणमनुमन्त्रयते ।

अध्वर्युः – अन्यस्मिन् शूर्पे पवित्रे निधाय । **देवस्य त्वा ––– हस्ताभ्यामग्नये गृहपतये जुष्टं निर्वपामि ।** पुरोडाशार्थान् कृष्णान् व्रीहीन् निरूप्य । अन्वावापान्तं सर्वत्र । अन्यस्मिन् शूर्पे पवित्रे निधाय । **देवस्य त्वा ––– हस्ताभ्याँ सोमाय वनस्पतये जुष्टं निर्वपामि ।** चर्वर्थान् श्यामाकान् । अन्यस्मिन् शूर्पे पवित्रे निधाय । **देवस्य त्वा –––– हस्ताभ्याँ सवित्रे सत्यप्रसवाय जुष्टं निर्वपामि ।** पुरोडाशार्थानाशून्व्रीहीन् । अन्यस्मिन् शूर्पे पवित्रे निधाय । **देवस्य त्वा ––– हस्ताभ्याँरुद्राय पशुपतये जुष्टं निर्वपामि ।** चर्वर्थान् गवीधुकान् । अन्यस्मिन् शूर्पे पवित्रे निधाय । **देवस्य त्वा ––– हस्ताभ्यां बृहस्पतये वाचस्पतये जुष्टं निर्वपामि ।** चर्वर्थान् नीवारान् । अन्यस्मिन् शूर्पे पवित्रे निधाय । **देवस्य त्वा ––– हस्ताभ्यामिन्द्राय ज्येष्ठाय जुष्टं निर्वपामि ।** पुरोडाशार्थान् महाव्रीहीन् । अन्यस्मिन् शूर्पे पवित्रे निधाय । **देवस्य त्वा ––– हस्ताभ्याम्मित्राय सत्याय जुष्टं निर्वपामि ।** चर्वर्थानाम्बान् । अन्यस्मिन् शूर्पे पवित्रे निधाय । **देवस्य त्वा ––– हस्ताभ्यां वरुणाय धर्मपतये जुष्टं निर्वपामि ।** चर्वर्थान् यवान् । एवं सर्वेषामन्वावापान्तं कृत्वा । **इदं देवानां** इत्यावृत्तिः **इदमुनस्सह** इति च । **स्फात्यै त्वा** इत्यादि तन्त्रेण । क्रमेण उपसादनमसामर्थ्ये ।

अदित्यास्त्वोपस्थे सादयाम्यग्नीषोमौ हव्यꣳ रक्षेथामग्ने गृहपते हव्यꣳरक्षस्व सोम वनस्पते हव्यꣳ रक्षस्व सवितस्सत्यप्रसव हव्यꣳ रक्षस्व रुद्र पशुपते हव्यꣳ रक्षस्व बृहस्पते वाचस्पते हव्यꣳ रक्षस्वेन्द्र ज्येष्ठ हव्यꣳ रक्षस्व मित्र सत्य हव्यꣳ रक्षस्व वरुण धर्मपते हव्यꣳ रक्षस्व इत्युपसादनम् । न कस्त्वा । सशूकायामित्यादि । **देवस्य त्वा ---हस्ताभ्यामग्नीषोमाभ्यां वो जुष्टं प्रोक्षाम्यग्नये गृहपतये वो जुष्टं प्रोक्षामि सोमाय वनस्पतये वो जुष्टं प्रोक्षामि सवित्रे सत्यप्रसवाय वो जुष्टं प्रोक्षामि रुद्राय पशुपतये वो जुष्टं प्रोक्षामि बृहस्पतये वाचस्पतये वो जुष्टं प्रोक्षामीन्द्राय ज्येष्ठाय वो जुष्टं प्रोक्षामि मित्राय सत्याय वो जुष्टं प्रोक्षामि वरुणाय धर्मपतये वो जुष्टं प्रोक्षामि ।** शुन्धध्वमित्यादि । पात्रप्रोक्षणे प्रोक्षणीनां समाप्तिः ।

कृष्णाजिनादानादि । **अधिषवणमसि** इत्यन्तं तन्त्रेण कृत्वा । **अग्नेस्तनूरसि** इत्यादि तण्डुलप्रस्कन्दनान्तं प्रतिबीजमावर्तते ***हविष्कृदेहि*** इति च[१९९] प्रतिबीजम् । प्रथमबीजे आग्नीध्रप्रैषश्च अश्माघातश्च । प्रतिबीजमुलूखलमुसलहस्तानां प्रक्षालनम् । श्यामाकादिचरूणां हस्तेन तुषोपवपनम् । वारुणस्य **अग्नेस्तनूरसि** इत्यन्तं कृत्वा हविष्कृता वाचं विसृज्य पशुं विशास्ति । ***गुदं मा निर्लेषीः*** इत्यादि । शूले प्रणीक्ष्य हृदयं शामित्रे श्रपयतीत्यन्तं कृत्वा । वारुणस्य अवहननादि[२००] । **अदब्धेन व** इति तन्त्रेण । ***त्रिष्फलीकर्तवै*** इति च । पर्यायेण फलीकरणमेकैकस्य त्रिस्त्रिः प्रक्षालनं च । सर्वहविषां प्रक्षालितमुदकमेकस्मिन् पात्रे आनीय त्रिष्पलीक्रियमाणानामिति तन्त्रेण निनयनम् ।

कृष्णाजिनादानादि दृषदमत्यादधातीत्यन्तं तन्त्रेण । अधिवापादि ***अणूनि कुरुतात्*** इत्यन्तमेकैकस्य

---

१९९. मातृकाग्रन्थेषु 'हविष्कृदेहीति प्रथमबीजे आग्नीद्रप्रैषश्चाश्माघातश्च' इति विद्यते । आण्ड्वल्लाप्रयोगेऽपि 'हविष्कृदाह्वानं तन्त्रेण' इत्येवास्ति । सूत्रकारेण आग्रयणप्रकरणे नानाबीजप्रयोग उक्तः । तत्र भाष्यकारेण 'एकस्मिन्नुलूखले कालभेदादावर्तते' इत्युक्तम् । वृत्तिकारोऽपि भाष्यकारपक्षमेवानुसरति । परिभाषासूत्रेऽपि कपर्दिना आवृत्तिः दर्शिता । अत अस्माभिरेवं परिष्कृतम् । केचित् प्रतिबीजं उलूखलमुसलहस्तानां प्रक्षालनमिच्छन्ति ।

२००. 'समाहतान् सर्वान् तुषान् अग्नीषोमीयस्य मध्यमे पुरोडाशकपाले ओप्य रक्षसां भागोऽसि इति निरसनं करोति' इत्येकेषां पाठः। 'पुरोडाशानां तेन तेन मध्यमेन पुरोडाशकपालेन, श्यामाकादि चरूणां हस्तेन तुषोपवपनम्' इत्यन्येषां पाठः ।

पुरोडाशस्यावर्तते[२०१]। कपालानामुपधानकाले अग्नीषोमीयस्यैकादश कपालानि, अष्टावुपधाय तूष्णीं त्रीणि । अग्नेर्गृहपतेरष्टौ कपालानि । ध्रुवोऽसीति सौम्यस्थालीम् । सावित्रस्य द्वादशकपालानि द्वितीयचतुर्थषष्ठाष्टमानामावृत्तिः । ध्रुवोऽसीति रौद्रस्थालीं बार्हस्पत्यस्थालीं च । ऐन्द्रस्यैकादश कपालानि । ध्रुवोऽसीति मैत्रस्थालीं वारुणस्थालीं च । **भृगूणामङ्गिरसां** इत्यादि । अधिवापवत् सँवापः पृथक्पृथक् । पिष्टानां तण्डुलानाञ्चोत्पत्तिक्रमेणोत्पवनम् । अन्या आपो यजुषोत्पूय **समापो अद्भिः । अद्भ्यः परि । जनयत्यै त्वा । मखस्य शिरोऽसि** इत्यादि प्रतिपुरोडाशमावर्तते । नात्र निर्देशः । निर्वापक्रमेण अधिश्रयणम् । प्रथनादि पुरोडाशनामन्तरितं सर्वेषाम् । आप्यलेपं बर्हिषि निनीय ।

घृताग्गेहि इत्यादि प्राशित्रं सम्मृज्य । प्रस्तरे पवित्रे अपिसृज्य । **इदमह७ँ सेनाया** इत्यादि । अग्नीषोमीयं तूष्णीमभिघार्य । **आप्यायतां --- तेजसाग्नये गृहपतये जुष्टमभिघारयामि ।** तूष्णीं सौम्यम् । **सवित्रे सत्यप्रसवाय जुष्टमभिघारयामि । रुद्राय पशुपतये जुष्टमभिघारयामि । बृहस्पतये वाचस्पतये जुष्टमभिघारयामि ।** तूष्णीमैन्द्रम् । **मित्राय सत्याय जुष्टमभिघारयामि । वरुणाय धर्मपतये जुष्टमभिघारयामि ।** स्योनन्त इत्यादि क्रमेणोद्वासनम् । **आर्द्रो भुवनस्ये**ति चरूणामुद्वासनम् । सर्वेषामलङ्करणम् । प्रियेणेत्यासादनम् । यज्ञोऽसीति षट् । **अयं यज्ञः । यो नः कनीयः --- अपतमिन्द्रो ज्येष्ठो भुवनान्नुदताम् ।** ममाग्ने चतुर्होता । शृते पशौ पञ्चहोता । जुह्वामुपस्तीर्येत्यादि । ***अग्नीषोमाभ्यां पुरोडाशस्यानुब्रूहि । अग्नीषोमाभ्यां पुरोडाशस्य प्रेष्य*** । अग्नीषोमाभ्यामिदम् । **अग्नीषोमयोरहं देवयज्यया वृत्रहा भूयासम् ।**

उपांशु देवसुवां प्रचारः वारुणवर्जम्[२०२] । ***अग्नये गृहपतये ,अनुब्रूहि । अग्निं गृहपतिं, यज***[२०३]। अग्नये गृहपतय इदम् । **अग्नेर्गृपतेरहं---अन्नादो भूयासम् ।** ***सोमाय वनस्पतये, अनुब्रूहि । सोमं वनस्पतिं, यज*** । सोमाय वनस्पतय इदम् । **सोमस्य**

---

२०१. तद्यथा "अग्नीषोमाभ्यां जुष्टमधिवपामि । अणूनि कुरुतादित्यन्तम् । अग्नये गृहपतये जुष्टमधिवपामि । अणूनि कुरुतादित्यन्तम् । सवित्रे सत्यप्रसवाय जुष्टमधिवपामि । अणूनि कुरुतादित्यन्तम् । इन्द्राय ज्येष्ठाय जुष्टमधिवपामि । अणूनि कुरुतादित्यन्तम्" ॥

२०२. 'स्रुचं प्रक्षाल्य हस्तं प्रक्षाल्य देवसुवाहविषां प्रचारः' इति आन्ध्रप्रयोगः ।

२०३. अत्र सर्वत्र अर्धविरामचिह्नपर्यन्तः पठितो मन्त्रभाग उपांशु । तदनन्तरः उच्चैः ।

वनस्पतेरहं --वृत्रहा भूयासम् । ***सवित्रे सत्यप्रसवाय, अनुब्रूहि । सवितारं सत्यप्रसवं, यज*** । सवित्रे सत्यप्रसवायेदम् । **सवितुस्सत्यप्रसवस्याहं देवयज्ययान्नादो भूयासम्** । ***रुद्राय पशुपतये, अनुब्रूहि । रुद्रं पशुपतिं, यज*** । रुद्राय पशुपतय इदम् । **रुद्रस्य पशुपतेरहं देवयज्ययान्नादो भूयासम्** । अप उपस्पृश्य । ***बृहस्पतये वाचस्पतये, अनुब्रूहि । बृहस्पतिं वाचस्पतिं, यज*** । बृहस्पतये वाचस्पतय इदम् । **बृहस्पतेर्वाचस्पतेरहं देवयज्ययान्नादो भूयासम्** । ***इन्द्राय ज्येष्ठाय, अनुब्रूहि । इन्द्रं ज्येष्ठं, यज*** । इन्द्राय ज्येष्ठायेदम् । **इन्द्रस्य ज्येष्ठस्याहं देवयज्ययेन्द्रियाव्यन्नादो भूयासम्** । ***मित्राय सत्याय , अनुब्रूहि । मित्रं सत्यं, यज*** । मित्राय सत्यायेदम् । **मित्रस्य सत्यस्याहं देवयज्ययान्नादो भूयासम्** । अथोच्चैः ***वरुणाय धर्मपतयेऽनुब्रूहि । वरुणं धर्मपतिं यज*** । वरुणाय धर्मपतय इदम् । **वरुणस्य धर्मपतेरहं देवयज्ययान्नादो भूयासम्** । नात्र नारिष्ठाः । समानं तु स्विष्टकृदिडम्[२०४] । अग्नीषोमीयस्य मुख्यत्वात् ***अग्नयेऽनुब्रूहि अग्नये प्रेष्य*** इत्येव स्विष्टकृतः सम्प्रैषः । रौद्रं शेषं क्षिपेदप्सु प्राशित्रेडं न तस्य तु[२०५] । अग्नीषोमीयसौम्य ऐन्द्रवर्ज्यानां विरुज्य प्राशित्रम् । इडावदानकाले न यजमानभागम् । इडामार्जनान्ते । स्रुवेण पृषदाज्यस्योपहत्येत्यादि समानमा समाप्तेः । पत्नीसंयाजान्तोऽग्नीषोमीयस्सन्तिष्ठते । निशायां वसतीवरीपरिहरणादि अग्निष्टोमवत् । रात्रौ परिस्तरणान्ते व्रतम्[२०६] । प्राजहिते दीक्षितस्य व्रतमित्यादि । अपरेण शालामुखीयं व्रतं प्रयच्छति ।

ये देवा मनोजाता इति व्रतयति । ***शिवाः पीता भवथ*** । रात्रौ यजमानं जागरयन्ति ।

॥ इति चयने अग्नीषोमीयपशुप्रयोगः ॥

---

२०४. अग्नीषोमीयेन पशुपुरोडाशेन सहैव देवसुवां हविषां स्विष्टकृद्यागः इडावदानं च इत्यर्थः ।

२०५. नास्तीदं वाक्यं क्वचिन्मातृकाग्रन्थेषु । अपेक्षितं तु, बौधायनेनोक्तत्वात् ।

२०६. आन्ध्रप्रयोगे द्राविडप्रयोगे च अत्र व्रतं न विद्यते ।

॥ अग्निष्टोमक्रतुः ॥

महारात्रे बुध्वेत्यादि । हृदे त्वा, सोम राजन्नित्येताभ्यां राजानमुपावहरतीत्यन्तं कृत्वा ।

[होतरेहीत्यस्मात्पूर्वं तिसृभिरग्नियोगकम् ।

आग्निके सवनीये तु सर्वत्राग्नेय एव हि[२०७] इति आन्ध्रप्रयोगपाठः ।]

अग्निं युनज्मि शवसा घृतेन दिव्य७ं सुपर्णं वयसा बृहन्तम् । तेन वयं पतेम ब्रध्नस्य विष्टप७ं सुवो रुहाणा अधि नाक उत्तमे ॥ इमौ ते पक्षावजरौ पतत्रिणो याभ्या७ं रक्षा७ंस्यपह७ंस्यग्ने । ताभ्यां पतेम सुकृतामु लोकँय्यत्रर्षयः प्रथमजा ये पुराणाः ॥ चिदसि समुद्रयोनिरिन्दुर्दक्षः श्येन ऋतावा । हिरण्यपक्षश्शकुनो भुरण्युर्महान्त्सधस्थे ध्रुव आ निषत्तः पुरस्तात् प्रातरनुवाकात्तिसृभिरभिमृशन्नग्निं युनक्ति, सोऽग्नियोगः । **होतरेहि** प्रातर्यावभ्य इत्यादि समानम् । पशुकाले आग्नेयः एकः पशुः ऐकादशिना वा साग्निचित्येषु । तत्रापि प्रतिपशु स्वरवः । शेषं समानम् । दक्षिणाकाले प्रतिहर्त्रे दत्वा हिरण्यपात्रं मधोः पूर्णं शतमानस्य कृतं **चित्रं देवानां ---तस्थुषश्च**[२०८] । अवेक्ष्य अश्वेनावघ्राप्य ब्रह्मणे ददाति ।

[प्रतिहर्तुश्च दानान्ते मधोः पूर्णं हिरण्यकम् ।

चित्रमित्यादि चमसाध्वर्युदानान्तमेव हि ॥

ब्रह्मन् मधुपूर्णं हिरण्यपात्रं ते ददामि । अध्वर्यो कल्याणीस्ते ददामि इति आन्ध्रप्रयोगपाठः ।]

ब्रह्मा **अग्नये हिरण्यं** इति तत् प्रतिगृह्णाति[२०९] । यद्यग्निचिदध्वर्युस्स्यात् तिस्रो धेनूर्बहुमूल्या

---

२०७. अग्निचयने सवनीयपशुः आग्नेय एव इत्यर्थः ।

२०८. "हिरण्यपात्रस्य प्रतिग्रहः अग्नये हिरण्यमिति । तस्य हिरण्मयत्वात् । हिरण्यपात्रं मधोः पूर्णं ददातीति पात्रस्य प्रतिग्रहणं न मधुनः" इति कपर्दिभाष्यम् ।

२०९. आन्ध्रप्रयोगपाठे हिरण्यपात्रस्य प्रतिग्रहमन्त्रो नास्ति । अध्वर्योस्तु प्रतिगृह्णामि रुद्राय गामिति वा, इति विकल्प उक्तः ।

दक्षिणा ददाति । ततश्चमसाध्वर्यवादीनामित्यादि । अथ यज्ञायज्ञियस्य स्तोत्रे एकयाऽप्रस्तुतं भवति । उपान्त्यनिधने कृते **नमस्ते अस्तु मा मा हि९ँसीर्विश्वस्य मूर्धन्नधि तिष्ठसि श्रितः । समुद्रे ते हृदयमन्तरायुर्द्यावापृथिवी भुवनेष्वर्पिते ॥ उद्नो दत्तोदधिं भिन्त दिवः पर्जन्यादन्तरिक्षात् पृथिव्यास्ततो नो वृष्ट्यावत । दिवो मूर्धासि पृथिव्या नाभिरूर्गपामोषधीनाम् । विश्वायुः शर्म सप्रथा नमस्पथे ।** द्वाभ्यामग्निमभिमृशति । समिष्टयजुषां काले एकादश समिष्टयजूंषि जुहोति । सप्तकृत्व आप्याय्य चतुरनाप्याय्य तूष्णीं ध्रौवं समापयन् जुह्वामेकादशगृहीतं गृहीत्वा धातारातिरित्यादि वाते धास्स्वाहेत्यन्तं हुत्वा । **इष्टो यज्ञो भृगुभिराशीर्दा वसुभिस्स्वाहा ।** यज्ञायेदम् । **तस्य त इष्टस्य वीतस्य द्रविणेह भक्षीय स्वाहा ।** यज्ञायेदम् । नात्र बर्हिः प्रह्रियते । नाभिस्तृणीहि । **यौ देवा** इत्यादि ।

॥ अप्तोर्यामक्रतुः ॥

महारात्रे बुध्वेत्यादि । ग्रहासादनकाले ध्रुवस्थालीं प्रयुज्य खरे षोडशिपात्रं खादिरं चतुस्स्रक्ति प्रयुनक्ति । ***को वो युनक्ति स वो युनक्तु ।*** खरस्य मध्ये परिप्लवामित्यादि । **हृदे त्वा, सोम राजन्नि**त्येताभ्यां राजानमुपावहरतीत्यन्तं कृत्वा । **अग्निं युनज्मि शवसा घृतेन दिव्य७ँ सुपर्णं वयसा बृहन्तम् । तेन वयं पतेम ब्रध्नस्य विष्टप७ँ सुवो रुहाणा अधि नाक उत्तमे ॥ इमौ ते पक्षावजरौ पतत्रिणो याभ्या७ँ रक्षा७ँस्यपह७ँस्यग्ने । ताभ्यां पतेम सुकृतामु लोकँय्यत्रर्षयः प्रथमजा ये पुराणाः ॥ चिदसि समुद्रयोनिरिन्दुर्दक्षः श्येन ऋतावा । हिरण्यपक्षश्शकुनो भुरण्युर्महान्थ्सधस्थे ध्रुव आ निषत्तः ॥** तिसृभिरभिमृशन्नग्निं युनक्ति, सोऽग्नियोगः । **होतरेहि, प्रातर्यावभ्यो देवेभ्य** इत्यादि समानम् । क्रतुकरणकाले न जुहोति नोपस्पृशति । **यमग्ने पृत्सु मर्त्यं** इत्येतद्यजुर्वदन् समुद्यैव प्रचरणीं हविर्धानं प्रपद्यते । ग्रहग्रहणकाले ध्रुवस्थालीं गृहीत्वा षोडशिनं गृह्णाति । **आतिष्ठ वृत्रहन् रथं युक्ता ते ब्रह्मणा हरी । अर्वाचीन७ँ सु ते मनो ग्रावा कृणोतु वग्नुना । उपायामगृहीतोऽसीन्द्राय त्वा षोडाशिने** । गृहीत्वा, पवित्रदशाभिः परिमृज्य । **एष ते योनिरिन्द्राय त्वा षोडशिने** सादयति । **यस्मान्न जातः परो अन्यो अस्ति य आविवेश भुवनानि विश्वा । प्रजापतिः प्रजया सँव्विदानस्त्रीणि ज्योति७ँषि सचते स षोडशी । एष ब्रह्मा य ऋत्वियः । इन्द्रो नाम श्रुतो गणे । प्र ते महे विदथेऽश७ँसिष७ँ हरी । य ऋत्वियः प्र ते वन्वे । वनुषो हर्यतं मदम् । इन्द्रो नाम घृतं न यः । हरिभिश्चारु सेचते । श्रुतो गण आ त्वा विशन्तु । हरिवर्पसङ्गिरः** इत्येताभिश्चतसृभिः सन्नं षोडशिनमभिमन्त्र्य । अत्र धारा विरमतीत्यादि । पशुकाले आग्नेय एकः पशुः । ऐकादशिना वा । एकयूपः एकादशिनी वा साग्निचित्येषु । तत्र प्रतिपशु बर्हिषीत्यादि । शेषं समानम् । ग्रहाभिमर्शनकाले वर्चसे मे इति सौर्यमवेक्ष्य । ***वीर्याय मे वर्चोदा वर्चसे पवस्व*** षोडशिनम् । **विष्णोर्जठरमसि** इत्यादि । सर्वमितरत्प्रकृतिवत् ।

*माध्यन्दिनपवमाने रथशब्देन बर्हिर्मुष्टिना च स्तोत्रोपाकरणम् । रथशब्दो उपाकरणमन्त्रस्थाने भवति । दक्षिणाकाले प्रतिहर्त्रे दत्वा हिरण्यपात्रं मधोः पूर्णं शतमानस्य कृतं **चित्रं देवानां ---**

---

* षोडशिनं सवने सवनेऽभिगृह्णातीति पक्षे माध्यन्दिने सवने मरुत्वतीयग्रहग्रहणानन्तरं षोडशिनं गृह्णीयात् ।

तस्थुषश्च । अवेक्ष्य अश्वेनावघ्राप्य ब्रह्मणे ददाति । यद्यग्निचिदध्वर्युस्स्यात् कल्याणीर्धेनूर्बहुमूल्या दक्षिणा ददाति । ततश्चमसाध्वर्यवादीनामित्यादि । अथ माहेन्द्रस्य स्तोत्रोपाकरणकाले दुन्दुभिघोषेण अरणिभ्यां बर्हिर्भ्यां च स्तोत्रमुपाकरोति[२१०] उपाकृतं सामाप्रस्तुतं भवति । अथोद्गातुर्दक्षिणमूरुमवकाभिः प्रच्छाद्य तस्मिन्नग्निं मन्थति । तं जातमुद्गाताभिहिंकृत्य प्रस्तोत्रे प्रयच्छति[२११] । *समाप्ते स्तोत्रे पूर्ववच्छस्त्र प्रतिगरः । अस्मिञ्छस्त्रे न्यूङ्खो न्यूङ्खवत् प्रतिगरः । **ओ३ओओओओओ३ओओओओ ओओ३ओओओथामोदैवोम्** इति । **ओथामोदैव** इत्यवसानेषु । उद्गातृहस्तस्थमग्निं अध्वर्युरादायोत्तरेण सर्वान्धिष्णियान् परीत्य पूर्वया द्वारा निष्क्रम्य आहवनीये प्रहरति । **प्रेद्धो अग्ने दीदिहि पुरो नोऽजस्रया सूर्म्या यविष्ठ । त्वा॒ँ शश्वन्त उप यन्ति वाजास्स्वाहा ।** प्रजापतय इदम् । अपि वा उद्गातैव प्रहृत्य जुहुयात्[२१२] । ततो अग्नये पथिकृत इत्यादि । माध्यन्दिनसवनस्योक्थ्यपर्याये स्तोत्रोपाकरणकाले अद्भिरवकावास्ताभिः[२१३] बर्हिभ्यां च स्तोत्रमुपाकरोति । **असर्ज्यसर्जि ।** उत्तराभ्यां पर्यायाभ्यां प्रतिप्रस्थाता चरति । स्तोत्रोपाकरणकाले आधावत्रयेन[२१४] दर्भद्वयेन च उपाकरोति । वैरूपस्य हिंकारप्रभृति आ समाप्तेः यजमानस्य परिचारकाः

---

* कासुचिन्मातृकासु माहेन्द्रस्तोत्रे स्तूयमाने यजमानस्याभिषेकः उक्तः । तद्यथा :– "बृहस्पतिसववदभिषेकं कार्यम् । दर्शिता भाष्यकारेण । सवनस्यान्ते । तस्मादिहाप्यभिषेकः स्तूयमाने कृष्णाजिन आसीनं यजमानमाज्येनाभिषिञ्चति । शुक्रामन्थिनोर्वा संस्रावेण । बृहस्पते युवमिन्द्रश्च --- सदा नः इत्यृचाभिषिञ्चति" इति ।

२१०. बर्हिस्स्थाने अरणिभ्यां माहेन्द्रस्य स्तोत्रमुपाकरोति इति सूत्रम् । अत्र भूमिका द्रष्टव्या ।

२११. वैराजस्य स्तोत्र उपाकृत उपर्यनूरुशकलं निधाय तृणे च तस्योपरि तिरश्चीमरणीं निधायाध्यात्मं प्रजननं कृत्वा त्रिःप्रदक्षिणमभिमन्थेत् गायत्रं छन्दोऽनुप्रजायस्व त्रैष्टुभं जागतमानुष्टुभं वैराजमिति गौतमः । चतुर्भिरिति धानञ्जय्यः । त्रिभिरिति शाण्डिल्यः । अरण्योः सन्धानमालभ्योपजिघ्रेत्पाणी तेजोऽसि तेजो मयि धेहीति । मथ्यमाने स्तोमं युञ्ज्यात् । जाते स्तुवीरन् । वाचयित्वा यजमानं (स्तुतस्य स्तुतमसीति) पुनरूर्जा निवर्तस्व पुनरग्न इषायुषा । पुनर्नः पाह्यंहसः । सह रय्या निवर्तस्वाग्ने पिन्वस्व धारया । विश्वप्स्न्या विश्वतस्परि इत्यनुमन्त्र्याभि जुहुयात् । तदुक्तं ब्राह्मणेन – प्रेद्धो अग्ने दीदिही पुरो न इति विराजाभि जुहोतीति । स्वाहाकारेणोत्तराम् । आगत्योपरिष्टाज्जपः । इति उद्गातॄणां प्रयोग उक्तः ॥ 'अथान्येन मथ्यमाने स्तोमं युक्त्वा दुन्दुभिघोषं कारयन्त एकविंशस्यैकं पर्यायं बृहता स्तुत्वा मथितमग्निमन्येन ज्वालयन्तो वैराजेन मध्यमं स्तुयुः । पुनर्दुन्दुभिघोषं कारयन्त उत्तमं पर्यायं बृहता समापयेयुः' इति चोद्गातॄणां प्रयोगः ॥

२१२ आपस्तम्बसूत्रानुसारेण प्रस्तोता अध्वर्यवे प्रयच्छति तमध्वर्युरादाय .... आहवनीये प्रहरति इति प्रयोगक्रमः । औद्गातृप्रयोगस्तु उद्गातुर्हस्तस्थमग्निमध्वर्युरादाय .... आहवनीये प्रहरति इति प्रयोगक्रमः ।

२१३. अवकामिश्रमुदकं कस्मिंश्चित् पात्रे आनीय इत्यर्थः ।

२१४. आधावाः तालवृन्ताः इत्यर्थः ।

स्वेन स्वेनाधावेन धून्वन्त्युद्गातॄन् । अग्नये पथिकृत इत्यादि । तृतीयोक्थ्यपर्याये उद्गातॄणां दक्षिणतः बहिर्वेदि गाः कृत्वा तथैवोत्तरतो वत्सान् कृत्वा वत्सान् प्रति धेनूस्संवाशयेयुः । ***असर्ज्यसर्जि*** । स्तोत्रान्ते उत्तमे पर्याये स्तुते धेनूर्वत्सांश्च पूर्वेण सदः संसृज्य पश्चिमेनाग्नीध्रीयमुदीचीस्त्यजेयुः । एतत् औद्गातृकर्मेत्येके । **स्तुतस्य स्तुतम्** । ततश्शस्त्रं प्रतिगृणाति । **शस्त्रस्य शस्त्रम्** । अग्नये पथिकृत इत्यादि । समानं माध्यन्दिनं सवनमासमाप्तेः ।

अथ तृतीयसवनम् । धाराग्रहणकाले आग्रयणं गृहीत्वा उक्थ्यं गृह्णाति* । पञ्चहोत्राभिमर्शनान्ते । **द्वौ समुद्रौ** इत्यादि । **आत्मने मे--पवस्व । अङ्गेभ्यो मे वर्चोदा --- पवस्व ।** ***पुष्ट्यै मे वर्चोदा --- पवध्वम् । शृतोऽस्यात्मानं मे । शृतोऽस्यङ्गानि मे । शृतास्स्थ पुष्टिं मे*** इत्यादि ।

अथ यज्ञायज्ञियं दुन्दुभिशब्देन बर्हिर्भ्यां च स्तोत्रमुपाकरोति । यद्यु वै स्तनयित्नुः स्यात्स एव स्याच्छब्दो मन्त्रस्थाने । स्तोत्रमेकयाऽप्रस्तुतं भवति । उपान्त्यनिधने कृते **नमस्ते अस्तु मा मा हिꣳसीर्विश्वस्य मूर्धन्नधि तिष्ठसि श्रितः । समुद्रे ते हृदयमन्तरायुर्द्यावापृथिवी भुवनेष्वर्पिते ॥ उद्नो दत्तोदधिं भिन्त दिवः पर्जन्यादन्तरिक्षात् पृथिव्यास्ततो नो वृष्ट्यावत। दिवो मूर्धासि पृथिव्या नाभिरूर्गपामोषधीनाम् । विश्वायुः शर्म सप्रथा नमस्पथे** । द्वाभ्यामग्निमभिमृशति । न पूतभृतो बिल इत्यादि[२१५] । चमसोन्नयनकाले नोन्नेतः सर्वं राजानं उन्नय । एकविंशत्यै चमसगणेभ्यो राजानमतिरेचयति[२१६] । ***असर्ज्यसर्जि*** । स्तुतस्य स्तुतमसीत्यादि । आग्निमारुतशस्त्रान्ते **शस्त्रस्य शस्त्रमसि** । अग्नये पथिकृत इत्यादि ।

अथोक्थ्यपर्यायाः । ***उपयामगृहीतोऽसि इन्द्रावरुणाभ्यां त्वा जुष्टं गृह्णामि देवेभ्यो देवायुवमुक्थेभ्य उक्थायुवम्*** उक्थ्यपात्रेणोक्थ्यतृतीयं गृहीत्वा । ***एष ते योनिरिन्द्रावरुणाभ्यां त्वा*** सादयति । **पुनर्हविरसि** स्थालीमभिमृशति । मैत्रावरुणचमसमुख्यान् चमसानुन्नयति । ***असर्ज्यसर्जि*** । **तन्तुरसि प्रजाभ्यस्त्वा प्रजा जिन्व** । **स्तुतस्य स्तुतमसि** इत्यादि । **इडा देवहूः** । शस्त्रप्रतिगरे विशेषः । अभि प्र वस्सुराधसमित्यादिषु षट्सु सूक्तेषु **ओथामोदैवमदे** इत्यर्धर्चेषु ।

---

* सवने सवनेऽभिगृह्णाति इति पक्षे अत्रापि षोडशिनं गृह्णीयात् ।

२१५. चमसोन्नयनकाले *उन्नेता न सर्वं राजानमुन्नय* --- इति प्रैषः क्वचिन्मातृकाग्रन्थे विद्यते । परन्तु सूत्रेषु एतादृशः प्रैषः नोपलभ्यते ।

२१६. सोमवृद्धिं करोतीत्यर्थः ।

मदामोदैवोमथ इति प्रणवेषु । सर्वास्वेकपदासु **ओथामोदैवोम्** इति प्रणवान्तः प्रतिगरः । दूरोहणे च यत्र प्रणवेनावस्यति तत्रापि **ओथामोदैवोम्** इति प्रणवान्तः प्रतिगरः । अवशिष्टः प्राकृतः प्रतिगरः । **शस्त्रस्य शस्त्रमसि** । अग्नये पथिकृत इत्यादि । ग्रहमध्वर्युरादत्ते । चमसाँश्चमसाध्वर्यवः । आश्राव्य प्रत्याश्राविते **उक्थशा यज सोमानाम्** । इन्द्रावरुणाभ्यामिदम् । अग्नये स्विष्टकृत इदम् । मैत्रावरुणचमसमध्वर्युः प्रतिभक्षयति । प्रक्षालितेषु चमसेषु । एवं विहितावुत्तरौ पर्यायौ । ताभ्यां प्रतिप्रस्थाता चरति । ***उपयामगृहीतोऽसीन्द्राबृहस्पतिभ्यां त्वा जुष्टं --- युवम्*** अर्धं चोक्थ्यशेषस्य गृहीत्वा । ***एष ते योनिरिन्द्राबृहस्पतिभ्यां त्वा*** सादयति । **पुनर्हविरसि** स्थालीमभिमृशति । ब्राह्मणाच्छंसिचमसमुख्यान् चमसानुन्नयति । **असर्ज्यसर्जि**। **पृतनाषाडसि पशुभ्यस्त्वा पशून् जिन्व** । स्तुतस्य स्तुतमसि । इडा देवहूः । अस्मिञ्छस्त्रे प्रतिगरे विशेषः । आदित आरभ्य विहिसोतोरसृक्षतनेन्द्रं देवममंसत पर्यन्तं प्राकृताः प्रतिगराः **ओथामोदैव, ओ३थामोदैव** । न्यूङ्खे न्यूङ्खवत् **ओ३ओओओओओ३ओओ ओओओओ३ओओओ मदेथ मदैवो३ओओओ३मोथामोदैव** इति । अवसाने **ओथामोदैव** । ऋगन्ते प्रणवे **ओ३थामोदैव** । न्यूङ्खान्ते इदं जना उपश्रुतेत्यादि यस्सभेय इत्यन्तं प्रणवान्तः प्रतिगरः **ओथामोदैवोम्** इति । अवसानेषु **ओथामोदैव** । यस्सभयो विदथ्येत्यादि विततौ किरणौ पर्यन्तं **ओथामोदैव, ओ३थामोदैव** इति प्राकृतौ प्रतिगरौ । विततौ किरणौ द्वौ इति षडनुष्टुभः । तासां **दुन्दुभिमाहननाभ्यां जरितरोथामोदैव । कोशबिले जरितरोथामोदैव । रजनिग्रन्थैर्धानां जरितरोथामोदैव । उपानहि पादं जरितरोथामोदैव । उत्तरां जनीमां जन्यां जरितरोथामोदैव । उत्तरां जनीं वर्त्मन्यां जरितरोथामोदैव** इति प्रतिगरा अवसानेषु[२१७] । प्रणवेषु **ओ३थामोदैव** ।

इहेत्थप्रागपागुदगधराक् इति चतस्रः द्वेधाकारम् । तासामवसाने **ओथामोदैव । अलाबूनि जरितरोथा- मोदैवो३म् । पृषातकानि जरितरोथामोदैवो३म् । अश्वत्थपलाशं जरितरोथामोदैवो३म् । पिपीलिका- वटो जरितरोथामोदैवो३म्** इति प्रतिगराः प्रणवेषु ।

भुगित्यभिगतः इति त्रीणि पदानि । तेषु **श्वा जरितरोथामोदैव । पर्णशदो जरितरोथामोदैव । गोशफो जरितरोथामोदैव** इति प्रतिगराः ।

वीमे देवा अक्रंसत इत्यनुष्टुप् । तस्या अवसाने **पत्नी यीयप्स्यते जरितरोथामोदैव** इति

२१७. अवसाने अवसानेषु इत्युक्ते प्रायेणार्धर्चेषु इत्यर्थः ।

प्रतिगरः । प्रणवे **होता विष्टीमेन जरितरोथामोदैव** इति प्रतिगरः । आदित्या ह जरितरङ्गिरोभ्यो दक्षिणामनयन् इति सप्तदश पदानि । तेषामाद्ये पदे प्राकृतः प्रतिगरः, मध्यवर्तिषु पञ्चदशसु **ओं ह जरितरोथामोदैव । तथा ह जरितरोथामोदैव** इति प्रतिगरौ व्यत्यासम्, प्रणव एवोत्तमे पदे । त्वमिन्द्र शर्मरिणा इत्यारभ्य यदस्या अंहुभेद्याः इत्यन्तं प्राकृतौ प्रतिगरौ **ओथामोदैव, ओ३थामोदैव** इति । ततः न्यूङ्खेषु **ई३इइइइइई३इइइइइई३इइइ किमयमिदमाहो३ओओओ३ मोथामोदैवो३म्** इति प्रतिगरः । दधिक्राव्णेत्यादि आसमाप्तेः प्राकृतः प्रतिगरः ।

शस्त्रस्य शस्त्रमसि इत्यादि । ग्रहं प्रतिप्रस्थातादत्ते । ***उक्थशा यज सोमानाम्*** । इन्द्राबृहस्पतिभ्यामिदम् । अग्नये स्विष्टकृत इदमित्यादि । प्रक्षालितेषु चमसेषु । ***उपयामगृहीतोऽसीन्द्राविष्णुभ्यां त्वा जुष्टं --- उक्थायुवम्*** सर्वं चोक्थ्यशेषस्य गृह्णाति । ***एष ते योनिरिन्द्राविष्णुभ्यां त्वा*** सादयति। न स्थालीमभिमृशति । अच्छावाकचमसमुख्यान् चमसानुन्नयति । **रेवदस्योषधीभ्य स्त्वौषधीर्जिन्व । इडा देवहूः । शो८ सामोद इव** । प्रवो मह इति नवानां ऋचां पूर्वावसानेषु प्राकृतः प्रतिगरः । आसां न्यूङ्खेषु निनर्दे च **ओ३ओओओओओ३ओओओओओ३ओओओमदे मधोर्मदस्य मदिरस्य मदैवो३ओ३ओ३ओ३मोथामोदैवोम्** इति प्रतिगरः । शेषं प्रकृतिवत् । **शस्त्रस्य शस्त्रमसि** इत्यादि । ग्रहं प्रतिप्रस्थातादत्ते ***उक्थशा यज सोमानाम्*** । इन्द्राविष्णुभ्यामिदम् । अग्नये स्विष्टकृत इदम् । प्रक्षालितेषु चमसेषु ।

समयाविषिते सूर्ये[२१८] ***असर्ज्यसर्जि*** । हिरण्येन बर्हिर्भ्यां च षोडशिस्तोत्रमुपाकरोति । **अभिजिदसि युक्तग्रावेन्द्राय त्वेन्द्रं जिन्व** । सदः पुरस्तात् श्वेतमश्वं धारयन्ति । आत्वा वहन्तु हरय इत्यारभ्य प्रप्र वस्त्रिष्टुभ इत्येतत्पर्यन्तं अवसानप्रणवयोः ***ओथामोदैवमदे । मदामोदैवोमथ*** इति यथाक्रमम् प्रतिगरौ भवतः । **शस्त्रस्य शस्त्रमसि** इत्यादि । षोडशिनमध्वर्युरादत्ते । चमसांश्चमसाध्वर्यवः । ***उक्थशा यज सोमानाम्*** । **इन्द्राधिपतेऽधिपतिस्त्वं देवानामस्यधिपतिं मामायुष्मन्तं वर्चस्वन्तं मनुष्येषु कुरु स्वाहा** । इन्द्रायाधिपतय इदम् । अग्नये स्विष्टकृत इदम् । ग्रहमध्वर्युः

---

२१८. अर्धास्तमिते सूर्ये इत्यर्थः । अत्रैवं सूत्रं– समयाविषिते सूर्ये हिरण्येन षोडशिनः स्तोत्रमुपकरोति । बर्हिस्थाने भवति इति । अत्र रुद्रदत्तः–हिरण्यं बर्हिषोः स्थाने भवति. न तु ताभ्यां समुच्चीयते इति । तथापि प्रयोगकारैः समुच्चय एव विहितः । अत्र भूमिका द्रष्टव्या ।

प्रतिभक्षयति । **भक्षेहि --- अवख्येषम्** । **होतरुपह्वयस्व** । **इन्द्रश्च सम्राड्वरुणश्च राजा तौ ते भक्षं चक्रतुरग्र एतम् । तयोरनु भक्षं भक्षयामि वाग्जुषाणा सोमस्य तृप्यतु ।** इति षोडशिनं भक्षयति । **हिन्व मे** । चमसिनः समाख्याभक्षणं भक्षयन्ति । प्रक्षालितेषु चमसेषु हिरण्यमश्वं चोद्गात्रे दद्यात् ।

अथ रात्रिपर्यायैः प्रचरन्ति । होतृचमसमुख्यांश्चमसानुन्नयन्ति ***इन्द्राय त्वाऽपिशर्वराय*** * इति सर्वत्र मुख्यचमसोन्नयनम् । स्तोत्रोपाकरणादि । (%)**अधिपतिरसि प्राणाय त्वा प्राणं जिन्व । स्तुतस्य स्तुतमसि** इत्यादि । प्राकृतः प्रतिगरः । **शस्त्रस्य शस्त्रं** इत्यादि । होतृचमसमध्वर्युरादत्ते । चमसांश्चमसाध्वर्यवः । ***उक्थशा यज सोमानाम्*** । इन्द्रायापिशर्वरायेदम् । अग्नये स्विष्टकृत इदम् । होतृचमसमध्वर्युः प्रतिभक्षयति । सर्वांश्चमसान् होता भक्षयति । चमसिनः समाख्याभक्षं भक्षयन्ति । प्रक्षालितेषु चमसेषु ।

द्वितीये पर्याये मैत्रावरुणचमसमुख्यान् चमसानुन्नयति ***इन्द्राय त्वाऽपिशर्वराय*** । स्तोत्रोपाकरणादि । **यन्ताऽस्यपानाय त्वाऽपानं जिन्व** । मैत्रावरुणचमसमध्वर्युरादत्ते । चमसांश्चमसाध्वर्यवः । ***उक्थशा यज सोमानाम्*** । इन्द्रायाऽपिशर्वरायेदम् । अग्नये स्विष्टकृत इदम् । मैत्रावरुणचमसमध्वर्युः प्रतिभक्षयति । सर्वांश्चमसान् मैत्रावरुणो भक्षयति । प्रक्षालितेषु चमसेषु ।

एवं विहितावुत्तरौ पर्यायौ ताभ्यां प्रतिप्रस्थाता चरति । तृतीये पर्याये ब्राह्मणाच्छंसिचमसमुख्यान् चमसानुन्नयति । ***इन्द्राय त्वाऽपिशर्वराय*** । स्तोत्रोपाकरणादि । **स॒ꣳ सर्पोऽसि चक्षिषे त्वा चक्षुर्जिन्व ।** ब्राह्मणाच्छंसिचमसं प्रतिप्रस्थातादत्ते । चमसांश्चमसाध्वर्यवः । ***उक्थशा यज सोमानाम्*** । इन्द्रायाऽपिशर्वरायेदम् । अग्नये स्विष्टकृत इदम् । ब्राह्मणाच्छंसिचमसं प्रतिप्रस्थाता भक्षयति । प्रक्षालितेषु चमसेषु ।

चतुर्थे अच्छावाकचमसमुख्यान् चमसानुन्नयति । ***इन्द्राय त्वाऽपिशर्वराय*** । स्तोत्रोपाकरणादि । **वयोधा असि श्रोत्राय त्वा श्रोत्रं जिन्व** । अच्छावाकचमसं प्रतिप्रस्थातादत्ते । चमसांश्चमसाध्वर्यवः । ***उक्थशा यज सोमानाम् ।*** इन्द्रायाऽपिशर्वरायेदम् । अग्नये स्विष्टकृत इदम् । अच्छावाकचमसं प्रतिप्रस्थाता भक्षयति । प्रक्षालितेषु चमसेषु । एषः प्रथमपर्यायः ।

---

*. **उपयामगृहीतोसीन्द्राय त्वाऽपिशर्वराय** इति पाठान्तरम् । (%)अत्र रुद्रदत्तमतानुसारेण सांप्रदायिकानुष्ठानपक्षेण च षोडशस्य स्तोमभागस्यैव (अभिजिदसि युक्तग्रावेन्द्राय त्वेन्द्रं जिन्व इत्यस्य) आवृत्तिः करणीया ।

एवं विहितो द्वितीयस्तृतीयश्च । ***इन्द्राय त्वाऽपिशर्वराय*** इति सर्वत्र मुख्यचमसोन्नयनम् । होतृमैत्रावरुणचमसाभ्यामध्वर्युश्चरति । ब्राह्मणाच्छंस्यच्छावाकचमसाभ्यां प्रतिप्रस्थाता । द्वितीय पर्यायस्य स्तोमभागानाह । **त्रिवृदसि** इति प्रथमे । **प्रवृदसि** इति द्वितीये । **सँव्वृदसि** इति तृतीये । **विवृदसि** इति चतुर्थे । इति द्वितीयः पर्यायः ।

तृतीयपर्यायस्य स्तोमभागानाह । **स७ँरोहोऽसि** इति प्रथमे । **नीरोहोऽसि** इति द्वितीये । **प्ररोहोऽसि** इति तृतीये । **अनुरोहोऽसि** इति चतुर्थे । स्तोत्रोपाकरणशस्त्रप्रतिगरचमसहोमभक्षणादि पूर्ववत् । तृतीयपर्यायस्य उत्तमगणस्य चमसेषु प्रक्षालितेषु ।

प्रतिप्रस्थाता आश्विनं द्विकपालं पुरोडाशं निर्वपति । द्वे कपाले शूर्पं च द्वन्द्वम् । कृष्णाजिना– द्युपलान्तान्यपरतः । पुरतः पात्रीं मेक्षणं मदन्त्युपवेषं च । पवित्रे कृत्वा संविशन्तामित्यादि । निर्वापकाले **देवस्यत्वा----हस्ताभ्यां अश्विभ्यां जुष्टं निर्वपामि । अदित्यास्त्वोपस्थे सादयाम्यश्विनौ हव्य७ँ रक्षेथां ।** एवं प्रोक्षणादि । कपालोपधानकाले आदितो द्वाभ्यामुपधाय । **भृगूणां---- तप्येथाम्** । आप्यलेपं निनीय । प्रस्तरे पवित्रे अपिसृज्य । तूष्णिमभिघारणम् । **प्रियेण** इत्यासादनम् । **अयं यज्ञो, यो नः कनीयः --- अपतमश्विनौ भुवनान्नुदेतां --- । ममाग्ने** पञ्चहोता । ततोऽध्वर्युः होतृचमसमुख्यान् दश चमसानुन्नयति **उपयामगृहीतोऽसीन्द्राय त्वापिशर्वराय** सन्धिचमसानुन्नयन् चतुर्भ्यश्चमसगणेभ्यो राजानमतिरेचयति । स्तोत्रोपाकरणादि । **वसुकोऽसि** । ***ओ७ँ स्तुत*** । अध्वर्युः **इडा देवहूः** इत्यादि आश्विनशस्त्रं प्रतिगृणाति । प्राकृतः प्रतिगरः । आश्विनं परस्सहस्रं शस्त्रं भवति । तदुदित आदित्ये परिधीयते । **शस्त्रस्य शस्त्रम्** । यजमानः पञ्चहोतारं वदेत् । ततः प्रतिप्रस्थाता जुह्वामुपस्तीर्य । आश्विनं पुरोडाशं कृत्स्नं तूष्णीमवदाय द्विरभिघारयति । होतृचमसमध्वर्युरादत्ते । चमसांश्चमसाध्वर्यवः । पुरोडाशं प्रतिप्रस्थाता । अध्वर्युस्सम्प्रेष्यति । ***अश्विभ्यां तिरो अह्नियानां सोमानामनुब्रूहि । अश्विभ्यां तिरो अह्नियानां सोमानां प्रेष्य*** । सह सोमैः पुरोडाशं प्रतिप्रस्थाता सर्वहुतं जुहोति । मध्ये पुरोडाशहोमः । अभितः सोमाहुतयः । अश्विभ्यामिदम् । ***अश्विनोरहं देवयज्ययेन्द्रियाव्यन्नादो भूयासम्*** । अनुवषट्कृते अग्नये स्विष्टकृत इदम् । होत्रा भक्षितं चमसमध्वर्युः प्रतिभक्षयति । प्रक्षालितेषु चमसेषु ।

ततो आप्तोर्यामस्य चमसगणैः अतिरिक्तोक्थैः प्रचरति । ***अग्नये त्वा*** होतृचमसमुख्यांश्चमसानुन्नयति ।

वेषश्रिरसि । ***ओ३ँ स्तुत । शस्त्रस्य शस्त्रम्*** । होतृचमसमध्वर्युरादत्ते । चमसांश्चमसाध्वर्यवः । ***उक्थशा यज सोमानाम्*** । अग्नय इदम् । अग्नये स्विष्टकृत इदम् । होतृचमसमध्वयुर्भक्षयति ।

इन्द्राय त्वा मैत्रावरुणचमसमुख्यान् चमसानुन्नयति । **वस्यष्टिरसि** । मैत्रावरुणचमसमध्वर्युरादत्ते । चमसांश्चमसाध्वर्यवः । इन्द्रायेदम् । अग्नये स्विष्टकृत इदम् । मैत्रावरुणचमसमध्वर्युः प्रतिभक्षयति । प्रक्षालितेषु चमसेषु ।

एवं विहितावुत्तरौ पर्यायौ । ताभ्यां प्रतिप्रस्थाता चरति । ***विश्वेभ्यस्त्वा देवेभ्यो जुष्टं गृह्णामि*** ब्राह्मणाच्छंसिचमसमुख्यांश्चमसानुन्नयति । **वस्यष्टिरसि** । ब्राह्मणाच्छंसिचमसं प्रतिप्रस्थातादत्ते। चमसांश्चमसाध्वर्यवः । विश्वेभ्यो देवेभ्य इदम् । अग्नये स्विष्टकृत इदम् । ब्राह्मणाच्छंसिचमसं प्रतिप्रस्थाता भक्षयति । प्रक्षालितेषु चमसेषु । पूतभृतो बिल उदीचीनदशं पवित्रं वितत्य य आधवनीये राजा तं सर्वं पूतभृत्यवनीय ***उन्नेतः सर्वं राजानमुन्नय मातिरीरिचो दशाभिः कलशौ मृष्ट्वा न्युब्ज*** इति संप्रेष्यति ।

विष्णवे त्वा अच्छावाकचमसमुख्यांश्चमसानुन्नयति । **वस्यष्टिरसि**[२१९] । शस्त्र प्रायश्चित्तान्ते अच्छावाकचमसं प्रतिप्रस्थातादत्ते इत्यादि । विष्णव इदम् । अग्नये स्विष्टकृत इदम् । अच्छावाक चमसं प्रतिप्रस्थाता भक्षयति । चमसिनः समाख्याभक्षणं भक्षयन्ति । प्रक्षालितेषु चमसेषु । अग्नीदौपयजानित्यादि । समिष्टयजुःपर्यन्तं समानम् ।

समिष्टयजुषां काले एकादश समिष्टयजूंषि जुहोति । सप्तकृत्व आप्याय्य चतुरनाप्याय्य तूष्णीं ध्रौवं समापयन् जुह्वामेकादशगृहीतं गृहीत्वा धातारातिरित्यादि वाते धास्स्वाहेत्यन्तं हुत्वा । **इष्टो यज्ञो भृगुभिराशीर्दा वसुभिस्स्वाहा** । यज्ञायेदम् । **तस्य त इष्टस्य वीतस्य द्रविणेह भक्षीय स्वाहा** । यज्ञायेदम् । नात्र बर्हिः प्रह्रियते । नाभिस्तृणीहि । **यौ देवा** इत्यादि ॥

॥ अथ अवभृथादिकर्म ॥

अवभृथकाले इष्टकासु प्रचरन्ति ।{**अवभृथकाले उपधानपक्षे अवभृथस्थानं गत्वा अष्टाभिश्शर्कराभिः परिश्रित्य । ममाग्ने वर्च इति पञ्च । अव ते हेडो वरुण**

२१९. एतस्मिन्नप्तोर्यामपर्याये मैत्रावरुणादिपर्यायेषु ब्रह्मा वस्यष्टिरसीति त्रिरभ्यसेत् इत्येकः पक्षः । किंतु रुद्रदत्तमतानुसारेण सांप्रदायिकानुष्ठानपक्षेण च एकत्रिंशस्य स्तोमभागस्यैव (वस्यष्टिरसीत्यस्य) आवृत्तिः करणीया ।

नमोभिरव यज्ञेभिरीमहे हविर्भिः । क्षयन्नस्मभ्यमसुर प्रचेतो राजन्नेना७ँसि शिश्रथः कृतानि तया । उदुत्तमं वरुण --- स्याम तया । तत्त्वा यामि --- प्रमोषीस्तया । इत्यष्टौ पुरीषं च । तासु प्रचरन्ति ।} न तृणप्रहारः । स्रौवमाघारयतीत्यादि ।

अनूबन्ध्यावपायां हुतायां वपनं कृत्वा स्नात्वा । यूपैकादशिनी पक्षे अग्रेण शालामुखीयमित्यादि पात्नीवतं च हुत्वा । औदुम्बरीं स्रुचं घृतस्य पूरयित्वा **इम स्तनमूर्जस्वन्तं धयापां प्रप्यातमग्ने सरिरस्य मध्ये । उत्सं जुषस्व मधुमन्तमूर्व समुद्रिय७ँसदनमाविशस्व स्वाहा** ॥ अग्नय इदम् । अग्नेर्विमोकं हुत्वा धात्रादीनां यागः । हुते सक्तुहोमे यदाकूतादिति तिसृभिर्धूममनुमन्त्रयते यजमानः ।

अथाध्वर्युः **यदाकूताथ्समसुस्रोद्धृदो वा मनसो वा सम्भृतं चक्षुषो वा । तमनु प्रेहि सुकृतस्य लोकँय्यत्र ऋषयः प्रथमजा ये पुराणास्स्वाहा** ॥ सर्वत्र अग्नय इदम् । **एत७ँसधस्थ परि ते ददामि यमावहाच्छेवधिं जातवेदाः । अन्वागन्ता यज्ञपतिर्वो अत्र त७ँस्म जानीत परमे व्योमन्थ्स्वाहा ॥ जानीतादेनं परमे व्योमन् देवास्सधस्था विदरूप-मस्य । यदागच्छात् पथिभिर्देवयानैरिष्टापूर्ते कृणुतादाविरस्मै स्वाहा ॥ सम्प्रच्यवध्वमनु सम्प्रयाताग्ने पथो देवयानान् कृणुध्वम् । अस्मिन्थ्सधस्थे अध्युत्तरस्मिन् विश्वे देवा यजमानश्च सीदत स्वाहा ॥ प्रस्तरेण परिधिना स्रुचा वेद्या च बर्हिषा । ऋचेमँय्यज्ञन्नो वह सुवर्देवेषु गन्तवे स्वाहा ॥ यदिष्टं यत्परादानं यद्दत्तं या च दक्षिणा । तदग्निर्वैश्वकर्मणः सुवर्देवेषु नो दधत् स्वाहा ॥ येना सहस्रं वहसि येनाग्ने सर्ववेदसं । तेनेमं यज्ञं नो वह सुवर्देवेषु गन्तवे स्वाहा ॥ येनाग्ने दक्षिणा युक्ता यज्ञं वहन्त्यृत्विजः । तेनेमं यज्ञन्नो वह सुवर्देवेषु गन्तवे स्वाहा ॥ येनाग्ने सुकृतः पथा मधोर्धारा व्यानशुः । तेनेमं यज्ञन्नो वह सुवर्देवेषु गन्तवे स्वाहा ॥ यत्र धारा अनपेता मधोर्घृतस्य च याः । तदग्निर्वैश्वकर्मणः सुवर्देवेषु नो दधत् स्वाहा** ॥ दशाकूतीर्हुत्वा प्रत्यवरोह्य ***पुनर्मनः पुनरायुरागात् पुनः प्राणः पुनराकूतमागात् । वैश्वानरो रश्मिभिर्वावृधानोऽन्तस्तिष्ठत्वमृतस्य गोपाः*** इत्युपतिष्ठते अध्वर्युः । अथ यजमानः **अयं नो नभसा पुरः** इत्यादि । ***यज्ञ शं च म*** इति जपित्वा **वृष्टिरसि** इत्यन्तं कृत्वा **ब्राह्मणा७ँस्तर्पयितवै** इति सम्प्रेष्यति ।

येऽग्नयः पुरीष्याः प्रविष्टाः पृथिवीमनु । तेषां त्वमस्युत्तमः प्रणो जीवातवे सुव । आपन्त्वाग्ने मनसापन्त्वाग्ने तपसापन्त्वाग्ने दीक्षयापन्त्वाग्न उपसद्भिरापन्त्वाग्ने सुत्ययापन्त्वाग्ने दक्षिणाभिरापन्त्वाग्नेऽवभृथेनापन्त्वाग्ने वशयापन्त्वाग्ने स्वगाकारेण प्रयास्यन्नाप्तिभिरग्निं यजमान उपतिष्ठते ।

{समारोप्य प्राजहितं अन्येषां चितिदर्शने ।
उप त्वेति च तिसृभिरुपस्थानं भवेद्यदि ।
इदमू नु प्रवेशं च उपावरोहणं तथा ।
उदवसानीयास्थाने पूर्णाहुतिस्सनेयिनः ।
अध्वर्युवरणं चैवाहवनीयहृतिस्तथा ।
सुत्योत्कर्षेद्यदि सर्वप्रायश्चित्तं तु हूयते ।
ततो द्वादशगृहीतेन ऊर्ध्वस्तिष्ठंस्तु हूयते ।
इदं विष्णुर्मन्त्रेण वैष्णवीमाहुतिं शुभाम् । इति आन्ध्रप्रयोगपाठः ।)

अयं ते योनिरिति प्राजहितं अरण्योः समारोप्य प्रागुदग्वा उदवस्यति **उप त्वाग्ने दिवेदिवे दोषावस्तर्धिया वयम् । नमो भरन्त एमसि ॥ राजन्तमध्वराणां गोपामृतस्य दीदिविम् । वर्धमानᳲस्वे दमे । स नः पितेव सूनवेऽग्ने सूपायनो भव । सचस्वा नस्स्वस्तये ॥** तिसृभिरन्येषां यजमानानां चित्यग्निं दृष्ट्वा उपतिष्ठते । **इदमू नु श्रेयो वसानमगन्म --- सञ्चरेम ॥** देवयजनमध्यवसाय मथित्वा उपावरोह्य आयतने निधाय उदवसानीयायाः तन्त्रं प्रक्रमयति । अपि वा आहवनीयं प्रणीय द्वादशग्रहीतेन स्रुचं पूरयित्वान्तर्वेद्यूर्ध्वस्तिष्ठन्निदं विष्णुर्विचक्रम इति वैष्णवीं पूर्णाहुतिं जुहोति । **इदं विष्णुः --- सुरे स्वाहा ॥** विष्णव इदम् । अथ सायमग्निहोत्रं जुहोति । काले प्रातर्होमः । सन्तिष्ठतेऽग्निः । सहस्रेणेजानस्याऽऽगामिपर्वणि त्रैधातवीया ॥

अग्निं चित्वा सौत्रामण्या यजेत मैत्रावरुण्या चामिक्षया[२२०] ।

अथ कपर्दिभाष्यवाक्यानि :-

२२०. “ विनापि पर्वणीत्युपदेशः । आगामिपर्वणीति न्यायः यश्शक्यते कालं सम्पादयितुमिति ” ।

अग्निं चित्वा अनन्तरे पर्वणि सौत्रामण्या यजेत अपरेद्युः मैत्रावरुण्यामिक्षया ।

सँव्वत्सरं न कञ्चन प्रत्यवरोहेत्[२२१]।

न च रामामुपेयात्[२२२] ।

न पक्षिणोऽश्नीयत्[२२३] ।

यावज्जीवं च मस्तिष्कस्य नाश्नीयात्[२२४]।

न च वर्षति धावेत् । यदि धावेदुपावर्तेत[२२५] ।

न द्वितीयं चित्वान्यस्य स्त्रियमुपेयात्[२२६]।

न तृतीयं चित्वा काञ्चन । भार्यां वोपेयात्[२२७]।

॥ इति अग्निचयनप्रयोगः ॥

---

२२१. प्रत्युत्थानं न कुर्यात् गुरूणामपि । यदा त्वभिषेकः कृतः तदा यावज्जीवम् संवत्सरं च नाभिषेकेऽपि ।

२२२. रामा यस्य शूद्रा क्रमेणानीता सोऽपि तां संवत्सरं नोपगच्छति ।

२२३. पक्षिमांसस्यापि संवत्सरमभक्षणम् ।

२२४. मस्तिष्कं मस्तकमांसम् । तस्य च यावज्जीवं नाश्नीयात् ।

२२५. अग्निचिद्वर्षति देवे न धावेद्यावज्जीवम् । यदि तु कथंचिद्विस्मृत्य धावेद्यस्मात् स्थानात् धावनं कृतं तदेव स्थानमुपावर्तेत ।

२२६. द्वितीयमग्निं चित्वान्यस्य वर्णस्य स्त्रियं भार्यामपि क्रमेणाहृतां नोपगच्छेत्संवत्सरम् । न यावज्जीवम् । रामातुल्यत्वात् ।

२२७. तृतीयं तु चित्वाग्निं काञ्चिदपि समानवर्णामपि संवत्सरं नोपगच्छेत् । भार्यां नोपगच्छेत्सर्ववर्णानाम् । सवर्णा त्ववश्यं भर्तव्या । द्वयोरधिकारश्रुतेः । कामतस्तु प्रवृत्तानामसवर्णापि भार्या । न सा अवश्यं भर्तव्या" इति ।

॥ त्रैधातवीयेष्टिः ॥

आचम्य प्राणानायम्य सहस्रदक्षिणेन क्रतुना यक्ष्यमाणः त्रैधातवीयया यक्ष्ये । (क्रत्वन्ते 'सहस्रदक्षिणेन क्रतुना ईजानस्त्रैधातवीयया यक्ष्ये' इति सङ्कल्प एव विशेषः।) **विद्युदसि** । ततो अध्वर्युवरणादि । **इमामूर्जं पञ्चदशीम्, त्रैधातवीय९ँ हविरिदमेषां मयि** । आमावास्यं तन्त्रम् । अन्वाधाय व्रतप्रवेशः। सप्तदश सामिधेन्यः । वेदं कृत्वा वेदिः । पात्रप्रयोगकाले द्वादशकपालानि स्फ्यश्च द्वन्द्वम् । शूर्पद्वयं चाग्निहोत्रहवण्या द्वंद्वम् । अन्वाहार्यस्थालीवर्जमितराणि प्रकृतिवत् । पवित्रकरणादि । **वानस्पत्यासि, वेषाय वाम् । प्रत्युष्टम्** इत्यादि । निर्वपणकाले पात्र्यां यवान् व्रीहींश्च स्थापयित्वा । धूरसीत्यादि । **देवस्य त्वा-- हस्ताभ्यामिन्द्राविष्णुभ्यां जुष्टं निर्वपामि** व्रीहीन्निर्वपति । पवित्रे प्रक्षाल्य अन्यस्मिन् शूर्पे पवित्रे निधाय **देवस्य त्वा-- हस्ताभ्यामिन्द्राविष्णुभ्यां जुष्टं निर्वपामि** यवान्निर्वपति । पुनः पवित्रे प्रक्षाल्य पूर्वस्मिन् शूर्पे पवित्रे निधाय । **देवस्य त्वा--- हस्ताभ्यामिन्द्राविष्णुभ्यां जुष्टं निर्वपामि** । पुनर्व्रीहीन् निर्वपति । **इदं देवानाम्** इत्यदि । **अदित्यास्त्वोपस्थे सादयामीन्द्राविष्णू हव्य९ँ रक्षेथाम्** तन्त्रेणोपसादनम् । **देवस्य त्वा--- हस्ताभ्यामिन्द्राविष्णुभ्यां वो जुष्टं प्रोक्षामि** तन्त्रेण प्रोक्षणम् । अवहननकाले व्रीहीनवहत्य यवानवहन्ति नानाबीजधर्मेण । तथैव त्रिष्फलीकरणम् । **इन्द्राविष्णुभ्यां जुष्टमधिवपामि ।** व्रीहीन् पिष्ट्वा यवान् पिनष्टि । कपालोपधानकाले अष्टावुपधाय तूष्णीं चत्वारि । **इन्द्राविष्णुभ्यां जुष्ट९ँ सँव्वपामि ।** व्रीहिमययोः समुप्य । पवित्रे प्रक्षाल्य अन्यस्यां पात्र्यां यवान् संवपति । विभाग काले **यथाभागं व्यावर्तेथाम्** इति प्रथमं व्रीहिपिण्डं यवमयादपि कनीयांसं विभज्य । द्वितीयं व्रीहिपिण्डं यवमयादपि ज्यायांसं विभज्य । प्रथमं पुरोडाशमधिश्रित्य **देवस्त्वा सविता श्रपयतु** इत्यन्तं कृत्वा । शृतस्य पुरोडाशस्य उपरि यवमयं महान्तमधिश्रयति । पुनः **देवस्त्वा सविता श्रपयतु** इत्यन्तं कृत्वा । एतस्योपरि पुनर्व्रीहिमयं पुरोडाशं ज्यायांसमधिश्रयति । **घर्मोऽसि** इति त्रयाणां मन्त्रावृत्तिः । **सं ब्रह्मणा पृच्यध्वम् ।** आप्यलेपं निनीय ।

ब्रह्मन्नुत्तरमित्यादि । उद्वासनकाले **सूर्यज्योतिषो विभात महत इन्द्रियाय ।** तूष्णीमभिघारणम् । **स्योनं वस्सदनं करोमि घृतस्य धारया सुशेवं कल्पयामि वः । स्योनं त** इति अविकारेणेति केचित् । **आर्द्राः प्रथस्नवो भुवनस्य गोपाश्शृता उथ्स्नान्ति जनितारो**

मतीनाम् । तस्मिन्थ्सीदतममृते प्रतितिष्ठतं व्रीहीणां मेधौ सुमनस्यमानौ । देवो वस्सविता मध्वानक्तु इत्यलंकरणम्। **तृप्तयस्स्थ** इत्यनुमन्त्रणम्। **प्रियेण नाम्ना** इत्यासादनम् । **अयं यज्ञः, यो नः कनीयः --- अपतमिन्द्राविष्णू भुवनान्नुदेताम् । ममाग्ने** पञ्चहोता । आज्यभागाभ्यां प्रचर्य । जुह्वामुपस्तीर्य[1] । **मा भैष्ट मा संविग्ध्वं मा वो हिꣳसिषं मा वस्तेजोऽपक्रमीत् । भरतमुद्धरतेमनुषिञ्चतावदानानि वः प्रत्यवदास्यामि नमो वोऽस्तु मा मा हिꣳसिष्ट** सर्वेषामभिगमयन् मध्यादवदाय[2] । **यदवदानानि वोऽवद्यन् --- तद्व आप्यायतां पुनः ।** ***इन्द्राविष्णुभ्यामनुब्रूहि । इन्द्राविष्णू यज*** इति प्रचारः । इन्द्राविष्णुभ्यामिदम् । **इन्द्राविष्ण्वोरहं देवयज्ययेन्द्रियाव्यन्नादः** । नारिष्ठादि । दक्षिणाकाले हिरण्यं तार्प्यं धेनुं च अन्तर्वेदि स्थापयित्वा । ***ब्रह्मण्यो ब्रह्मण्यस्स्थ ब्रह्मणे वो हुताद्य मा मा हिꣳसिष्टाऽहुता मह्यꣳशिवा भवत ।*** **ब्रध्न पिन्वस्व** इत्यादि । ***सहस्रधारा उत्सा अक्षीयमाणाः । ता दध्रुः पृथिवीमन्तरिक्षं दिवं च ताभिर्हिरण्यतार्प्यधेनुभिरतितराणि मृत्युम् ।*** दक्षिणसद्भ्य उपहर्तवै । इमाः हिरण्यतार्प्यधेनवः अहिंसन्तः यथाभागं प्रतिगृह्णीध्वम् । **अग्नये हिरण्यम् ।** ***ग्नास्त्वा कृन्तन्नतपसस्त्वा तन्वत वरूत्रयस्त्वा वयन्त्*****सोमाय वासः** । घृताक्तं वस्त्रं तार्प्यमित्युच्यते । **रुद्राय गाम् ।** हविश्शेषोद्वासनादि । **यज्ञो बभूव, यज्ञ शं च म** वर्जम् । ब्राह्मणतर्पणान्तं सन्तिष्ठते त्रैधातवीया ॥

॥ इति त्रैधातवीयेष्टिः ॥

---

१. जुह्वामुपस्तीर्य । मा भैष्ट मा संविग्ध्वं मा वो हिꣳसिषं मा वस्तेजोऽपक्रमीत् । भरतमुद्धरते मनुषिञ्चतावदानानि वः प्रत्यवदास्यामि नमो वोऽस्तु मा मा हिꣳसिष्ट दक्षिणार्धादवदाय । यदवदानानि वोऽवद्यन् --- तद्व आप्यायतां पुनः । *इन्द्राविष्णुभ्यामनुब्रूहि । इन्द्राविष्णू यज* इति प्रचारः । पुनः जुह्वामुपस्तीर्य मा भैष्ट इत्यादि मध्यादवदाय यदवदानानि व इत्यादि पूर्ववत् प्रचारः । पुनः जुह्वामुपस्तीर्य मा भैष्ट इत्यादि उत्तरार्धादवदाय यदवदानानि व इत्यादि पूर्ववत् प्रचारः । त्रयाणामपि इन्द्राविष्णुभ्यामिदम् । इन्द्राविष्ण्वोरहं देवयज्ययेन्द्रियाव्यन्नाद इति अनुमन्त्रणं च । इति मातृकाग्रन्थपाठः । अत्र प्रयोगे समानदेवताया अपि त्रिःकृत्वः प्रचारः कुत उक्त इति न ज्ञायते । यदा समाना देवता भवन्ति, यदि च समानप्रयोजना भवन्ति, अन्यया देवतया अव्यवहिताश्च भवन्ति तदा सहावदायैव प्रचारः इति विधिः । तद्यथा – समानदेवतां समवदाय प्रचरति हविर्गणेषु पशुगणेषु च इति (भा.परि.सू.२१), समानां देवतां समानार्थाम् ॥ अव्यवहितां सकृन्निगमेषु ॥ इति (आ. श्रौ. सू. १–३–२०,२१) ।

२. याज्ञिकाः सुषिरेण वेणुकाण्डेनावद्यन्ति ।

॥ सर्वपृष्ठेष्टिः ॥*

यूपसम्मार्जनादि । अग्नीषोमीयस्य वपाहोमान्ते सुब्रह्मण्याह्वानं वसतीवरीग्रहणं च । अग्नीषोमीयस्यपशुपुरोडाशमग्नये गायत्रायेति दशहविषं सर्वपृष्ठामनुनिर्वपति । उत्तरेण गार्हपत्यमित्यादि । सप्तषष्टिकपालानि तिस्रस्स्थाल्यः शूर्पं च द्वन्द्वम् । इतराणि प्रकृतिवत् । पुरतः पात्रीमित्यादि । प्रशित्रहरणं मदन्तीं मेक्षणमुपवेषमुत्पवनार्थपात्रं प्रातर्दोहपात्राणि च । पवित्रे कृत्वा । ***यजमान वाचं यच्छ*** । सविशन्तामित्यादि । निर्वपणकाले **देवस्य त्वा --- हस्ताभ्यामग्नीषोमाभ्यां जुष्टं निर्वपामि ।** इत्यग्नीषोमीयपशुपुरोडाशार्थं निरुप्य सर्वपृष्ठहवींषि अनुनिर्वपति । **देवस्य त्वा--- हस्ताभ्यामग्नये गायत्राय त्रिवृते राथन्तराय वासन्ताय जुष्टं निर्वपामि ॥ देवस्य त्वा---हस्ताभ्यामिन्द्राय त्रैष्टुभाय पञ्चदशाय बार्हताय ग्रैष्माय जुष्टं निर्वपामि । देवस्य त्वा---हस्ताभ्यां विश्वेभ्यो देवेभ्यो जागतेभ्यस्सप्तदशेभ्यो वैरूपेभ्यो वार्षिकेभ्यो जुष्टं निर्वपामि । देवस्य त्वा---हस्ताभ्यां बृहस्पतये पाङ्क्ताय त्रिणवाय शाक्वराय हैमन्तिकाय जुष्टं निर्वपामि । देवस्य त्वा---हस्ताभ्या॑ँ सवित्र आतिच्छन्दसाय त्रयस्त्रि॑ँशाय रैवताय शैशिराय जुष्टं निर्वपामि । देवस्य त्वा--- हस्ताभ्यामदित्यै विष्णुपत्न्यै जुष्टं निर्वपामि । देवस्य त्वा---हस्ताभ्यामग्नये वैश्वानराय जुष्टं निर्वपामि । देवस्य त्वा---हस्ताभ्यामनुमत्यै जुष्टं निर्वपामि । देवस्य त्वा---हस्ताभ्यां काय जुष्टं निर्वपामि**[१] । इदं देवानामित्यादि । **अदित्यास्त्वोपस्थे सादयाम्यग्नीषोमौ हव्य॑ँ रक्षेथामग्ने गायत्र त्रिवृद्राथन्तर वासन्त हव्य॑ँ रक्षस्वेन्द्र त्रैष्टुभ पञ्चदश बार्हत ग्रैष्म हव्य॑ँ रक्षस्व विश्वे देवा जागताः सप्तदशा वैरूपा वार्षिका हव्य॑ँ रक्षध्वं बृहस्पते पाङ्क्त त्रिणव शाक्वर हैमन्तिक हव्य॑ँ रक्षस्व सवितरातिच्छन्दस त्रयस्ति॑ँश रैवत शैशिर हव्य॑ँ रक्षस्वादिते विष्णुपत्नि हव्य॑ँ रक्षस्वाग्ने वैश्वानर हव्य॑ँ रक्षस्वानुमते हव्य॑ँ रक्षस्व क हव्य॑ँ रक्षस्व ।** सशूकायामित्यादि । **देवस्य त्वा --- हस्ताभ्यामग्नीषोमाभ्यां वो जुष्टं प्रोक्षाम्यग्नये गायत्राय त्रिवृते राथन्तराय**

---

* अत्र भूमिका दृष्टव्या ।   १. यद्याश्वलायनो यजमानः स्यादनुमत्या अष्टमं निरुप्य वैश्वानराय नवमं निर्वपेत् ।

वासन्ताय वो जुष्टं प्रोक्षामीन्द्राय त्रैष्टुभाय पञ्चदशाय बार्हताय ग्रैष्माय वो जुष्टं प्रोक्षामि विश्वेभ्यो देवेभ्यो जागतेभ्यस्सप्तदशेभ्यो वैरूपेभ्यो वार्षिकेभ्यो वो जुष्टं प्रोक्षामि बृहस्पतये पाङ्क्ताय त्रिणवाय शाक्वराय हैमन्तिकाय वो जुष्टं प्रोक्षामि सवित्र आतिच्छन्दसाय त्रयस्त्रि७ँशाय रैवताय शैशिराय वो जुष्टं प्रोक्षाम्यदित्यै विष्णुपत्न्यै वो जुष्टं प्रोक्षाम्यग्नये वैश्वानराय वो जुष्टं प्रोक्षाम्यनुमत्यै वो जुष्टं प्रोक्षामि काय वो जुष्टं प्रोक्षामि । शुन्दध्वमित्यादि सर्वाभिरद्भिस्त्रिः प्रोक्षति । कृष्णाजिनादानादि हविष्कृता वाचं विसृज्य पशुं विशास्ति । **अव रक्षो दिव** इत्यवहननादि कर्म प्रतिपद्यते । उत्करे त्रिर्निनीय । **यथाभागं व्यावर्तध्वम् । इदमग्नीषोमयोरग्नेर्गायत्रस्य त्रिवृतो राथन्तरस्य वासन्तस्येन्द्रस्य त्रैष्टुभस्य पञ्चदशस्य बार्हतस्य ग्रैष्मस्य विश्वेषां देवानां जागताना७ँ सप्तदशानां वैरूपानां वार्षिकाणा७ँ सवितुरातिच्छन्दसस्य त्रयस्त्रि७ँशस्य रैवतस्य शैशिरस्याग्नेर्वैश्वानरस्य कस्य ।** पुरोडाशार्थान् । **इदं बृहस्पतेः पाङ्क्तस्य त्रिणवस्य शाक्वरस्य हैमन्तिकस्यादित्या विष्णुपत्न्या अनुमत्याः** चर्वर्थान् । कृष्णाजिनादानादि । **देवस्य त्वा --- हस्ताभ्यामग्नीषोमाभ्यां जुष्टमधिवपाम्यग्नये गायत्राय त्रिवृते राथन्तराय वासन्ताय जुष्टमधिवपामीन्द्राय त्रैष्टुभाय पञ्चदशाय बार्हताय ग्रैष्माय जुष्टमधिवपामि विश्वेभ्यो देवेभ्यो जागतेभ्यस्सप्तदशेभ्यो वैरूपेभ्यो वार्षिकेभ्यो जुष्टमधिवपामि सवित्र आतिच्छन्दसाय त्रयस्त्रि७ँशाय रैवताय शैशिराय जुष्टमधिवपाम्यग्नये वैश्वानराय जुष्टमधिवपामि काय जुष्टमधि वपामि धान्यमसि धिनुहि देवान् ।**

एवमधिवापस्सँवापः । **देवस्य त्वा --- हस्ताभ्यामग्नीषोमाभ्यां जुष्ट७ँ सँव्वपाम्यग्नये गायत्राय त्रिवृते राथन्तराय वासन्ताय जुष्ट७ँ सँव्वपामीन्द्राय त्रैष्टुभाय पञ्चदशाय बार्हताय ग्रैष्माय जुष्ट७ँ सँव्वपामि विश्वेभ्यो देवेभ्यो जागतेभ्यस्सप्तदशेभ्यो वैरूपेभ्यो वार्षिकेभ्यो जुष्ट७ँ सँव्वपामि सवित्र आतिच्छन्दसाय त्रयस्त्रि७ँशाय रैवताय शैशिराय जुष्ट७ँ सँव्वपाम्यग्नये वैश्वानराय जुष्ट७ँ सँव्वपामि काय जुष्ट७ँ सँव्वपामि ।**

कपालामुपधानकाले अग्नीषोमीयस्यैकादश । अग्नेर्गायत्रस्याष्टौ । इन्द्रस्य त्रैष्टुभस्यैकादश अष्टाभ्य ऊर्ध्वं तूष्णीम् । विश्वेषां देवानां जागतानां द्वादश अष्टाभ्य ऊर्ध्वं तूष्णीम् । बार्हस्पत्यस्य

ध्रुवोऽसीति चरुस्थालीम् । सवितुरातिच्छन्दसस्य द्वादशकपालानि युग्मानामावृत्तिः । ध्रुवोऽसीत्यदित्या विष्णुपत्न्याश्चरुस्थालीम् । वैश्वानरस्य द्वादशकपालानि युग्मानामावृत्तिः । ध्रुवोऽसीति अनुमत्याश्चरुस्थालीम् । कस्यैककपालमुपदधाति ।

उपधाय कपालानि सायन्दोहवत्प्रातर्दोहं दोहयति एता आचरन्तीत्यादि संक्षालन निनयनान्तम् । **कामधुक्षः प्रणो ब्रूहि मित्रावरुणाभ्यामानुष्टुबाभ्यामेकवि७्शाभ्यां वैराजाभ्या७् शारदाभ्या७् हविरिन्द्रियम् । बहुदुग्धि मित्रावरुणाभ्यामानुष्टुबाभ्यामेकवि७्शाभ्यां वैराजाभ्या७् शारदाभ्यां देवेभ्यो हव्यमाप्यायतां पुनः--- कल्पताम् ।** एवं त्रिः । अनन्वारभ्येत्यादि संक्षालननिनयनान्तम् । भृगूणामङ्गिरसामित्यादि । तप्यस्वेत्येककपालस्य । अधिवापवत्सँवापः । पिष्टान्युत्पूय तण्डुलानुत्पुनाति । अपश्चोत्पूय स्थाल्यामासिञ्चति । अन्या वा आपो यजुषोत्पूय समापो अद्भिरित्यादि । **यथाभागं व्यावर्तध्वं** आग्नेयं गायत्रं विभज्य । **यथाभागं व्यावर्तध्वं** ऐन्द्रं त्रैष्टुभं विभज्य । **यथाभागं व्यावर्तध्वं** वैश्वदेवं जागतं विभज्य । **यथाभागं व्यावर्तध्वं** इति बार्हस्पत्यतण्डुलान् विभज्य । **यथाभागं व्यावर्तध्वं** सावित्रमातिच्छन्दसं पुरोडाशं विभज्य । **यथाभागं व्यावर्तेथाम्** इति तण्डुलान् विभज्य । **इदमदित्या विष्णुपत्न्याः, इदमनुमत्याः** चर्वर्थान् । **यथाभागं व्यावर्तेथां** इतरौ । **इदमग्नेर्वैश्वानरस्य, इदं कस्य** पुरोडाशार्थान् । अन्त्ययोरेव निर्देशः ।

इदमह७् सेनाया इत्यादि । अधिश्रयणकाले चतुरः पुरोडाशानधिश्रित्य । तप्ते प्रातर्दोहे लौकिकं दध्यानयति । एककपालमधिश्रित्य । प्रथनादि पुरोडाशानाम् । अन्तरितं सर्वेषाम् । आप्यलेपं बर्हिषि निनीय । घृतागेहीत्यादि पशुवत् । उद्वासनकाले तूष्णीं अग्नीषोमीयस्य अभिघार्य । **आप्यायतां तेजसाग्नये --- वासन्ताय जुष्टमभिघारयामि ।** तूष्णीमैन्द्रवैश्वदेवौ अभिघार्य यस्त आत्मेत्यामिक्षाम् । **आप्यायतां --- तेजसा बृहस्पतये पाङ्क्ताय त्रिणवाय शाक्वराय हैमन्तिकाय जुष्टमभिघारयामि । आप्यायतां---तेजसा सवित्र---शैशिराय जुष्टमभिघारयामि । आप्यायतां--- तेजसादित्यै विष्णुपत्न्यै जुष्टमभिघारयामि । आप्यायतां---तेजसा अग्नये वैश्वानराय जुष्टमभिघारयामि । आप्यायतां---तेजसा अनुमत्यै जुष्टमभिघारयामि । आप्यायतां---तेजसा काय जुष्टमभिघारयामि ।** स्योनं

त इत्यादि । दृ७्हेत्यादि आमिक्षाम् । संहत्येत्यादि वाजिना एकदेशेन उपसिञ्चतीत्यन्तम् । आर्द्रो भुवनस्येत्यादि चरोरुद्वासनम् । अलंकरणकाले आमिक्षावर्जं सर्वेषामलङ्करणम् । आज्येनैककपालमभिपूरयति । प्रियेणेत्यासादनम् । यज्ञोऽसीति षट् । **इदमिन्द्रियम्, अयं यज्ञः । यो नः कनीयः---अपतमिन्द्रस्त्रैष्टुभः पञ्चदशो बार्हतो ग्रैष्मो भुवनान्नुदतां । ममाग्ने** पञ्चहोता पुनः पञ्चहोता ।

अग्नीषोमीयेन प्रचर्य । अनुनिरुप्तानां हवीषां उपांशुप्रचारः । ***अग्नये गायत्राय त्रिवृते राथन्तराय वासन्तय, अनुब्रूहि । अग्निं गायत्रं त्रिवृतं राथन्तरं वासन्तम्, यज*** । अग्नये गायत्राय त्रिवृते राथन्तराय वासन्तायेदम् । **अग्नेर्गायत्रस्य त्रिवृतो राथन्तरस्य वासन्तस्याहं देवयज्ययान्नादो भूयासम् ।** ***इन्द्राय त्रैष्टुभाय पञ्चदशाय बार्हताय ग्रैष्माय, अनुब्रूहि । इन्द्रं त्रैष्टुभं पञ्चदशं बार्हतं ग्रैष्मम्, यज*** । इन्द्राय त्रैष्टुभाय पञ्चदशाय बार्हताय ग्रैष्मायेदम् । **इन्द्रस्य त्रैष्टुभस्य पञ्चदशस्य बार्हतस्य ग्रैष्मस्याहं देवयज्ययेन्द्रियाव्यन्नादो भूयासम् ।** ***विश्वेभ्यो देवेभ्यो जागतेभ्यस्सप्तदशेभ्यो वैरूपेभ्यो वार्षिकेभ्यः, अनुब्रूहि । विश्वान् देवान् जागतान् सप्तदशान् वैरूपान् वार्षिकान्, यज*** । विश्वेभ्यो देवेभ्यो जागतेभ्यस्सप्तदशेभ्यो वैरूपेभ्यो वार्षिकेभ्य इदम् । **विश्वेषां देवानां जागतानां सप्तदशानां वैरूपानां वार्षिकाणामहं प्राणैस्सायुज्यं गमेयम् ।** ***मित्रावरुणाभ्या-मानुष्टुभाभ्यामेकवि७्शाभ्यां वैराजाभ्याम् शारदाभ्याम् , अनुब्रूहि । मित्रावरुणावानुष्टुभा-वेकवि७्शौ वैराजौ शारदौ, यज*** । मित्रावरुणाभ्यामानुष्टुभाभ्यां एकवि७्शाभ्यां वैराजाभ्यां शारदाभ्यामिदम् । **मित्रावरुणयोरानुष्टुभयोरेकवि७्शयोर्वैराजयोश्शारदयोरहं देवयज्यया जेमानं महिमानं गमेयम् ।** ***बृहस्पतये पाङ्क्ताय त्रिणवाय शाक्वराय हैमन्तिकाय, अनुब्रूहि । बृहस्पतिं पाङ्क्तं त्रिणवं शाक्वरं हैमन्तिकम्, यज*** । बृहस्पतये पाङ्क्ताय त्रिणवाय शाक्वराय हैमन्तिकायेदम् । **बृहस्पतेः पाङ्क्तस्य त्रिणवस्य शाक्वरस्य हैमन्तिकस्याहं देवयज्ययान्नादो भुयासम् ।** ***सवित्र आतिच्छन्दसाय त्रयस्त्रि७्शाय रैवताय शैशिराय, अनुब्रूहि । सवितारमातिच्छन्दसं त्रयस्त्रि७्शं रैवतं शैशिरम्, यज*** । सवित्र आतिच्छन्दसाय त्रयस्त्रि७्शाय रैवताय शैशिरायेदम् । **सवितुरातिच्छन्दसस्य त्रयस्त्रि७्शस्य रैवतस्य**

शैशिरस्याहं देवयज्ययान्नादो भूयासम् । *अदित्यै विष्णुपत्न्यै, अनुब्रूहि । अदितिं विष्णुपत्निम्, यज ।* अदित्यै विष्णुपत्न्या इदं । **अदित्या विष्णुपत्न्या अहं देवयज्यया प्र प्रजया च पशुभिश्च जनिषीय** । *अग्नये वैश्वानरय, अनुब्रहि । अग्निं वैश्वानरम्, यज ।* अग्नये वैश्वानरायेदम् । **अग्नेर्वैश्वानरस्याहं देवयज्ययान्नादो भूयासम्** । *अनुमत्यै, अनुब्रूहि । अनुमतिम्, यज ।* अनुमत्या इदम् । **अनुमत्या अहं देवयज्ययान्नादो भूयासम् ।** *काय, अनुब्रूहि । कम्, यज ।* कायेदम् । **कस्याहं देवयज्ययान्नादो भूयासम् ।** प्रत्याक्रम्य । न पार्वणनारिष्ठाः । स्विष्टकृदादि समानं पशुपुरोडाशवत् । आग्नेयविकाराणां विरुज्य प्राशित्रम् । इडामार्जनान्ते । स्रुवेण सकृत्पृषदाज्यस्योपहत्येत्यादि समानमा समाप्तेः ।

वसतीवरीपरिहरणादि अग्निष्टोमवत् । रात्रौ परिस्तरणान्ते व्रतम् । प्राजहिते दीक्षितस्य व्रतमित्यादि । अपरेणोत्तरवेदिं व्रतं प्रयच्छति । **अन्नपते । देवस्य त्वा । रात्रिमिष्टका । या ते अग्ने । शिवाःपीता ।** रात्रौ यजमानं जागरयन्ति । इत्यग्नीषोमीयम् ।

॥ इति सर्वपृष्ठेष्टिः ॥

॥ द्वित्रिषाहस्रचितिमन्त्राः ॥

अयं पुरो भुवस्तया ॥ तस्य प्राणो भौवायनस्तया ॥ वसन्तः प्राणायनस्तया ॥ गायत्री वासन्ती तया ॥ गायत्रियै गायत्रं तया ॥ गायत्रादुपा७्शुस्तया ॥ उपा७्शोस्त्रिवृ-त्तया ॥ त्रिवृतो रथन्तरं तया ॥ रथन्तराद्वसिष्ठ ऋषिस्तया ॥ प्रजापतिगृहीतया त्वया प्राणं गृह्णामि प्रजाभ्यस्तया ॥

अयं दक्षिणा विश्वकर्मा तया ॥ तस्य मनो वैश्वकर्मणं तया ॥ ग्रीष्मो मानसस्तया ॥ त्रिष्टुग्ग्रैष्मी तया ॥ त्रिष्टुभ ऐडं तया ॥ ऐडादन्तर्यामस्तया ॥ अन्तर्यामात्पञ्चदशस्तया ॥ पञ्चदशाद्बृहत्तया ॥ बृहतो भरद्वाज ऋषिस्तया ॥ प्रजापतिगृहीतया त्वया मनो गृह्णामि प्रजाभ्यस्तया ॥

अयं पश्चाद्विश्वव्यचास्तया ॥ तस्य चक्षुर्वैश्वव्यचसं तया ॥ वर्षाणि चाक्षुषाणि तया ॥ जगती वार्षी तया ॥ जगत्या ऋक्षमं तया ॥ ऋक्षमाच्छुक्रस्तया ॥ शुक्रात्सप्तदश-स्तया ॥ सप्तदशाद्वैरूपं तया ॥ वैरूपाद्विश्वामित्र ऋषिस्तया ॥ प्रजापतिगृहीतया त्वया चक्षुर्गृह्णामि प्रजाभ्यस्तया ॥

इदमुत्तरात्सुवस्तया ॥ तस्य श्रोत्र७् सौवं तया ॥ शरच्छ्रौत्री तया ॥ अनुष्टुप्छारदी तया ॥ अनुष्टुभस्स्वारं तया ॥ स्वारान्मन्थी तया ॥ मन्थिन एकवि७्शस्तया ॥ एकवि७्शाद्वैराजं तया ॥ वैराजाज्जमदग्निर्ऋषिस्तया ॥ प्रजापतिगृहीतया त्वया श्रोत्रं गृह्णामि प्रजाभ्यस्तया ॥

इयमुपरि मतिस्तया ॥ तस्यै वाङ्माती तया ॥ हेमन्तो वाच्यायनस्तया ॥ पङ्क्तिर्हैमन्ती तया ॥ पङ्क्त्यै निधनवत्तया ॥ निधनवत आग्रयणस्तया ॥ आग्रयणात्त्रिणवत्रयस्त्रि७्शौ तया ॥ त्रिणवत्रयस्त्रि७्शाभ्या७् शाक्वररैवते तया ॥ शाक्वररैवताभ्यां विश्वकर्मर्षिस्तया ॥ प्रजापतिगृहीतया त्वया वाचं गृह्णामि प्रजाभ्यस्तया ॥ इति पञ्चाशतं प्राणभृतः । दशदश प्रतिदिशमक्ष्णया दश । मध्येऽन्तरामुपधाय बाह्यां बाह्याम् ॥

प्राची दिशां तया ॥ वसन्त ऋतूनां तया ॥ अग्निर्देवता तया ॥ ब्रह्म द्रविणं तया ॥

त्रिवृत्स्तोमस्तया ॥ स उ पञ्चदशवर्तनिस्तया ॥ त्र्यविर्वयस्तया ॥ कृतमयानां तया ॥ पुरोवातो वातस्तया ॥ सानग ऋषिस्तया ॥

दक्षिणा दिशां तया ॥ ग्रीष्म ऋतूनां तया ॥ इन्द्रो देवता तया ॥ क्षत्रं द्रविणं तया ॥ पञ्चदशस्तोमस्तया ॥ स उ सप्तदशवर्तनिस्तया ॥ दित्यवाड्वयस्तया ॥ त्रेताऽयानां तया ॥ दक्षिणाद्वातो वातस्तया ॥ सनातन ऋषिस्तया ॥

प्रतीची दिशां तया ॥ वर्षा ऋतूनां तया ॥ विश्वे देवा देवतास्तया ॥ विड्द्रविणं तया ॥ सप्तदशस्तोमस्तया ॥ स उ वेकविꣳशवर्तनिस्तया ॥ त्रिवत्सो वयस्तया ॥ द्वापरोऽयानां तया ॥ पश्चाद्वातो वातस्तया ॥ अहभून ऋषिस्तया ॥

उदीची दिशां तया ॥ शरदृतूनां तया ॥ मित्रावरुणौ देवता तया ॥ पुष्टं द्रविणं तया ॥ एकविꣳशस्तोमस्तया ॥ स उ त्रिणववर्तनिस्तया ॥ तुर्यवाड्वयस्तया ॥ आस्कन्दोऽयानां तया ॥ उत्तराद्वातो वातस्तया ॥ प्रत्न ऋषिस्तया ॥

ऊर्ध्वा दिशां तया ॥ हेमन्तशिशिरावृतूनां तया ॥ बृहस्पतिर्देवता तया ॥ वर्चो द्रविणं तया ॥ त्रिणवस्तोमस्तया ॥ स उ त्रयस्त्रिꣳशवर्तनिस्तया ॥ पष्ठवाद्वयस्तया ॥ अभिभूरयानां तया ॥ विष्वग्वातो वातस्तया ॥ सुपर्ण ऋषिस्तया ॥ पञ्चाशतमपानभृतो यथा प्राणाभृतः । बाह्यामुपाधायान्तरामन्तराम् ।

या देव्यसीष्टक आयुर्दा उपशीवरी । सामामुपशेष्व जायेव पतिमित्सदा तया ॥ या देव्यसीष्टके प्राणदा उपशीवरी --- पतिमित्सदा तया ॥ या देव्यसीष्टकेऽपानदा उपशीवरी --- पतिमित्सदा तया ॥ या देव्यसीष्टके व्यानदा उपशीवरी --- पतिमित्सदा तया ॥ या देव्यसीष्टके चक्षुर्दा उपशीवरी --- पतिमित्सदा तया ॥ या देव्यसीष्टके श्रोत्रदा उपशीवरी --- पतिमित्सदा तया ॥ या देव्यसीष्टके वाग्दा उपशीवरी --- पतिमित्सदा तया ॥ या देव्यसीष्टके आत्मदा उपशीवरी --- पतिमित्सदा तया ॥ या देव्यसीष्टके पृथिविदा उपशीवरी --- पतिमित्सदा तया ॥ या देव्यसीष्टके अन्तरिक्षदा उपशीवरी --- पतिमित्सदा तया ॥ या देव्यसीष्टके द्यौर्दा उपशीवरी --- पतिमित्सदा तया ॥ या देव्यसीष्टके स्वर्दा उपशीवरी ---

पतिमित्सदा तया ॥ या देव्यसीष्टके कुमारीदा उपशीवरी --- पतिमित्सदा तया ॥ या देव्यसीष्टके प्रफर्व्यदा उपशीवरी --- पतिमित्सदा तया ॥ या देव्यसीष्टके प्रथमौपशदा उपशीवरी --- पतिमित्सदा तया ॥ या देव्यसीष्टके युवतीदा उपशीवरी --- पतिमित्सदा तया षोडशोपशीवरीः ॥

अभिषाच्च तया ॥ अभिषवी च तया ॥ अभिवयाश्च तया ॥ ऊर्ध्ववयाश्च तया ॥ बृहद्वयाश्च तया ॥ सवयाश्च तया ॥ सहसह्वाँश्च तया ॥ सहमानश्च तया ॥ सहस्वाँश्च तया ॥ सहीयाँश्च तया दशेन्द्रनामानि ॥

अग्निना विश्वाषाट् तया ॥ सूर्येण स्वराट् तया ॥ क्रत्वा शचीपतिस्तया ॥ ऋषभेण त्वष्टा तया ॥ यज्ञेन मघवान्तया ॥ दक्षिणया सुवर्गस्तया ॥ मन्युना वृत्रहा तया ॥ सौहार्द्येन तनूधास्तया ॥ अन्नेन गयस्तया ॥ पृथिव्याऽसनोत्तया ॥ ऋग्भिरन्नादस्तया ॥ वषट्कारेणर्धस्तया ॥ साम्ना तनूपास्तया ॥ विराजा ज्योतिष्मान्तया ॥ ब्रह्मणा सोमपास्तया ॥ गोभिर्यज्ञं दाधार तया ॥ क्षत्रेण मनुष्यान्तया ॥ अश्वेन च रथेन च वज्री तया ॥ ऋतुभिः प्रभुस्तया ॥ संवथ्सरेण परिभूस्तया ॥ तपसाऽनाधृष्टस्तया ॥ सूर्यः सन्तनूभिस्तया द्वाविंशतिमिन्द्रतनवः ॥

प्रजापतिर्मनसाऽन्धोऽच्छेतस्तया ॥ धाता दीक्षायान्तया ॥ सविता भृत्यान्तया ॥ पूषा सोमक्रयण्यान्तया ॥ वरुण उपनद्धस्तया ॥ असुरः क्रीयमाणस्तया ॥ मित्रः क्रीतस्तया ॥ शिपिविष्ट आसादितस्तया ॥ नरन्धिषः प्रोह्यमाणस्तया ॥ अधिपतिरागत-स्तया ॥ प्रजापतिः प्रणीयमानस्तया ॥ अग्निराग्नीध्रे तया ॥ बृहस्पतिराग्नीध्रात् प्रणीयमानस्तया ॥ इन्द्रो हविर्धाने तया ॥ अदितिरासादितस्तया ॥ विष्णुरुपावह्रियमाण-स्तया ॥ अथर्वोपोत्तस्तया ॥ यमोऽभिषुतस्तया ॥ अपूतपा आधूयमानस्तया ॥ वायुः पूयमानस्तया ॥ मित्रः, क्षीरश्रीस्तया ॥ मन्थी सुक्तुश्रीस्तया ॥ वैश्वदेव उन्नीतस्तया ॥ रुद्र आहुतस्तया ॥ वायुरावृत्तस्तया ॥ नृचक्षाः प्रतिख्यातस्तया ॥ भक्ष आगतस्तया ॥ पितृणां नाराशँसस्तया ॥ असुरात्तस्तया ॥ सिन्धुरवभृथमवप्रयन्तया ॥ समुद्रोऽवगत-स्तया ॥ सलिलः प्रप्लुतस्तया ॥ सुवरुदृचं गतस्तया त्रयस्त्रिंशत् यज्ञतनवः ॥

ज्योतिष्मतीं त्वा सादयामि तया ॥ ज्योतिष्कृतं त्वा सादयामि तया ॥ ज्योतिर्विदं त्वा सादयामि तया ॥ भास्वतीं त्वा सादयामि तया ॥ ज्वलन्तीं त्वा सादयामि तया ॥ मल्मला भवन्तीं त्वा सादयामि तया ॥ दीप्यमानां त्वा सादयामि तया ॥ रोचमानां त्वा सादयामि तया ॥ अजस्रां त्वा सादयामि तया ॥ बृहज्ज्योतिषं त्वा सादयामि तया ॥ बोधयन्तीं त्वा सादयामि तया ॥ जाग्रतीं त्वा सादयामि तया द्वादश ज्योतिष्मतीः ॥

पूर्णा पश्चादुत पूर्णा पुरस्तादुन्मध्यतः पौर्णमासी जिगाय । तस्यां देवा अधि संवसन्त उत्तमे नाक इह मादयन्तां तया पौर्णमासीं पुरस्तादुपधाय ॥

कृतिका नक्षत्रमग्निर्देवताऽग्ने रुचः स्थ प्रजापतेर्धातुः सोमस्यर्चे त्वा रुचे त्वा द्युते त्वा भासे त्वा ज्योतिषे त्वा तया ॥ रोहिणी नक्षत्रं प्रजापतिर्देवतर्चे त्वा --- ज्योतिषे त्वा तया ॥ मृगशीर्षं नक्षत्रꣳ सोमो देवतर्चे त्वा --- ज्योतिषे त्वा तया ॥ आर्द्रा नक्षत्रꣳ रुद्रो देवतर्चे त्वा --- ज्योतिषे त्वा तया ॥ पुनर्वसू नक्षत्रमदितिर्देवतर्चे त्वा --- ज्योतिषे त्वा तया ॥ तिष्यो नक्षत्रं बृहस्पतिर्देवतर्चे त्वा --- ज्योतिषे त्वा तया ॥ आश्रेषा नक्षत्रꣳ सर्पा देवतर्चे त्वा --- ज्योतिषे त्वा तया ॥ मघा नक्षत्रं पितरो देवतर्चे त्वा --- ज्योतिषे त्वा तया ॥ फल्गुनी नक्षत्रमर्यमा देवतर्चे त्वा --- ज्योतिषे त्वा तया ॥ फल्गुनी नक्षत्रं भगो देवतर्चे त्वा --- ज्योतिषे त्वा तया ॥ हस्तो नक्षत्रꣳ सविता देवतर्चे त्वा --- ज्योतिषे त्वा तया ॥ चित्रा नक्षत्रमिन्द्रो देवतर्चे त्वा --- ज्योतिषे त्वा तया ॥ स्वाती नक्षत्रं वायुर्देवतर्चे त्वा --- ज्योतिषे त्वा तया ॥ विशाखे नक्षत्रमिन्द्राग्नी देवतर्चे त्वा --- ज्योतिषे त्वा तया पुरस्तात्प्रतीचीमसंस्पृष्टाः । पूर्वामुपधाया परामपरामाविशाखाभ्यां दक्षिणेन स्वयमातृण्णां रीतिं प्रतिपादयति ।

यत्ते देवा अदधुर्भागधेयममावास्ये संवसन्तो महित्वा । सा नो यज्ञं पिपृहि विश्ववारे रयिं नो धेहि सुभगे सुवीरं तया अमावास्यां पश्चादुपधायावशिष्टानां पूर्वां पूर्वामापभरणीभ्यः ।

अनूराधा नक्षत्रं मित्रो देवतर्चे त्वा --- ज्योतिषे त्वा तया ॥ रोहिणी नक्षत्रमिन्द्रो देवतर्चे त्वा --- ज्योतिषे त्वा तया ॥ विचृतौ नक्षत्रं पितरो देवतर्चे त्वा --- ज्योतिषे त्वा तया ॥ अषाढा नक्षत्रमापो देवतर्चे त्वा --- ज्योतिषे त्वा तया ॥ अषाढा नक्षत्रं विश्वे देवा देवतर्चे त्वा --- ज्योतिषे त्वा तया ॥ श्रोणा नक्षत्रं विष्णुर्देवतर्चे त्वा --- ज्योतिषे त्वा तया ॥ श्रविष्ठा नक्षत्रं वसवो देवतर्चे त्वा --- ज्योतिषे त्वा तया ॥ शतभिषङ्नक्षत्रमिन्द्रो देवतर्चे त्वा --- ज्योतिषे त्वा तया ॥ प्रोष्ठपदा नक्षत्रमज एकपाद्देवतर्चे त्वा --- ज्योतिषे त्वा तया ॥ प्रोष्ठपदा नक्षत्रमहिर्बुध्नियो देवतर्चे त्वा --- ज्योतिषे त्वा तया ॥ रेवती नक्षत्रं पूषा देवतर्चे त्वा --- ज्योतिषे त्वा तया ॥ अश्वयुजौ नक्षत्रमश्विनौ देवतर्चे त्वा --- ज्योतिषे त्वा तया ॥ अपभरणीर्नक्षत्रं यमो देवतर्चे त्वा --- ज्योतिषे त्वा तया
उत्तरेण स्वयमातृण्णां रीतिं प्रतिपादयति ।

पूर्णा पश्चादुत पूर्णा पुरस्तादुन्मध्यतः पौर्णमासी जिगाय । तस्यां देवा अधि संवसन्त उत्तमे नाक इह मादयन्तां तया पौर्णमासीमन्ततः । ऋचे त्वा रुचे त्वेति सर्वासु नक्षत्रेष्टकास्वनुषजति ।

हिरण्यगर्भस्समवर्तताग्रे भूतस्य जातः पतिरेक आसीत् । स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम तया ॥ यः प्राणतो निमिषतो महित्वैक इद्राजा जगतो बभूव । य ईशे अस्य द्विपदश्चतुष्पदः कस्मै देवाय हविषा विधेम तया ॥ य आत्मदा बलदा यस्य विश्व उपासते प्रशिषं यस्य देवाः । यस्य छायाऽमृतं यस्य मृत्युः कस्मै देवाय हविषा विधेम तया ॥ यस्येमे हिमवन्तो महित्वा यस्य समुद्रꣳ रसया सहाहुः । यस्येमाः प्रदिशो यस्य बाहू कस्मै देवाय हविषा विधेम तया ॥ यं क्रन्दसी अवसा तस्तभाने अभ्यैक्षेतां मनसा रेजमाने । यत्राधि सूर उदितौ व्येति कस्मै देवाय हविषा विधेम तया ॥ येन द्यौरुग्रा पृथिवी च दृढे येन सुवस्तभितं येन नाकः । यो अन्तरिक्षे रजसो विमानः कस्मै देवाय हविषा विधेम तया ॥ आपो ह यन्महतीर्विश्वमायन्दक्षं दधाना जनयन्तीरग्निम् । ततो देवानां निरवर्ततासुरेकः कस्मै

देवाय हविषा विधेम तया ॥ यश्चिदापो महिना पर्यपश्यद्दक्षं दधाना जनयन्ती–रग्निम् । यो देवेष्वधि देव एक आसीत्कस्मै देवाय हविषा विधेम तया इत्यष्टौ सरितः ॥

अग्न आयाहि वीतये गृणानो हव्यदातये । नि होता सत्सि बर्हिषि तया ॥ अग्निं दूतं वृणीमहे होतारं विश्वदेदसम् । अस्य यज्ञस्य सुक्रतुं तया ॥ अग्निनाग्निस्समिध्यते कविर्गृहपतिर्युवा । हव्यवाड् जुह्वास्यस्तया ॥ अग्निर्वृत्राणि जङ्घनद्द्रविणस्युर्विपन्यया । समिद्धश्शुक्र आहुतस्तया ॥ ***अग्ने स्तोमं मनामहे सिध्रमद्य दिविस्पृशम् । देवस्य द्रविणस्यवस्तया*** इति पञ्चाह्नां रूपाणि ॥

अथ व्रतमुपदधाति **देवस्य त्वा सवितुः प्रसवे --- गायत्रेण छन्दसा रात्रिमिष्टकामुपदधे तया ॥ देवस्य त्वा सवितुः प्रसवे --- त्रैष्टुभेन छन्दसाहरिष्टकामुपदधे तया** इति ॥

प्राच्या त्वा दिशा सादयामि गायत्रेण छन्दसाऽग्निना देवतयाऽग्नेश्शीर्ष्णाऽग्नेश्शिर उप दधामि तया ॥ दक्षिणया त्वा दिशा सादयामि त्रैष्टुभेन छन्दसेन्द्रेण देवतयाऽग्नेः पक्षेणाग्नेः पक्षमुप दधामि तया ॥ प्रतीच्या त्वा दिशा सादयामि जागतेन छन्दसा सवित्रा देव तयाऽग्नेः पुच्छेनाग्नेः पुच्छमुप दधामि तया ॥ उदीच्या त्वा दिशा सादयाम्यानुष्टुभेन छन्दसा मित्रावरुणाभ्यां देवतयाऽग्नेः पक्षेणाग्नेः पक्षमुप दधामि तया ॥ ऊर्ध्वया त्वा दिशा सादयामि पाङ्क्तेन छन्दसा बृहस्पतिना देवतयाऽग्नेः पृष्ठेनाग्नेः पृष्ठमुप दधामि तया इति पञ्चात्मेष्टकाः प्रतिदिशमेकां मध्ये ॥

सँय्यच्च प्रचेताश्चाग्नेः सोमस्य सूर्यस्य ते तेऽधिपतयस्तेभ्यो नमस्ते नो मृडयन्तु ते यं द्विष्मो यश्च नो द्वेष्टि तं वो जम्भे दधामि ॥ उग्रा च भीमा च पितृणां यमस्येन्द्रस्य ते तेऽधिपतयस्तेभ्यो --- जम्भे दधामि ॥ ध्रुवा च पृथिवी च देवस्य सवितुर्मरुतां वरुणस्य ते तेऽधिपतयस्तेभ्यो --- जम्भे दधामि ॥ धर्त्री च धरित्री च मित्रावरुणयोर्मित्रस्य धातुस्ते तेऽधिपतयस्तेभ्यो --- जम्भे दधामि ॥ प्राची च प्रतीची च वसूना९ं रुद्राणामादित्यानां ते तेऽधिपतयस्तेभ्यो --- जम्भे

दधामि इति पञ्च वैश्वदेवीः द्वेष्यं मनसा ध्यायन् ॥

कया नश्चित्र आभुवदूती सदावृधस्सखा । कया शचिष्ठया वृता तया ॥ कस्त्वा सत्यो मदानां म७ँहिष्ठो मत्सदन्धसः । दृढा चिदारुजे वसु तया ॥ अभी षु णस्सखीनामविता जरितॄणाम् । शतं भवास्यूतिभिस्तया इति वामदेव्यम् ॥

इन्द्रो दधीचो अस्थभिः । वृत्राण्यप्रतिष्कुतः । जघान नवतीर्नव तया ॥ इच्छन्नश्वस्य यच्छिरः । पर्वतेष्वपश्रितम् । तद्विदच्छर्यणावति तया ॥ अत्रा ह गोरमन्वत । नाम त्वष्टुरपीच्यम् । इत्था चन्द्रमसो गृहे तया ॥ इन्द्रमिद्गाथिनोबृहत् । इन्द्रमर्केभिर्र्किणः । इन्द्रं वाणीरनूषत तया ॥ इन्द्र इद्धर्योः सचा । संमिश्ल आवचो युजा । इन्द्रो वज्री हिरण्ययः तया ॥ इन्द्रो दीर्घाय चक्षसे । आसूर्य७ँ रोहयद्दिवि । विगोभिरद्रिमैरयत् तया ॥ इन्द्र वाजेषु नो अव । सहस्र प्रधनेषु च । उग्र उग्राभिरूतिभिः तया ॥ तमिन्द्रं वाजयामसि । महे वृत्राय हन्तवे । स वृषा वृषभो भुवत् तया ॥ इन्द्रः स दामने कृतः । ओजिष्ठः स बले हितः । द्युम्नी श्लोकी स सौम्यस्तया ॥ गिरा वज्रो न संभृतः । सबलो अनपच्युतः । ववक्षुरुग्रो अस्तृतस्तया इत्यथर्वशिरो दशातिषक्ताः ॥

अभि त्वा शूर नोनुमोऽदुग्धा इव धेनवः । ईशानमस्य जगतस्सुवर्दृशमीशानमिन्द्र तस्थुषस्तया ॥ ईशानमिन्द्र तस्थुषो न त्वावाँ अन्यो दिव्यो न पार्थिवः । न जातो न जनिष्यते तया ॥ न जातो न जनिष्यतेऽश्वायन्तो मघवन्निन्द्रवाजिनः । गव्यन्तस्त्वा हवामहे तया इति रथन्तरं दक्षिणे पक्षेऽध्यात्मन्नपवर्गः प्रथमामुपधाय द्वितीयामथ विशयाम् ॥

त्वामिद्धि हवामहे साता वाजस्य कारवः । त्वां वृत्रेष्विन्द्र सत्पतिं नरस्त्वां काष्ठास्वर्वतस्तया ॥ त्वां काष्ठास्वर्वतः स त्वं नश्चित्र वज्रहस्त धृष्णुया । महस्तवानो अद्रिवस्तया ॥ महस्तवानो अद्रिवो गामश्वं रथ्यमिन्द्र सं किर । सत्रा वाजं न जिग्युषे तया इति बृहदुत्तरे पक्षे तस्य रथन्तरवत्कल्पः ॥

यज्ञा यज्ञा वो अग्नये गिरागिरा च दक्षसे । प्रप्र वयममृतं जातवेदसं प्रियं मित्रं न शंसिषन्तया ॥ प्रियं मित्रं न शंसिषमूर्जो नपातं स हिनायमस्मयुः । दाशेम

हव्यदातये तया ॥ दाशेम हव्यदातये भुवद्वाजेष्ववि‍ता भुवद्वृधः । उत त्राता तनूनां तया इति यज्ञायज्ञियं पुच्छे । तस्य रथन्तरवत्कल्पः ॥

विश्वकर्मा दिशां --- पातु तस्मै नमस्तया । प्रजापतिर्दिशां --- पातु तस्मै नमस्तया । रुद्रो दिशां --- पातु तस्मै नमस्तया । वरुणो दिशां --- पातु तस्मै नमस्तया पञ्च हिरण्येष्टकाः प्रतिदिशमेकां मध्ये ॥

प्राणाय त्वा चक्षुषे त्वा तया । व्यानाय त्वा चक्षुषे त्वा तया । अपानाय त्वा चक्षुषे त्वा तया । वाचे त्वा चक्षुषे त्वा तया चतस्रः स्वयमातृण्णाः प्रतिदिशम् ॥

त्वामग्ने वृषभं --- शिशाधि तया ऋषभेष्टकामुपदधाय ।

संवथ्सरस्य प्रतिमां --- विश्वमायुर्व्यश्नवत्तया ॥

शतायुधाय शतवीर्याय --- दुरितानि विश्वा तया ॥ ये चत्वारः पथयो --- परि दत्तेह सर्वे तया । ग्रीष्मो हेमन्त --- एषामभये स्याम तया ॥ इदुवथ्सराय परिवथ्सराय --- अहतास्स्याम तया ॥ भद्रान्नश्श्रेयस्समनैष्ट --- तनुवे स्योनस्तया ।

पृथिव्यै त्वा तया ॥ अन्तरिक्षाय त्वा तया ॥ दिवे त्वा तया इति तिस्रो लोकेष्टकाः ॥

अग्नये त्वा पवमानाय तया ॥ अग्नये त्वा पावकाय तया ॥ अग्नये त्वा शुचये तया इति तिस्रः पावमानीः ॥

ऋचा त्वा छन्दसा सादयामि तया ॥ वषट्कारेण त्वा छन्दसा सादयामि तया ॥ हिङ्कारेण त्वा छन्दसा सादयामि तया ॥ प्रस्तावेन त्वा छन्दसा सादयामि तया ॥ प्रतिहारेण त्वा छन्दसा सादयामि तया ॥ उद्गीथेन त्वा छन्दसा सादयामि तया ॥ निधनेन त्वा छन्दसा सादयामि तया इति सप्त छन्दस्याः *॥*

इन्द्रस्य वज्रोऽसि --- सोऽश्मानमृच्छतु तया ॥ इन्द्रस्य वज्रोऽसि --- सोऽश्मानमृच्छतु तया ॥ इन्द्रस्य वज्रोऽसि --- सोऽश्मानमृच्छतु तया ॥ इन्द्रस्य वज्रोऽसि --- सोऽश्मानमृच्छतु तया चतस्रो वज्रिणीः प्रतिदिशमश्मनः इषुहस्त उपदधाति ।

इन्द्रस्य वज्रोऽसि --- सोऽश्मानमृच्छतु तया मध्ये पञ्चमीमेके समामनन्ति ।

अग्ने यशस्विन् --- अस्तु तया ॥ भद्रं पश्यन्तः --- नमन्तु तया ॥ धाता विधाता --- नमाम तया ॥ अभ्यावर्तध्वं --- सर्वे तया ॥

प्रोथदश्वो न --- कृष्णमस्ति तया ॥*

आयोस्त्वा सदने सादयामि --- चक्षसे स्वयमातृण्णामभिमृश्याश्वेनावघ्राप्य **परमेष्ठी त्वा सादयतु दिवः पृष्ठे --- छर्दिषा शन्तमेन तया देवतयाङ्गिरस्वद्ध्रुवा सीद । सुवः** अविदुषा ब्राह्मणेन सह मध्येऽग्नेरुपदधाति । सुवरिति चैतया व्याहृत्या ।

॥ इति द्वित्रिषाहस्रचितिमन्त्राः ॥

* अत्र सूत्रपाठानुसारेण या देव्यसीष्टके इत्यारभ्य द्वित्रिषाहस्रचितौ विनियोक्तव्या मन्त्राः प्रदर्शिताः । इत एवाकृष्य त्वामग्न इत्यारभ्य प्रतीकेणात्रोदाहृता मन्त्राः साहस्रचितावपि विनियुक्ताः । प्राणापानभृतस्तु साहस्रे विकल्पेन विनियुक्ताः ॥

॥ कुन्तापशस्त्रप्रतिगरः + ॥

ब्राह्मणच्छंसी – विहिसोतोरसृक्षत, नेन्द्रं देवममंसत ।

प्रतिप्रस्थाता– ओथामोदैव ।

ब्राह्मणच्छंसी– यत्रो३ओओओओओओ३ओओओओओओ३ओओओ मदद्वृषा कपो३ ओओओ३मर्यः पुष्टेषु मत्सखा* । विश्वस्मादिन्द्र उत्तरो३म्पराहीन्द्र धावसि, वृषाकपेरति व्यथिः ।

प्रस्थाता–ओ३ओओओओओओ३ओओओओओओ३ओओओ मदेथमदैवो३–ओओओ३मोथामोदैव* । ऋगन्ते प्रणवे ओ३थामोदैव । अर्धर्चे विरामे **ओथामोदैव ।** वृषाकपिसूक्ते एवं प्रतिगरः ।

ब्रा–नोओ३ओओओओओओ३ओओओओओओ३ओओओ ह प्र विन्दसो३ ओओओ३मन्यत्र सोमपीतये ।

प्रस्थाता–ओ३ओओओओओओ३ओओओओओओ३ओओओ मदेथमदैवो३–ओओओ३मोथामोदैव ।

ब्रा–विश्वस्मादिन्द्र उत्तरों३ प्र–ओ३थामोदैव ।

ब्रा–किमयं त्वां वृषाकपिः,चकार हरितो मृगः । प्र–ओथामोदैव ।

ब्रा–यस्मो३ओओओओओओ३ओओओओओओ३ओओओ इरस्यसीदुनो३–ओओओ३मर्यो वा पुष्टिमद्वसु ।

+ अन्यान् प्रतिगरानपेक्ष्य एषां प्रतिगराणां क्लिष्टतरत्वाद्दीर्घतरत्वात् आधिक्याद्वैविध्याच्च ऋत्विक्सौकर्यार्थं सशस्त्रः पाठः अत्र दत्तः । एवं कैश्चित् प्रार्थितत्वात् विद्वद्भिश्च संसूचितत्वात् ।

* एष प्रथम पक्षः । द्वितीय पक्षे तु ब्राह्मणच्छंसी – यत्रो३ओओओओओओ३ओओओ ओओओ३ओओओ मदद्वृषा कपो३ ओओओ३मर्यः पुष्टेषु मत्सखा । विश्वस्मादिन्द्र उत्तरो३– म्पराहीन्द्र धावसि, वृषाकपेरति व्यथिः ।

* प्रस्थाता–ओ३ओओओओओओ३ओओओओओओ३ओओओ मदेथमदैवो३–ओओओ३मोथामोदैव । ऋगन्ते प्रणवे ओ३थामोदैव । अर्धर्चे विरामे ओथामोदैव ।

प्रस्थाता-ओ३ओओओओओओ३ओओओओओओ३ओओओ मदेथमदैवो३-ओओओ३मोथामोदैव ।

ब्रा-विश्वस्मादिन्द्र उत्तरो३म् प्र-ओ३थामोदैव ।

ब्रा-यमिमं त्वं वृषाकपिं, प्रियमिन्द्राभिरक्षसि । प्र-ओथामोदैव ।

ब्रा-श्वा न्वो३ओओओओओओ३ओओओओओओ३ओओओ स्य जम्भिषो३ ओओओ३मपि कर्णे वराहयुः ।

प्रस्थाता-ओ३ओओओओओओ३ओओओओओओ३ओओओ मदेथमदैवो३-ओओओ३मोथामोदैव ।

ब्रा-विश्वस्मादिद्र उत्तरो३म्

प्र-ओ३थामोदैव

ब्रा-प्रिया तष्टानि मे कपिः,व्यक्ताव्यदूदुषत् ।

प्र-ओथामोदैव

ब्रा- शिरो३ओओओओओओ३ओओओओओओ३ओओओ न्वस्य राविषो३ ओओओ३म् न सुगं दुष्कृते भुवम् ।

प्रस्थाता-ओ३ओओओओओओ३ओओओओओओ३ओओओ मदेथमदैवो३-ओओओ३मोथामोदैव ।

ब्रा-विश्वस्मादिन्द्र उत्तरो३म्

प्र-ओ३थामोदैव

ब्रा-न मत् स्त्री सुभसत्तरा, न सुयाशुतरा भुवत् ।

प्र-ओथामोदैव

ब्रा-न मो३ओओओओओओ३ओओओओओओ३ओओओ त्प्रतिच्यवीयसो३ ओओओ३म् न सक्थ्युद्यमीयसी ।

प्रस्थाता-ओ३ओओओओओओ३ओओओओओओ३ओओओ मदेथमदैवो३-

ओओओ३मोथामोदैव ।

ब्रा–विश्वस्मादिन्द्र उत्तरो३म्

प्र–ओ३थामोदैव

ब्रा–उवे अम्ब सुलाभिके, यथेवाङ्ग भविष्यति ।

प्र–ओथामोदैव

ब्रा–भसो३ओओओओओओ३ओओओओओओ३ओओओ न्मे अम्ब सक्थिमो३ ओओओ३म् शिरो मे वीव हृष्यति ।

प्रस्थाता–ओ३ओओओओओओ३ओओओओओओ३ओओओ मदेथमदैवो३–ओओओ३मोथामोदैव ।

ब्रा–विश्वस्मादिन्द्र उत्तरो३म्

प्र–ओ३थामोदैव

ब्रा–किं सुबाहो स्वङ्गुरे, पृथुष्टो पृथुजाघने ।

प्र–ओथामोदैव

ब्रा–किं शो३ओओओओओओ३ओओओओओओ३ओओओ रपत्नि नस्त्वो३ ओओओ३मभ्यमीषि वृषाकपिम् ।

प्रस्थाता–ओ३ओओओओओओ३ओओओओओओ३ओओओ मदेथमदैवो३–ओओओ३मोथामोदैव ।

ब्रा–विश्वस्मादिन्द्र उत्तरो३म्

प्र–ओ३थामोदैव

ब्रा–अवीरामिव मामयं, शरारुरभि मन्यते ।

प्र–ओथामोदैव

ब्रा–उतो३ओओओओओओ३ओओओओओओ३ओओओ हमस्मि वीरिणो३ ओओओ३मिन्द्रपत्नी मरुत्सखा ।

प्रस्थाता-ओ३ओओओओओओ३ओओओओओओ३ओओओ मदेथमदैवो३-ओओओ३मोथामोदैव ।

ब्रा-विश्वस्मादिन्द्र उत्तरो३म्

प्र-ओ३थामोदैव

ब्रा-संहोत्र स्म पुरा नारी, समनं वाव गच्छति ।

प्र-ओथामोदैव

ब्रा-वेधो३ओओओओओओ३ओओओओओओ३ओओओ ऋतस्य वीरिणो३ओओओ३मिन्द्रपत्नी महीयते ।

प्रस्थाता-ओ३ओओओओओओ३ओओओओओओ३ओओओ मदेथमदैवो३-ओओओ३मोथामोदैव ।

ब्रा-विश्वस्मादिन्द्र उत्तरो३म्

प्र-ओ३थामोदैव

ब्रा-इन्द्राणीमासु नारिषु, सुभगामहमश्रवम् ।

प्र-ओथामोदैव

ब्रा-न ह्यो३ओओओओओओ३ओओओओओओ३ओओओ स्या अपरं च नो३ ओओओ३म् जरसा मरते पतिः ।

प्रस्थाता-ओ३ओओओओओओ३ओओओओओओ३ओओओ मदेथमदैवो३-ओओओ३मोथामोदैव ।

ब्रा-विश्वस्मादिन्द्र उत्तरो३म्

प्र-ओ३थामोदैव

ब्रा-नाहमिन्द्राणि रारण, सख्युर्वृषाकपेर्ऋते ।

प्र-ओथामोदैव

ब्रा-यस्यो३ओओओओओओ३ओओओओओओ३ओओओ दमप्यं हवो३

ओओओ३म् प्रियं देवेषु गच्छति ।

प्रस्थाता-ओ३ओओओओओओ३ओओओओओओ३ओओओ मदेथमदैवो३-ओओओ३मोथामोदैव ।

ब्रा-विश्वस्मादिन्द्र उत्तरो३म्

प्र-ओ३थामोदैव ।

ब्रा-वृषाकपायि रेवति, सुपुत्र आदु सुस्नुषे ।

प्र-ओथामोदैव ।

ब्रा- घसो३ओओओओओओ३ओओओओओओ३ओओओ त्त इन्द्र उक्षणो३ ओओओ३म् प्रियं काचित्करं हविः ।

प्रस्थाता-ओ३ओओओओओओ३ओओओओओओ३ओओओ मदेथमदैवो३-ओओओ३मोथामोदैव ।

ब्रा-विश्वस्मादिन्द्र उत्तरो३म्

प्र-ओ३थामोदैव ।

ब्रा-उक्ष्णो हि मे पञ्चदश, साकं पचन्ति विंशतिम् ।

प्र-ओथामोदैव

ब्रा-उतो३ओओओओओओ३ओओओओओओ३ओओओ हमद्मि पीव ओ३ ओओओ३मिदुभा कुक्षी पृणन्ति मे ।

प्रस्थाता-ओ३ओओओओओओ३ओओओओओओ३ओओओ मदेथमदैवो३-ओओओ३मोथामोदैव ।

ब्रा-विश्वस्मादिन्द्र उत्तरो३म्

प्र-ओ३थामोदैव

ब्रा-वृषभो न तिग्मशृङ्गः, अन्तर्यूथेषु रोरुवत् ।

प्र-ओथामोदैव

ब्रा–मन्थो३ओओओओओओ३ओओओओओओ३ओओओ स्त इन्द्र शं हृदो३ ओओओ३म् यं ते सुनोति भावयुः ।

प्रस्थाता–ओ३ओओओओओओ३ओओओओओओ३ओओओ मदेथमदैवो३-ओओओ३मोथामोदैव ।

ब्रा–विश्वस्मादिन्द्र उत्तरो३म्

प्र–ओ३थामोदैव

ब्रा–न सेशे यस्य रम्बते, अन्तरा सक्थ्या कपृत् ।

प्र–ओथामोदैव

ब्रा–सेदो३ओओओओओओ३ओओओओओओ३ओओओ शे यस्य रोमशो३ ओओओ३म् निषेदुषो विजृम्भते ।

प्रस्थाता–ओ३ओओओओओओ३ओओओओओओ३ओओओ मदेथमदैवो३-ओओओ३मोथामोदैव ।

ब्रा–विश्वस्मादिन्द्र उत्तरो३म्

प्र–ओ३थामोदैव

ब्रा–न सेशे यस्य रोमशं, निषेदुषो विजृम्भते ।

प्र–ओथामोदैव

ब्रा–सेदो३ओओओओओओ३ओओओओओओ३ओओओ शे यस्य रम्बतो३ ओओओ३मन्तरा सक्त्या कृपत् ।

प्रस्थाता–ओ३ओओओओओओ३ओओओओओओ३ओओओ मदेथमदैवो३-ओओओ३मोथामोदैव ।

ब्रा– विश्वस्मादिन्द्र उत्तरो३म्

प्र–ओ३थामोदैव

ब्रा–अयमिन्द्र वृषाकपिः, परस्वन्तं हतं विदत् ।

प्र–ओथामोदैव

ब्रा–असो३ओओओओओओ३ओओओओओओ३ओओओ सूनां नवं चरो३ओओओ३मादेधस्यान आचितम् ।

प्रस्थाता–ओ३ओओओओओओ३ओओओओओओ३ओओओ मदेथमदैवो३–ओओओ३मोथामोदैव ।

ब्रा– विश्वस्मादिन्द्र उत्तरो३म्

प्र–ओ३थामोदैव

ब्रा–अयमेमि विचाकशद्, विचिन्वन् दासमार्यम् ।

प्र–ओथामोदैव

ब्रा–पिबो३ओओओओओओ३ओओओओओओ३ओओओ मिपाक सुत्वनो३ओओओ३मभि धीरमचाकशम् ।

प्रस्थाता–ओ३ओओओओओओ३ओओओओओओ३ओओओ मदेथमदैवो३–ओओओ३मोथामोदैव ।

ब्रा– विश्वस्मादिन्द्र उत्तरो३म्

प्र–ओ३थामोदैव

ब्रा–धन्व च यत् कृन्तत्रं च, कति स्वित्ता वि योजना ।

प्र–ओथामोदैव

ब्रा–नेदो३ओओओओओओ३ओओओओओओ३ओओओ यसो वृषाकपो३ओओओ३मस्तमेहि गृहाँ उप ।

प्रस्थाता–ओ३ओओओओओओ३ओओओओओओ३ओओओ मदेथमदैवो३–ओओओ३मोथामोदैव ।

ब्रा– विश्वस्मादिन्द्र उत्तरो३म्

प्र– ओ३थामोदैव

ब्रा- पुनरेहि वृषाकपे सुविता कल्पयावहै ।

प्र- ओथामोदैव

ब्रा-य ओ३ओओओओओओ३ओओओओओओ३ओओओ ष स्वप्ननंशनो३ ओओओ३मस्तमेषि पथा पुनः ।

प्रस्थाता-ओ३ओओओओओओ३ओओओओओओ३ओओओ मदेथमदैवो३-ओओओ३मोथामोदैव ।

ब्रा- विश्वस्मादिन्द्र उत्तरो३म्

प्र-ओ३थामोदैव

ब्रा-यदुदञ्चो वृषाकपे, गृहमिन्द्राजगन्तन ।

प्र-ओथामोदैव

ब्रा-क्व स्यो३ओओओओओओ३ओओओओओओ३ओओओ पुल्वघो मृगो३ओओओ३म् कमगञ्जनयोपनः ।

प्रस्थाता-ओ३ओओओओओओ३ओओओओओओ३ओओओ मदेथमदैवो३-ओओओ३मोथामोदैव ।

ब्रा- विश्वस्मादिन्द्र उत्तरो३म्

प्र-ओ३थामोदैव

ब्रा-पर्शुर्ह नाम मानवी, साकं ससूव विंशतिम् ।

प्र-ओथामोदैव

ब्रा-भद्रो३ओओओओओओ३ओओओओओओ३ओओओ भल त्यस्या अभो३ ओओओ३म् यस्या उदरमामयत् ।

प्रस्थाता-ओ३ओओओओओओ३ओओओओओओ३ओओओ मदेथमदैवो३-ओओओ३मोथामोदैव ।

ब्रा- विश्वस्मादिन्द्र उत्तरो३म्

प्र–ओ३थामोदैव

ब्रा– इदं जना उपश्रुत, नराशंसस्तविष्यते ।

प्र– ओथामोदैव ।

ब्रा– षष्टिं सहस्रानवतिं च कौरम आरुशनेषु दद्महो३मुष्ट्रा

प्र– ओथामोदैवोम्

न्यूङ्खान्ते **इदं जना उपश्रुते**त्यादि **यस्सभेय** इत्यन्तं प्रणवान्तः प्रतिगरः **ओथामोदैवोम्** इति । **यस्सभेयो विदथ्ये**त्यादि **विततौ किरणौ** पर्यन्तं प्राकृतः प्रतिगरः ।

ब्राम्हणाच्छंसि– विततौ किरणौ द्वौ तावपिनष्टि पूरुषः ।

प्रतिप्रस्थाता–दुन्दुभिमाहननाभ्यां जरितरोथामोदैव

ब्रा–न वै कुमारि तत्तथा यथा कुमारि मन्यसो३म्

प्र–ओ३थामोदैव ।

ब्राम्हणाच्छंसि–मातुष्टे किरणौ द्वौ नीवीतः पुरुषादृते ।

प्रतिप्रस्थाता–कोशबिले जरितरोथामोदैव ।

ब्रा–न वै कुमारि तत्तथा यथा कुमारि मन्यसो३म्

प्र–ओ३थामोदैव ।

ब्राम्हणाच्छंसि–निगृह्य कर्तकौ द्वौ निरायच्छसिमध्य माम् ।

प्रतिप्रस्थाता–रजनि ग्रन्थैर्धानां जरितरोथामोदैव

ब्रा–न वै कुमारि तत्तथा यथा कुमारि मन्यसो३म्

प्र–ओ३थामोदैव ।

ब्राम्हणाच्छंसि–उत्तानायै शयानायै तिष्ठं नेवावगूहसि ।

प्रतिप्रस्थाता–उपानहि पादं जरितरोथामोदैव ।

ब्रा– न वै कुमारितत्तथा यथा कुमारि मन्यसो३म्

प्र–ओ३थामोदैव ।

ब्रा–श्लक्ष्णायां श्लक्ष्णिकायां श्लक्ष्णमेवावगूहसि ।

प्र–उत्तरां जनीमां जन्यां जरितरोथामोदैव ।

ब्रा–न वै कुमारि तत्तथा यथा कुमारि मन्यसो३म्

प्र–ओ३थामोदैव ।

ब्रा– अवश्लक्ष्णमवभ्रशदन्तर्लोमवति ह्रदे ।

प– उत्तरां जनीं वर्त्मन्यां जरितरोथामोदैव

ब्रा– न वै कुमारि तत्तथा यथा कुमारि मन्यसो३म्

प्र– ओ३थामोदैव

ब्रा– इहेत्थ प्रागपागुदगधराक् ।

प्र– ओथामोदैव

ब्रा– अराला उदभन्थतो३म् ।

प्र– अलाबूनि जरितरोथामोदैवो३म् ।

ब्रा– इहेत्थ प्रागपागुदगधराक् ।

प्र– ओथामोदैव

ब्रा– वत्साः प्रुषन्त आसतो३म् ।

प्र– पृषातकानि जरितरोथामोदैवो३म् ।

ब्रा– इहेत्थ प्रागपागुदगधराक् ।

प्र– ओथामोदैव

ब्रा– स वीपुत्सी लिलीशयो३म् ।

प्र– अश्वत्थपलाशं जरितरोथामोदैवो३म् ।

ब्रा– इहेत्थ प्रागपागुदगधराक् ।

प्र– ओथामोदैव ।

ब्रा– स्थालीपाको विलीयसो३म् ।

प्र– पिपीलिकावटो जरितरोथामोदैवो३म् ।

ब्रा–भुगित्यभिगतः ।

प्र–श्वा जरितरोथामोदैव ।

ब्रा–शरित्यभिष्ठितः ।

प्र– पर्णशदो जरितरोथामोदैव ।

ब्रा– फलित्यप्रक्रान्तः ।

प्र– गोशफो जरितरोथामोदैव ।

ब्रा– वीमे देवा अक्रंसताध्वर्यो क्षिप्रं प्रचर ।

प्र– पत्नी यीयप्स्यते जरितरोथामोदैव ।

ब्रा– सुशस्तिरिद्गवामस्यति प्रक्खिदसोमहे ।

प्र– होता विष्टीमेनं जरितरोथामोदैव ।

ब्रा– आदित्याहजरितरङ्गिरोभ्यो दक्षिणामनयन् ।

प्र– ओथामोदैव ।

ब्रा– तां हजरितर्नप्रत्यायन् ।

प्र– ओं ह जरितरोथामोदैव ।

ब्रा– तामु ह जरितः प्रत्यायन् ।

प्र– तथा ह जरितरोथामोदैव ।

ब्रा– तां ह जरितर्नप्रत्यगृभ्णन् ।

प्र– ओं ह जरितरोथामोदैव ।

ब्रा– तामुहजरितः प्रत्यगृभ्णन् ।

प्र– तथा ह जरितरोथामोदैव ।

ब्रा– अहानेतसं न विचेतनानि ।

प्र– ओं ह जरितरोथामोदैव ।

ब्रा– जज्ञानेतसं न पुरोगवासः ।

प्र– तथा ह जरितरोथामोदैव ।

ब्रा– उतश्वेत आशुपत्वा ।

प्र– ओं ह जरितरोथामोदैव ।

ब्रा– उतो पद्याभिर्जविष्ठः ।

प्र– तथा ह जरितरोथामोदैव ।

ब्रा– उतेमाशुमानं पिपर्ति ।

प्र– ओं ह जरितरोथामोदैव ।

ब्रा– आदित्या रुद्रा वसवस्त्वेळते ।

प्र– तथा ह जरितरोथामोदैव ।

ब्रा– इदं राधः प्रतिगृभ्णीह्यङ्गिरः ।

प्र– ओं ह जरितरोथामोदैव ।

ब्रा– इदं राधोबृहत्पृथु ।

प्र– तथा ह जरितरोथामोदैव ।

ब्रा– देवा ददत्वावरम् ।

प्र– ओं ह जरितरोथामोदैव ।

ब्रा– तद्वो अस्तु सुचेतनम् ।

प्र– तथा ह जरितरोथामोदैव ।

ब्रा– युष्मे अस्तु दिवेदिवे ।

प्र– ओं ह जरितरोथामोदैव ।

ब्रा– प्रत्येवगृभायत ।

प्र– ओम्

ब्रा– त्वमिन्द्रशर्मरिणा हव्यं पारावतेभ्यः ।

प्र– ओथामोदैव ।

ब्रा– विप्राय स्तुवते वसुनिजुरिश्रवसे महो३म् ।

प्र– ओ३थामोदैव ।

ब्रा– त्वमिन्द्र कपोतायच्छिन्नपक्षाय वञ्चते ।

प्र– ओथामोदैव ।

ब्रा– श्यामाकं पक्वं पीलु च वारस्मा अकृणोद्बहो३म् ।

प्र– ओ३थामोदैव ।

ब्रा– अरङ्गरो वावदीति त्रिधाबद्धो वरत्रया ।

प्र– ओथामोदैव ।

ब्रा– इरामुह प्रशंसत्यनिरामपबाधतो३म् ।

प्र– ओ३थामोदैव ।

ब्रा– यदस्या अंहुभेद्याः–पृथुस्थूरमुपातसत् ।

प्र– ओथामोदैव ।

ब्रा– मुष्को३ओओओओओओ३ओओओओओओ३ओओओ विदस्या एजतो३–ओओओ३म् गोशफेशकुलाविवो३म् ।

प्र–ई३इइइइइई३इइइइइई३इइइ किमयमिदमाहो३ओओओ३मोथामोदैवो३म् ।

ब्रा–यदा स्थूरेण पयसा, अनूमुष्का उपावधीत् ।

प्र–ओथामोदैव ।

ब्रा–विष्णो३ओओओओओओ३ओओओओओओ३ओओओ चावस्या अर्दतो३ओओओ३म् सिकतास्विवगर्दभो३म् ।

प्र–ई३इइइइइईई३इइइइइईई३इइइ किमयमिदमाहो३ओओओ३मोथामोदैवो३म् ।

ब्रा–यदल्पिका स्वल्पिकाकर्कन्धुकेव पच्यते ।

प्र–ओथामोदैव ।

ब्रा–वासो३ओओओओओओ३ओओओओओओ३ओओओ न्तिकमिव तेजनो३ ओओओ३म् यभ्यमाना वितन्वतो३म् ।

प्र–ई३इइइइइईई३इइइइइईई३इइइ किमयमिदमाहो३ओओओ३मोथामोदैवो३म् ।

ब्रा–यद्देवासो ललामगुम्, प्रपिष्टीपिनमापिषुः ।

प्र–ओथामोदैव ।

ब्रा–सक्थनो३ओओओओओओ३ओओओओओओ३ओओओ देदृश्यते नरो३ओओओ३म् सक्थः साक्षीवगोयथो३म् ।

प्र–ई३इइइइइईई३इइइइइईई३इइइ किमयमिदमाहो३ओओओ३मोथामोदैवो३म् ।

ब्रा–महाणग्न्युपब्रूते–अश्वस्यावेशितं पसः ।

प्र–ओथामोदैव ।

ब्रा–ईदो३ओओओओओओ३ओओओओओओ३ओओओ क्फलस्य वृक्षस्यो३ओओओ३म् शूर्पं शूर्पं भजेमहो३म् ।

प्र–ई३इइइइइईई३इइइइइईई३इइइ किमयमिदमाहो३ओओओ३मोथामोदैवो३म् ।

ब्रा–महाणग्न्यदृप्तंहि–सोक्रन्ददस्तमासरत् ।

प्र–ओथामोदैव ।

ब्रा–शक्नो३ओओओओओओ३ओओओओओओ३ओओओ काननाशको३ ओओओ३म् मशकं सक्थ्युद्यभो३म् ।

प्र–ई३इइइइइईई३इइइइइईई३इइइ किमयमिदमाहो३ओओओ३मोथामोदैवो३म् ।

ब्रा–महाणग्न्युलूखलं–अतिक्रामन्त्यब्रवीत् ।

प्र–ओथामोदैव ।

ब्रा–यथो३ओओओओओओ३ओओओओओओ३ओओओ व ते वनस्पतो३ ओओओ३म् पिघ्नन्ति तथैव मो३म् ।

प्र–ई३इइइइइई३इइइइइई३इइइ किमयमिदमाहो३ओओओ३मोथामोदैवो३म् ।

ब्रा–महान्वै भद्रो बिल्वः–महान्पक्व उदुम्बरः ।

प्र–ओथामोदैव ।

ब्रा–महो३ओओओओओओ३ओओओओओओ३ओओओअभिङ्गु बाधतो३ ओओओ३म् महतः साधुखोदनो३म् ।

प्र–ई३इइइइइई३इइइइइई३इइइ किमयमिदमाहो३ओओओ३मोथामोदैवो३म् ।

ब्रा–कपृन्नरः कपृथमुद्दधातन–चोदयत खुदत वाजसातये ।

प्र–ओथामोदैव ।

ब्रा– निष्टो३ओओओओओओ३ओओओओओओ३ओओओ ग्यः पुत्रमा च्यावयोतयो३ओओओ३मिन्द्रं सबाध इह सोमपीतयो३म्

प्र–ई३इइइइइई३इइइइइई३इइइ किमयमिदमाहो३ओओओ३मोथामोदैवो३म् ।

ब्रा–यद्ध प्राचीरजगन्त–उरो मण्डूरधाणिकीः ।

प्र–ओथामोदैव ।

ब्रा–हतो३ओओओओओओ३ओओओओओओ३ओओओ इन्द्रस्य शत्रवो३ ओओओ३म् सर्वे बुद्बुदयाशवो३म्*

प्र–ई३इइइइइई३इइइइइई३इइइ किमयमिदमाहो३ओओओ३मोथामोदैवो३म् ।

॥ इति कुन्तापशस्त्रप्रतिगरः ॥

---

* अस्य कुन्तापसूक्तस्य बहवः पाठभेदा विद्यन्ते । न तेऽत्र प्रदर्शिताः ।

॥ अङ्गसौत्रामणिप्रयोगः ॥

सौत्रामण्या यक्ष्यमाणः पर्वणि प्रातरग्निहोत्रं हुत्वा, अपरेण गार्हपत्यं दर्भेष्वासीनो दर्भान् धारयमाणः पवित्रपाणिः पत्न्या सह प्राणानायम्य संकल्प्य, श्री परमेश्वरप्रीत्यर्थं अग्निं चित्वा तदङ्गसौत्रामण्या यक्ष्ये[१] । समारोप्य देवयजनं गत्वा मथित्वा लौकिके वोपारोह्य आयतने निधाय । **विद्युदसि** । अस्यां सौत्रामण्यां अध्वर्युं त्वां वृणीमहे । एवं ब्रह्माणं होतारमाग्नीध्रं प्रतिप्रस्थातारं प्रशास्तारं च वृणीते । तस्याः निरूढपशुबन्धवत्कल्पः । पयोग्रहपक्षमाश्रित्य प्रयोगः । षड्ढोतारं हुत्वा पशुबन्धवत् आग्नावैष्णवेष्ट्या यजेत । इष्ट्यन्ते शाखाहरणादि चषालकरणान्तम् । एको यूपः त्रयस्स्वरवः । सौमिक्या वेदितृतीये यजेतेति विज्ञायते ।

सौमिकविहारप्रक्रमस्य त्रिकरणी प्रक्रमस्थानीया भवति । तेन मानदण्डेन दश पश्चात्तिर्यक् द्वादश प्राची अष्टौ पुरस्तात्तिर्यक्[२] । {**३० अङ्गुलाः एकः प्रक्रमश्चेत् त्रिकरणी ५१अङ्गुलाः, ३३ तिलाः । २४ अङ्गुलाः एकः प्रक्रमश्चेत् त्रिकरणी ४१ अङ्गुलाः, १९ तिलाः । २० अङ्गुलाः एकः प्रक्रमश्चेत् त्रिकरणी ३४ अङ्गुलाः, २२ तिलाः ।**} पदमानेन सौमिकी वेदिः मीयते चेत् {**१५ अङ्गुलाः एकः पदश्चेत् त्रिकरणी २५ अङ्गुलाः, ३३.५ तिलाः । १२ अङ्गुलाः एकः पदश्चेत् त्रिकरणी २० अङ्गुलाः, २७ तिलाः । १० अङ्गुलाः एकः पदश्चेत् त्रिकरणी १७ अङ्गुलाः, ११ तिलाः ।**} एवं शौल्बमानेन मीत्वा । त्वया वेदिमिति वेदं कृत्वा मन्त्रेण वेदिकरणम् । प्रागुत्तरात्परिग्राहात्कृत्वा शम्यामात्रीमुत्तरवेदिं करोति । **वित्तायनी मेऽसि** इत्यादि **उरु प्रथस्व** इत्यन्तं करोति । उत्तरवेद्यां क्रियमाणायां प्रतिप्रस्थाता चात्वालात्पुरीषमाहृत्य दक्षिणेनोत्तवेदिमरत्निमात्रं चतरस्रं खरं करोति तूष्णीम् । अग्रेणान्वाहार्यपचनं अदूरे वेद्यामेव पयोग्रहार्थं द्वितीयं खरं करोति । अध्वर्युः **ध्रुवासि** इत्यादि दक्षिणतो निस्सारणान्तं कृत्वा । आहवनीये प्रणयनीयमिध्ममादीप्येत्यादि । ऊर्णावन्तमिति होतुरभिज्ञायाग्नीधेऽग्निं प्रदाय जुह्वां

---

१. अग्निं चित्वा सौत्रामण्या यक्ष्ये । श्रीपरमेश्वरप्रीत्यर्थं सौत्रामण्या यक्ष्ये इति पाठा० ।

२. सौमिकी वेदिः प्रक्रमेण वा पदेन वा मीयते । प्रक्रमेषु पदेषु च मानविकल्पाः प्रयोगेषु दृष्टाः । सौमिक्या वेदितृतीये यजेतेति सौत्रामण्या विज्ञायते इति सौत्रामण्याः वेदिमानं सूत्रकारेण विहितम् । एतेन येन यजमानेन यादृशेन मानेन सौमिकी वेदिः कृता तेन तादृशेन मानेनैव सौत्रामणीवेदिः कर्तव्या इति न्याय्यम् ।

पञ्चगृहीतं गृहीत्वेत्याद्यतिमुक्तिहोमान्तं पशुवत् । औत्तरवेदिके अग्नौ प्रणीयमाने प्रतिप्रस्थाता दक्षिणाग्नेरग्निमाहृत्य दक्षिणेनोत्तरवेदिं तूष्णीं खरे न्युप्य यथा व्यवायो अन्यैरग्न्योः न भवति तथा कृत्वोपसमादधाति ।

अध्वर्युरुत्तरेण गार्हपत्यमित्यादि । इध्माबर्हिराहरति । आश्ववालः प्रस्तरः । ऐक्षवी विधृती । कार्ष्मर्यमयाः परिधयः । त्रयोविंशतिदारुरिध्मः । नेध्मप्रव्रश्चनम् । न वेदकरणम् । अन्तर्वेदिशाखायामित्यादि । न तृतीयस्यै । न पर्णवल्कः । **पशून् हव्यं करोतु मे ।** पशुकुम्भीनां लेपनान्तम् । **इमौ पर्णं च।** अत्र पशुशाखया वत्सानपाकरोति । **परिस्तृणीत । देवा देवेषु । कर्मणे वाम्** इत्यादि । प्रात्रप्रयोगकाले द्वे यूपरशने तिस्रः पशुरशना कुम्भीत्रयं वपाश्रपणी युगलत्रयं त्रीन् हृदयशूलान्[३] इतराणि पशुवत्[४] तथा अपरस्मिन् खरे त्रीणि पलाशग्रहपात्राणि पयोग्रहार्थं प्रयुनक्ति । सतं वालस्रावं श्येनपत्रं श्रयणानि च[५]। सान्नाय्यार्थं प्रातर्दोहपात्राणि च शतातृण्णां[६] च ।

पवित्रकरणादि । ***यजमान वाचं यच्छ*** । पाशुकानि पात्राणि संमृश्य ऊर्ध्वपात्राणि संमृशति । प्रोक्षणकाले **शुन्धध्वं** इति ग्रहपात्रादीनामपि प्रोक्षणम् । पात्रसम्मार्जनकाले जुहूवत् ग्रहपात्राणि सम्मार्ष्टि । **अग्नेर्वस्तेजिष्ठेन** इत्यादि । यूपोच्छ्रयणान्तं कृत्वा । **देवस्य वां सवितुः प्रसवे** इति हस्तद्वयेन यूपरशनाद्वयमादाय । **परिवीरसि** इत्यनूहेनैव परिव्ययति । **दिवः सूनवस्स्थ** स्वरुत्रयमादाय स्वरूणां चिह्नं कृत्वा । **अन्तरिक्षस्य वः सानाववगूहामि** अवगूहनान्तं कृत्वा[७]। अत्र प्रातर्दोहं

---

३. एक एव हृदयशूलः प्रयोगग्रन्थेषु उक्तः । अवभृथगमनावसरे सूत्रे 'हृदयशूलैः .... अवभृथमवयन्ति' इत्युक्तत्वात्, 'जातिभेदे तु भिद्येत । पक्तिवैषम्यात्' इति परिभाषासूत्रे तद्भाष्ये च पशुजातिभेदेन हृदयशूलभेदस्य उक्तत्वाद्बहुवचनत्वेन परिष्कृतम् ।

४. स्रुवस्स्वधित्यौ जुहूवसाहोमहवन्यौ च द्वन्द्वम् । उपभृत्पृषदाज्यधान्यौ ध्रुवया द्वन्द्वम् । स्थाल्यौ (दध्याज्य) वेदेन द्वन्द्वम् । उपवेषमिडापात्रेण द्वन्द्वम् । प्लक्षशाखां त्रीन् हृदयशूलान् वपाश्रपणियुगलत्रयं तिस्रः पशूखाः शाखापवित्रेण द्वन्द्वम् । औदुम्बरेण मैत्रावरुणदण्डेन आस्यदघ्नेन चुबुकदघ्नेन वा रशना (द्वे यूपरशने, तिस्रः पशुरशनाः) । योक्त्रेण सार्धं परिवासनानि दर्भास्स्वरुं च द्वन्द्वम् । यूपेन सार्धं यवा दर्भौ । शकलैस्सह यूषार्थपात्रं लौकिकमाज्यपात्रं च प्रयुज्य ।

५. सतं = परिमण्डलं पात्रम्, द्रोणकलशाकृतिः । वालस्रावः = वालमयं पवित्रं, शुचिभिः गोवालैः कृतं सुरागालनार्थं, केचिद्दशापवित्रवत् वस्त्रं वा । श्येनपत्रं = श्येनपुच्छः । श्रयणानि = क्वलबदरकर्कन्धुसक्तूनि ।

६. शतातृण्णां = शतछिद्रां मृन्मयीं स्थालीम् ।

७. अत्र पशुशाखोपवेषौ एव उपयुज्येते ।

दोहयति **एता आचरन्ति** इत्यादि **कामधुक्षः प्र णो ब्रूह्यश्विभ्या७ँ सरस्वत्या इन्द्राय सुत्राम्णे हविरिन्द्रियम् । बहु दुग्ध्यश्विभ्या७ँ सरस्वत्या इन्द्राय सुत्राम्णे देवेभ्यो हव्यमाप्यायतां पुनः ।** सङ्क्षाळननिनयनान्तं कृत्वा । **अन्तरितम् । अविदहन्त । यस्य आत्मा । दृ७ँह** इत्युद्वास्य । ब्राह्मणस्य मूर्धनि खरे वा तूष्णीं सादयति । श्रयणानि च । **इदमिन्द्रियं, अयं यज्ञो, ममाग्ने** पञ्चहोता इत्यासन्नाभिमर्शनम् ।

खरस्याधस्तात् सतं वालस्रावं दशापवित्रं वितत्य । **पुनातु ते परिस्रुत७ँ सोम७ँ सूर्यस्य दुहिता । वारेण शश्वतातना** इति तस्मिन् पयः पावयित्वा[८] । पुनः खरे सादयित्वा पशूनुपाकरोति । अथ पशुप्रायश्चित्तानि कृत्वा पशून् स्नपयन्ति । **इषे त्वा** इत्यादि । **अश्विभ्यां त्वा जुष्टमुपाकरोमि** धूम्रमजमुपाकरोति[९] । प्रज्ञाते बर्हिषी निधाय । पुनः **इषे त्वा** इत्यादि । अन्ये बर्हिषी आदाय । तयैव प्लक्षशाखया **सरस्वत्यै त्वा जुष्टमुपाकरोमि** मेषमुपाकरोति । प्रज्ञाते बर्हिषी निधाय । पुनः **इषे त्वा** इत्यादि । अन्ये बर्हिषी आदाय । तयैव प्लक्षशाखया **इन्द्राय त्वा जुष्टमुपाकरोमि** वृष्णि-मुपाकरोति[१०] । प्रज्ञाते बर्हिषी निधाय । उपाकृत्य पञ्चजुहोति । **प्रजानन्तः --- सुवर्गं यात पथिभिः ---प्रतितिष्ठत शरीरैस्स्वाहा ।** पशुभ्य इदम् । **येषामीशे --- निष्क्रीता इमे यज्ञियं भागं यन्तु रायस्पोषा --- सन्तु स्वाहा ॥ ये बध्यमानाननुबध्यमाना अभ्यैक्षन्त --- संविदानस्स्वाहा ॥ य आरण्याः --- स्वाहा ॥ प्रमुञ्चमाना --- देवाः । उपाकृताञ्च्छशमानान् यदस्थाज्जीवं देवानामपि यन्तु पाथस्स्वाहा ॥** एकयूपे पशूनुपाकरोति ।

देवस्य त्वा इत्यादि **अश्विभ्यां त्वा जुष्टं नियुनज्मि । सरस्वत्यै त्वा जुष्टं नियुनज्मि । इन्द्राय त्वा जुष्टं नियुनज्मि** । दक्षिणतो यूपस्य नियुनक्ति । एवं प्रोक्षणे वपाया उद्धरणे हृदयस्याभिघारणे च ।

अश्विभ्यां त्वा जुष्टं प्रोक्षामि । अपां पेरुरसीत्यादि सर्वतश्च प्रोक्ष्येत्यन्तं एकस्य कृत्वा पुनरन्यस्य करोति । **सरस्वत्यै त्वा जुष्टं प्रोक्षामि । इन्द्राय त्वा जुष्टं प्रोक्षामि ।** स्रुच्यमाघार्य प्रत्याक्रम्य । जुह्वा पशून् समनक्ति । **सं ते प्राणो वायुना** इत्यादि । श्रोण्यां, इत्यन्तं

---

८. खरादधस्तात् हृत्वा वालमयेन पवित्रेण पयः पावयति इति पाठान्तरम् ।

९. धूम्रमजं = तिलकयुक्तं छागम् ।

१०. वृष्णिः = पुं मेषः ।

एकस्य कृत्वा इतरस्य करोति । ध्रुवा समञ्जनादि कर्म प्रतिपद्यते । दश प्रयाजानिष्ट्वा प्रत्याक्रम्य जुह्वा स्वरुत्रयं स्वधितिं च अनक्ति । स्वर्वञ्जनं तन्त्रेण करोति । सकृत् स्वधितेरन्यतरां धाराम् । स्वरुमन्तर्धाय स्वधितिना आश्विनं पशुं समनक्ति । **घृतेनाक्तौ पशुं त्रायेथां** । पुनः पुनः स्वधित्यञ्जनम् । अन्यमन्यं स्वरुमन्तर्धाय स्वधितिना एवमितरौ समनक्ति । **घृतेनाक्तौ---**। पर्यग्निकरणं तन्त्रेण । **पर्यग्नये क्रियमाणायानुब्रूहि** इत्यनूहेन सम्प्रेष्यति । **प्रजानन्तः --- सुवर्गं यात पथिभिः --- प्रतितिष्ठत शरीरैस्स्वाहा । पशुपतेः पशवो --- तेषां यान् वव्रिरे देवास्ताꣳ स्वराडनुमन्यताꣳ स्वाहा ॥** त्रयाणां तन्त्रेण प्रमोकः । **ये बध्यमानाननुबध्यमाना अभ्यैक्षन्त संविदानस्स्वाहा ॥** प्रमुच्यमाने । **प्रमुञ्चमाना --- देवाः । उपाकृताञ्छशमानान् यदस्थाज्जीवं देवानामपि यन्तु पाथस्स्वाहा ॥** प्रणीयमाने । **रेवतीर्यज्ञपतिं प्रियधाऽऽविशत** वपाश्रपणीभ्यां मुख्यं पशुमन्वारभेते अध्वर्युर्यजमानश्च । एक एव अध्रिगुसम्प्रैषः । तन्त्रेण अग्नेर्हरणम् । **नाना प्राणो यजमानस्य पशुभिर्यज्ञो देवेभिस्सह देवयानः । जीवं देवानामपि यन्तु पाथस्सत्यास्सन्तु यजमानस्य कामाः ॥** अध्वर्युर्जपति । **पृथिव्यास्सम्पृचः पाहि** इत्यावर्तते । तत्तद्बर्हिरुपास्यति । ***अमायुं कृण्वतः संज्ञपयत*** इति सम्प्रैषः । **स्वर्विदस्स्थ स्वर्वित्वा स्वरित स्वर्मह्यꣳ स्वः पशुभ्यो लोकविदस्स्थ लोकं वित्वा लोकमित लोकं मह्यं लोकं पशुभ्यो गातुविदस्स्थ गातुं वित्वा गातुमित गातुं मह्यं गातुं पशुभ्यो नाथविदस्स्थ नाथं वित्वा नाथमित नाथं मह्यं नाथं पशुभ्यः ॥ न वा उ वेतन्म्रियध्वे न रिष्यथ देवाꣳ इदिथ पथिभिस्सुगेभिः । यत्र यन्ति सुकृतो नापि दुष्कृतस्तत्र वो देवस्सविता दधातु ॥ आशानां व आशापालेभ्यः --- वयम् ॥ नाना प्राणो यजमानस्य पशुभिर्यज्ञो देवेभिस्सह देवयानः । जीवं देवानामपि यन्तु पाथस्सत्यास्सन्तु यजमानस्य कामाः ॥ इन्द्रस्य भागः सुविते --- यो नो द्वेष्ट्यनु तꣳ रवध्वं --- वीराः । यदस्य पारे रजसः --- स्वाहा । यस्माद्भीषा वाशिढ्वं ततो नो अभयं कृत । प्रजाभ्यस्सर्वाभ्यो मृडत नमो रुद्राय मीढुषे स्वाहा ॥ य इदमकः --- स्वाहा ॥ यस्माद्भीषा न्यषदत ततो नो अभयं कृत । प्रजाभ्यस्सर्वाभ्यो मृडत नमो रुद्राय मीढुषे स्वाहा ॥ य इदमकः ---**

स्वाहा ॥ यस्माद्भीषा वेपिद्वं ततो नो अभयं कृत । प्रजाभ्यस्सर्वाभ्यो मृडत नमो रुद्राय मीढुषे स्वाहा ॥ य इदमकः --- स्वाहा ॥ यस्माद्भीषा पलायिद्वं ततो नो अभयं कृत । प्रजाभ्यस्सर्वाभ्यो मृडत नमो रुद्राय मीढुषे स्वाहा ॥ य इदमकः --- स्वाहा ॥ यस्माद्भीषा समज्ञाध्वं ततो नो अभयं कृत । प्रजाभ्यस्सर्वाभ्यो मृडत नमो रुद्राय मीढुषे स्वाहा ॥ य इदमकः --- स्वाहा ॥ यस्माद्भीषा निमेहथ ततो नो अभयं कृत । प्रजाभ्यस्सर्वाभ्यो मृडत नमो रुद्राय मीढुषे स्वाहा ॥ यस्माद्भीषा शकृत्कुरुथ ततो नो अभयं कृत । प्रजाभ्यस्सर्वाभ्यो मृडत नमो रुद्राय मीढुषे स्वाहा ॥ यत्पशवो मायुमकृषतोरो वा पद्भिराघ्नते । अग्निर्मा तस्मादेनसो विश्वान्मुञ्चत्वꣳहसस्स्वाहा ॥

वपाश्रपणीनां तन्त्रेण प्रतितपनम् । **शमितार उपेतन --- पाशेभ्यः पशून् प्रमुञ्चत ---परि ॥ अदितिः पाशं प्रमुमोक्त्वेतन्नमः --- करोमि** इति क्रमेण पाशान् प्रमुच्य **अरातीयन्तं** इति तन्त्रेण व्युदसनम् । **वाक्त आप्यायतां** इति क्रमेण आप्यायनम् । **शमोषधीभ्य** इति सर्वेषामन्ते निनीय । **ओषधे त्रायस्व** इत्यादि क्रमेण । **रक्षसां भागास्स्थ** इति निरसनम् । **अश्विभ्यां त्वा जुष्टामुत्कृन्तामि । सरस्वत्यै त्वा जुष्टामुत्कृन्तामि । इन्द्राय त्वा जुष्टामुत्कृन्तामि ।** शमिता तु वपोद्धरणापिधानं मुख्यस्यैव करोति । प्रत्युष्टमिति शामित्रे प्रतितपनं तन्त्रेण । मुख्यस्य वपाश्रपण्योः अन्वारम्भः । **निर्दग्धं** इति आहवनीयस्यान्तमे अङ्गारे वपानिकूडनं तन्त्रेण । **वायो वीहि स्तोकानां** इति भेदेन । **त्वामु ते दधिरे** इत्यभिहोमस्तन्त्रेण । **यस्त आत्मा** इति प्रत्येकमनूहेन अभिघारणम् । केचिदूहमिच्छन्ति । ***दृꣳहत गा दृꣳहत गोपतिं मा वो यज्ञपती रिषत्*** इति तन्त्रेणोद्वास्य । **सुपिप्पला ओषधीः कृत** इति दक्षिणस्यां वेदिश्रोण्यां बर्हिषि प्लक्षशाखायां तन्त्रेणासादनम् । ***प्रयुता द्वेषाꣳसि*** इत्यावृत्तिः । **इदमिन्द्रियं** इति पृथक्पृथगभिमर्शनम् । उत्तमप्रयाजादि । पूर्वं परिवप्यं हुत्वा क्रमेण वपा प्रचारः ।

अश्विभ्यां छागस्य वपाया मेदसोऽनुब्रूहि । अश्विभ्यां छागस्य वपाया मेदसः प्रेष्य । अश्विभ्यामिदम् । **अश्विनोरहं देवयज्यया जेमानं महिमानम्..** । *सरस्वत्यै मेषस्य वपाया मेदसोऽनुब्रूहि । सरस्वत्यै मेषस्य वपाया मेदसः प्रेष्य ।* सरस्वत्या इदम् ।

सरस्वत्या अहं देवयज्यया वाचमन्नाद्यं पुषेयम् । *इन्द्राय वृष्णोर्वपाया मेदसोऽनुब्रूहि । इन्द्राय वृष्णोर्वपाया मेदसः प्रेष्य* । इन्द्रायेदम् । **इन्द्रस्याहं देवयज्यया जेमानं महिमानम्– ––**। उत्तरं परिवप्यं हुत्वा । पृथग्वपोद्धरणाभिघारणं वपाश्रपणी प्रहरणं च[११]। सकृदेव संस्रावेणाभि–जुहोति ।

दक्षिणाकाले निष्कं,[१२] ऋषभं, सात्वरीं वडबां चान्तर्वेदि स्थापयित्वा । नष्टप्रत्यासृतां[१३] वडबां सात्वरीं इति ब्रुवते । अनुशिशुर्वडबा ***। ब्रह्मण्यो ब्रह्मण्यस्स्थ ब्रह्मणे वो हुताद्य मा मा हिꣳसिष्टाऽहुता मह्यꣳशिवा भवत ।*** **ब्रध्न पिन्वस्व** इत्यादि । ***सहस्रधारा उत्सा अक्षीयमाणाः । ता दध्रुः पृथिवीमन्तरिक्षं दिवं च ताभिर्निष्कर्षभसात्वरीवडबाभि–रतितराणि मृत्युम् । ब्राह्मणा इमा वो निष्कर्षभसात्वरवडबाः अहिंसन्तः यथाभागं प्रतिगृह्णीध्वम् ।*** **अग्नये हिरण्यं, रुद्राय गां, वरुणायाश्वं** इति क्रमेण प्रतिग्रहः ।

चात्वाले मार्जयित्वा द्वितीये खरे पयोग्रहान् गृह्णन्ति । अध्वर्युराश्विनपात्रमादाय **कुविदङ्ग यवमन्तो यवं चिद्यथा दान्त्यनुपूर्वं वियूय । इहेहैषां कृणुत भोजनानि ये बर्हिषो नमोवृक्तिं न जग्मुः ॥** ***उपयामगृहीतोस्यच्छिद्रां त्वाच्छिद्रेणाश्विभ्यां त्वा[१४] जुष्टं गृह्णामि*** आश्विनमध्वर्युर्गृह्णाति । क्वलसक्तुभिः[१५] सिंहलोमभिश्च आश्विनं श्रीणाति । सिंहलोमाभावे ***सिंहलोमभिः श्रीणामि*** इति मनसा ध्यायेत् । श्येनपत्रेण परिमृज्य **एष ते योनिरश्विभ्यां त्वा** यथायतनं सादयति ।

प्रतिप्रस्थाता सारस्वतपात्रमादाय **कुविदङ्ग ––– न जग्मुः ॥** ***उपयामगृहीतोस्यच्छिद्रां त्वाच्छिद्रेण सरस्वत्यै त्वा जुष्टं गृह्णामि*** सारस्वतं गृह्णाति । बदरसक्तुभिः शार्दूललोमभिश्च सारस्वतं श्रीणाति । शार्दूललोमाभावे ***शार्दूललोमभिः श्रीणामि*** इति मनसा ध्यायेत् । श्येनपत्रेण

---

११. केचित् "स्वाहोर्ध्वनभसं मारुतं गच्छत" इत्यूहेन वपाश्रपणीयुग्मत्रयाणां प्रहरणम् ।

१२. अशीतिगुञ्जापरिमितं अष्टोत्तरशतगुञ्जापरिमितं वा सुवर्णं निष्कमित्युच्यते । चतुस्सुवर्णको निष्कं इति कपर्दिभाष्यम्, अशीतिगुञ्जा = एकः सुवर्णकः ।

१३. नष्टा सती पुनरागता गृहम् ।

१४. 'त्वा शब्दः तृतीये एव । अश्विभ्यां जुष्टं गृह्णामि इति मन्त्रपाठात् । उपदेशस्तु त्रिष्वपि त्वा शब्दः' इति कपर्दिभाष्यम् ।

१५. क्वलं बालखर्जूरफलं इति सायणभाष्यम् ।

परिमृज्य **एष ते योनिः सरस्वत्यै त्वा** सादयति ।

ब्रह्मा ऐन्द्रपात्रमादाय **कुविदङ्ग --- न जग्मुः ॥** ***उपयामगृहीतोऽस्यच्छिद्रां त्वाच्छिद्रेणेन्द्राय त्वा सुत्राम्णे जुष्टं गृह्णामि*** ऐन्द्रं गृह्णाति । कर्कन्धुसक्तुभिः[१६] वृकलोमभिश्च ऐन्द्रं श्रीणाति । वृकलोमाभावे ***वृकलोमभिः श्रीणामि*** इति मनसा ध्यायेत् । ब्रह्मा श्येनपत्रेण परिमृज्य **एष ते योनिरिन्द्राय त्वा सुत्राम्णे** सादयति ।

ततः पशुपुरोडाशान् निर्वपति । त्रयस्त्रिंशत्कपालानि शूर्पं च[१७] द्वन्द्वम् । कृष्णाजिनाद्युपलान्तम् । पुरतः पात्रीं प्राशित्रहरणं मदन्त्यर्थं मेक्षणमुपवेषमुत्पवनार्थपात्रं तृणं च । पवित्रे कृत्वा **यजमान वाचं यच्छ** । न यज्ञयोगः । निर्वपणकाले व्रीहिमयं पुरोडाशं निर्वपति । **इन्द्राय जुष्टं निर्वपामि । सवित्रे जुष्टं निर्वपामि । वरुणाय जुष्टं निर्वपामि ।** उपसादनकाले **अदित्यास्त्वोपस्थे --- इन्द्र हव्य७ँरक्षस्व सवितर्हव्य७ँरक्षस्व वरुण हव्य७ँरक्षस्व ।** निर्वापवत्प्रोक्षणम् । सर्वाभिरद्भिस्त्रिः प्रोक्षति । हविष्कृता वाचं विसृज्य पशून् विशास्ति । ***गुदानि मानिर्ल्लेषीः वनिष्ठून् मा निर्ल्लेषीः*** । हृदयशूलान् शाखापवित्रमुपवेषं कुम्भींश्चादाय निष्टपनादि शूले प्रणीक्ष्य हृदयं शामित्रे श्रपयतीत्यन्तम् एकस्य कृत्वा इतरयोः करोति ।

अवहननादि कर्म प्रतिपद्यते । अधिवपनकाले **देवस्य त्वा --- इन्द्राय जुष्टमधिवपामि सवित्रे जुष्टमधिवपामि वरुणाय जुष्टमधिवपामि धान्यमसि ---**। कपालोपधाकाले ऐन्द्रस्यैकादशकपालानि । सावित्रस्य द्वादशकपालानि, युग्माणमावृत्तिः । वारुणस्य दशकपालानि, चतुर्थाष्टमयोरावृत्तिः । अधिवापवत्संवापः । **इदमह७ँसेनाया** इत्यादि । आप्यलेपं बर्हिषि निनीय । ***घृतागेहि, प्रत्युष्टं, अनिषितमसि, रूपं वर्णम्*** इत्यन्यैर्दर्भैः । **अग्नेस्त्वा, दिवश्शिल्पम् । अयं प्राणश्च** प्रस्तरे पवित्रे अपिसृज्य । **इदमह७ँसेनाया** इत्यादि । तूष्णीमैन्द्रमभिघार्य । सावित्रवारुणयोः मन्त्रेणाभिघारणम् । अलङ्कृत्य ***प्रियेण*** इत्यासादनम् । **यज्ञोऽसि** इति सावित्रवारुणयोरभिमर्शनम् । **अयं यज्ञः, यो नः कनीयः --- अपतमिन्द्रो भुवनान्नुदतां --- विदेय ॥ ममाग्ने**

---

१६. कर्कन्धुः हरीतकीपरिमितं स्थूलं बदरीफलम् इति सायणभाष्यम् ।

१७. त्रयस्त्रिंशत्कपालानि स्फ्यश्च द्वन्द्वं इति मातृकापाठः । प्रयोगपाठस्तु भाष्यानुसारी । तथा हि पशुबन्धे धूर्तस्वामिभाष्यम्:-यान्यासादितानि पात्राणि तानि पुनर्न साद्यन्ते । पशुपुरोडाशस्यापि तान्युपकुर्वन्ति । अपरिसमाप्तत्वात् पशोस्तन्त्रस्य । कपालशूर्पादीन्याष्टावपरतः इति ।

पञ्चहोता इत्यासन्नाभिमर्शनम् ।

अथ ग्रहैः प्रचरन्ति । आश्विनमध्वर्युरादत्ते, सारस्वतं प्रतिप्रस्थाता, ऐन्द्रं ब्रह्मा । अध्वर्युरेव सम्प्रेष्यति ***अश्विभ्यां॰ सरस्वत्या इन्द्राय सुत्राम्णे सोमानां॰ सुराम्णामनुब्रू३हि*** । आश्राव्य प्रत्याश्राविते ***अश्विभ्यां॰ सरस्वत्या इन्द्राय सुत्राम्णे सोमानां॰ सुराम्णां प्रेष्य*** । अश्विभ्यां सरस्वत्या इन्द्राय सुत्राम्ण इदम्[१८] । अनुवषट्कारस्तु हुतानुमन्त्रणान्ते याजमानबाहुल्यात् । **अहाव्यग्ने हविरास्येते । स्रुचीव घृतं चमू इव सोमः । वाजसनिं॰ रयिमस्मे सुवीरम् । प्रशस्तं धेहि यशसं बृहन्तम् ॥ यस्मिन्नश्वास ऋषभास उक्षणः । वशा मेषा अवसृष्टास आहुताः । कीलालपे सोमपृष्ठाय वेधसे । हृदा मतिं जनय चारुमग्नये** इति हुतां हूयमानां वा यजमानोऽनुमन्त्रयते । प्राकृतहुतानुमन्त्रणस्य प्रत्याम्नायः । अनुवषट्कृते अग्नये स्विष्टकृत इदम् । **अग्नेरहं --- आयुष्मान् यज्ञेन --- गमेयम्**[१९] । ब्राह्मणं परिक्रीणीयादुच्छेषणस्य पातारम्[२०] ।

नाना हि वां देवहितं॰ सदो मितम् । मा सं॰सृक्षाथां परमे व्योमन् । सुरात्वमसि शुष्मिणी सोम ऐषः । मा मा हिं॰सीः स्वां योनिमाविशन् ॥ यदत्रशिष्टं॰ रशिनस्सुतस्य । यदिन्द्रो अपिबच्छचीभिः । अहं तदस्य मनसा शिवेन । सोमं॰ राजानमिह भक्षयामि इति वा स्वयं पिबेत्[२१] ॥ **द्वे स्रुती अशृणवं पितृणाम् । अहं देवानामुतमर्त्यानाम् । ताभ्यामिदं विश्वं भुवनं॰ समेति । अन्तरा पूर्वमपरं च केतुम्** इति वा वल्मीकवपायामवनयेत् ।

दक्षिणेऽग्नौ शतातृण्णां स्थालीं प्रबद्धां धारयति[२२] । तस्या बिल उदीचीनदशं **(वालस्रावं)** पवित्रं वितत्य । **यन्मे मनः परागतं यद्वा मे अपरागतम् । राज्ञा सोमेन तद्वयमस्मासु धारयामसि** इति तस्मिन् शतमानं हिरण्यं निधाय । **सोमः प्रतीकाः पितरः स्तृप्णुत** इति

---

१८. अश्विभ्यामिदम् । सरस्वत्या इदम् । इन्द्राय सुत्राम्ण इदम् । इति पाठान्तरम् ।

१९. अयं भाष्यकारकपर्दिपक्षः । उपदेशपक्षे तु प्राकृतहुतानुमन्त्रणस्य नायं प्रत्याम्नायः, न स्विष्टकृतो हुतानुमन्त्रणं च । अपूर्वो विधिः यजमानानुमन्त्रणम् । अग्नेः स्विष्टकृतोऽहं---आयुष्मान् यज्ञेन --- इति पाठा० ।

२०. ब्राह्मणस्य पातुः पापमस्त्येव ।

२१. क्षत्रियवैश्ययोरप्रतिषेधात् तयोरेव अयं विधिः ।

२२. कश्चित्पुरुषः स्थालीं रज्वादिभिः प्रबध्य उपरि धारयतीत्यर्थः ।

प्राचीनावीति तस्मिन् यत्सते सुराशेषं तदानयति ।

स्रवन्तीं सौमीभिः पितृमतीभिः तिसृभिस्तिसृभिः उत्तरोत्तराभिरुपतिष्ठन्ते अध्वर्युब्रह्महोतारः । **त्व॑ सोम प्रचिकितो मनीषा** इत्येता आम्नाता भवन्ति । पुरस्तादध्वर्युः दक्षिणतो ब्रह्मा पश्चाद्धोता ॥ **त्व॑ सोम प्रचिकितो मनिषा त्व॑ रजिष्ठमनु नेषि पन्थाम् । तव प्रणीती पितरो न इन्दो देवेषु रत्नमभजन्त धीराः ॥ त्वया हि नः पितरः सोम पूर्वे कर्माणि चक्रुः पवमान धीराः । वन्वन्नवातः परिधी॑रपोर्णु वीरेभिरश्वैर्मघवा भवा नः ॥ त्व॑ सोमः पितृभिः सँविदानोऽनु द्यावापृथिवी आततन्थ । तस्मै त इन्दो हविषा विधेम वय॑ स्याम पतयो रयीणाम् ॥** पुरस्तात्प्रत्यङ्मुखस्तिष्ठन्नध्वर्युः ॥ **बर्हिषदः पितर ऊत्यर्वागिमा वो हव्या चकृमा जुषध्वम् । त आ गताऽवसा शन्तमेनाथास्मभ्य॑ शँय्योररपो दधात ॥ आहं पितृन्त्सुविदत्रा॑ अविथ्सि नपातं च विक्रमणं च विष्णोः । बर्‌हिषदो ये स्वधाया सुतस्य भजन्त पित्वस्त इहा गमिष्ठाः ॥ उपहूताः पितरस्सोम्यासो बर्‌हिष्येषु निधिषु प्रियेषु । त आगमन्तु त इह श्रुवन्त्वधि ब्रुवन्तु ते अवन्त्वस्मान् ॥** दक्षिणत उदङ्मुखो ब्रह्मा उपतिष्ठते ॥

अग्निष्वात्ताः पितर एह गच्छत सदस्सदस्सदत सुप्रणीतयः । अत्ता हवी॑षि प्रयतानि बर्‌हिष्यथा रयि॑ सर्ववीरं दधातन ॥ अग्निष्वात्तानृतुमतो हवामहे नराश॑से सोमपीथं य आशुः । ते नो अर्वन्तः सुहवा भवन्तु शं नो भवन्तु द्विपदे शं चतुष्पदे ॥ ये अग्निष्वात्ता येऽनग्निष्वात्ताः अ॑होमुचः पितरस्सोम्यासः । परेऽवरेऽमृतासो भवन्त्वधि ब्रुवन्तु ते अवत्वस्मान् इति होता पश्चात् प्राङ्मुख उपतिष्ठते ॥

यदग्ने कव्यवाहन पितॄन् यक्ष्यृतावृधः । प्र च हव्यानि वक्ष्यसि देवेभ्यश्च पितृभ्य आ ॥ त्वमग्न ईडितो जातवेदोऽवाड्ढव्यानि सुरभीणि कृत्वा । प्रादाः पितृभ्यस्स्वधया ते अक्षन्नद्धि त्वं देव प्रयता हवी॑षि ॥ मातली कव्यैर्यमो अङ्गिरोभिर्बृहस्पतिर्ऋक्वभिर्वावृधानः । या॑श्च देवा वावृधुर्ये च देवान्थ्स्वाहान्ये स्वधयान्ये मदन्ति इति तिसृभिः काव्यवाहनीभिर्दक्षिणेऽग्नौ शतातृण्णां प्रतिष्ठापयत्यध्वर्युः ।

अथ पशुभिः प्रचर्य पुरोडाशैः प्रचरति । ***शृत॑हवी३श्शमितः*** इत्यादि । **सं ते मनसा -- अश्विभ्यां त्वा जुष्टमभिघारयामि** । अन्यः पृषदाज्यमानयति आज्यं च । **सरस्वत्यै त्वा**

जुष्टमभिघारयामि । इन्द्राय त्वा जुष्टमभिघारयामि । यस्त आत्मा इति क्रमेण आज्येन पशूनभिघारयति । ***स्वाहोष्मण*** इत्यूष्माभिमन्त्रणं तन्त्रेण । उद्वासनं क्रमेण स्वेन स्वेन हृदयशूलेन सह । पञ्चहोत्रासादनं क्रमेण । **इदमिन्द्रियं** इति त्रिः । **अयं यज्ञो, ममाग्ने** पञ्चहोतेत्यासन्नाभि–मर्शनम् । अभ्यावर्तते मनोता । चतसृषूपस्तृणीते इत्यादि । जुह्वां दैवतान्यवदाय उपभृति स्विष्टकृदर्थं त्र्यङ्गान्यवदाय नाभिघारयति । समवत्तधान्यां तूष्णीं षडाद्यानीडामवद्यति वनिष्ठुं सप्तमम् । अनस्थिभिरिडां वर्धयति नाभिघारयति । वसाहोमं गृहीत्वा अनवदानीयैः संमृश्य । अथ हविषा प्रचरति । ***अश्विभ्यां छागस्य हविषोऽनुब्रू३हि । अश्विभ्यां छागस्य हविषः प्रेष्य ।*** अर्धर्चे वसाहोमं कृत्वा न दिग्यागः । वसाहोमशेषमन्यत्र निधाय । वषट्कृते जुहोति । अश्विभ्यामिदम् । **अश्विनोरहं --- जेमानं --- गमेयम् ।** पुनः जुहूं वसाहोमहवनीं चोपस्तीर्य दैवतान्यवदाय, उपभृति हविष्येव त्र्यङ्गान्यवदाय नाभिघारयति । जुहूमभिघार्य, पूर्ववत् समवत्तधान्यां इडामवदाय नाभिघारयति वसाहोमं गृहीत्वा **ऐन्द्रः प्राण** इत्यन्तं कृत्वा ***सरस्वत्यै मेषस्य हविषोऽनुब्रू३हि । सरस्वत्यै मेषस्य हविषः प्रेष्य ।*** अर्धर्चे वसाहोमं कृत्वा न दिग्यागः । पूर्वशेषे उद्रेकं समवनयति । वषट्कृते जुहोति । सरस्वत्या इदम् । **सरस्वत्या अहं --- वाचमन्नाद्यं पुषेयम् ।** पुनः जुहूं वसाहोमहवनीं चोपस्तीर्य दैवतान्यवदाय, उपभृति हविष्येव त्र्यङ्गान्यवदाय हिरण्यशकलमुपरिष्टात् कृत्वा नाभिघारयति । जुहूमभिघार्य, पूर्ववत् समवत्तधान्यां इडामवदाय यूष्णोपसिञ्चति । नाभिघारयति । वसाहोमं गृहीत्वा **ऐन्द्रः प्राण** इत्यन्तं कृत्वा । ***इन्द्राय वृष्णोर्हविषोऽनुब्रूहि । इन्द्राय वृष्णोर्हविषः प्रेष्य ।*** अर्धर्चे वसाहोमं कृत्वा उद्रेकान्थ्समवनीय **दिशस्स्वाहा** इत्यादि दिग्यागः । वषट्कृते जुहोति । इन्द्रायेदम् । **इन्द्रस्याहं ---जेमानं ---गमेयम् ।** ततः पुरोडाशैः प्रचरति । जुह्वामुपस्तीर्येत्यादि । ***इन्द्रायानुब्रूहि । इन्द्रं यज ।*** इन्द्रायेदम् । **इन्द्रस्याहं देवयज्ययेन्द्रियाव्यन्नादो भूयासम् ।** ***सवित्रेऽनुब्रूहि । सवितारं यज ।*** सवित्र इदम् । **सवितुरहं--- अन्नादः ।** ***वरुणायानुब्रूहि । वरुणं यज ।*** वरुणायेदम् । **वरुणस्याहं-- अन्नादः ।** नारिष्ठान् हुत्वा, वनस्पति यागं कृत्वा । अथ पुरोडाशेभ्यः स्विष्टकृतमवद्यति तस्मिन्नेवोपभृति पशुस्स्विष्टकृता सह । पुरोडाशेभ्यः अवदाय अभिघारयति । जुह्वामौपभृतानि विपर्यस्यन्नाह ॥ **अग्नये स्विष्टकृतेऽनुब्रूहि । अग्नये स्विष्टकृते प्रेष्य ॥** अग्नये स्विष्टकृत इदम् । **अग्नेस्स्विष्टकृतोऽहं --- गमेयम् ।** वैश्वानरे हविः ।

ततः प्राशित्रम् । पुरोडाशेडां च पश्चिडया सहावदाय अभिघारणम्, यजमानभागवर्जम् । मार्जनान्ते सावित्रवारुणयोश्चतुर्धाकरणम् । अग्नीदौपयजानित्यादि । सर्वेषां गुदकाण्डैरुपयजति **समुद्रं गच्छत स्वाहान्तरिक्षं गच्छत स्वाहा** इत्यादि सर्वत्र ऊहः । अनूयाजान् इष्ट्वा प्रत्याक्रम्य स्वरूणां होमः **द्यां वो धूमो --- पृणध्व॑ स्वाहा** । स्वरुभ्य इदम् । जाघनीभिः पत्नीस्संया– जयन्ति । न पत्न्यञ्जलौ निनयनम् । न योक्त्रविमोकः । उपवेषोद्वासने कृते अवभृथस्य तन्त्रं प्रक्रमयति ॥

वारुणमेककपालं निर्वपति । या जाता ओषधय इत्यादि । तूष्णीं परिभोजिनीमुलपराजीं च । नेध्माहरणम् । वेदं कृत्वोपवेषः । अलङ्कृत्य परिस्तीर्य कर्मणे वामित्यादि । पात्रप्रयोगकाले स्फ्यमग्निहोत्रहणीवर्जान्यपरतः । एककपालं शूर्पं च द्वन्द्वम् । कृष्णाजिनादि षट्कम् । पुरतः पात्रीं मेक्षणम् मदन्त्यर्थमुपवेषमुत्पवनार्थं च द्वंद्वं प्रयुज्य । पवित्रकरणादि । **वरुणाय जुष्टं निर्वपामि । वरुण हव्य॑ रक्षस्व । वरुणाय वो जुष्टं प्रोक्षामि । वरुणाय जुष्टमधिवपामि** । प्रथमेन कपालमन्त्रेणैककपालमुपधाय । **भृगूणामङ्गिरसां तपसा तप्यस्व** कपालेऽङ्गारानध्यूह्य । **वरुणाय जुष्ट॑ संवपामि** । आप्यलेपं बर्हिषि निनीय । स्फ्यं तिर्यञ्चं स्तब्ध्वा सम्प्रेष्यति ***प्रोक्षणीरासादयाज्येनोदे३हि*** । न प्रोक्षणीनामभिपूरणम् । उदञ्चं स्फ्यमपोह्य दक्षिणेन स्फ्यं असंस्पृष्टास्सर्वान्निनीय । **शतभृष्टिरसि** । ***अग्ने गृहपते । पूषा ते बिलम्*** । न प्रोक्षण्युत्पवनम् । न चाद्भिराज्यमाज्येन । चतुर्गृहीतान्याज्यानि पञ्चावत्तिनामपि । अननूयाजपक्षे आद्यैः चतुर्भिरुपभृति । यदनूयाजौ **पञ्चानां त्वा दिशां, पञ्चानां त्वा पञ्चजनानां, चरोस्त्वा पञ्चबिलस्य, ब्रह्मणस्त्वा तेजसे** इत्येतैश्चतुर्भिर्गृह्णाति । सुप्रजास्त्वायेति चतुर्ध्रुवायाम् । **अयं प्राणश्च । इदमह॑ सेनाया** इत्यादि । **वरुणाय जुष्टमभिघारयामि । स्योनं ते । देवस्त्वा** इति वारुणमलङ्कृत्योत्तरवेद्यंसे आज्यैस्सह तूष्णीमासादयति । न च आसन्नाभिमर्शनम् ।

अवभृथमवैष्यन् जुहुयात् **आयुर्दा अग्ने हविषो जुषाणो घृतप्रतीको घृतयोनिरेधि । घृतं पीत्वा मधु चारु गव्यं पितेव पुत्रमभि रक्षतादिम॑ स्वाहा ॥** आयुर्देऽग्नय इदम् । **अवभृथ निचङ्कुण नि चेरुरसि निचङ्कुणावदेवैर्देवकृतमेनोऽयाडव मर्त्यैर्मर्त्यकृत–मुरोरानो देव रिषस्पाहि स्वाहा ॥** अवभृथायेदम् । **नमो रुद्राय वास्तोष्पतये । आयने विद्रवणे । उद्याने यत्परायणे । आवर्तने विवर्तने । यो गोपायति त॑ हुवे स्वाहा ॥**

रुद्राय वास्तोष्पतय इदम् । अप उपस्पृश्य । स्रुवेण होमः । यस्मिन्नग्नौ हविश्श्रपणं तस्मिन्नेव होमः ।

उरु७ं हि राजा --- हृदयाविधश्चित् सर्वे सहपत्नीकाः हविराज्यानि हृदयशूलान् मासरं ग्रहपात्राणि सतं वालस्रावं श्येनपत्रं दध्यौदुम्बरशाखां च गृहीत्वा वेद्या अभिप्रयान्तो वदन्ति । न सामगानम् । **शतं ते राजन् --- प्रमुमुग्ध्यस्मत्** अपो दृष्ट्वा यजमानो जपति । **अध्वर्युः – सूर्यो वः पुरस्तात् ---- शस्त्याः** अपोऽभिमन्त्रयते । **यजमानः – युनज्मि वो ब्रह्मणा दैव्येन हव्यायास्मै वोढव आपः । इन्धाना वस्सुप्रजसस्सुवीरा ज्योग्जीवेम बलिहृतो वयं वः । यन्म आपो अस्य यज्ञस्य रिष्याद्यद्वा स्कन्दादाज्यस्योत विष्णवः ॥ तेन हन्मि सपत्नं दुर्मरायुमैनं दधामि निर्ऋत्या उपस्थे ॥ तेजिष्ठा वस्तपना या च रोचना प्रत्योषन्तीस्तनुवो या व आपः । ताभिर्वर्माण्यभितो व्ययध्वं मा वो दभन्, यज्ञहनः पिशाचाः** अभिमन्त्रयते । **अभिष्ठितो वरुणस्य पाशः** उदकान्तमभितिष्ठन्ते । अपः प्रगाह्य तिष्ठन्तोऽवभृथेन चरन्ति । तृणं प्रहृत्य स्रौवमाघारयति । यदि वा पुरा तृणं स्यात्तस्मिन् जुहुयात् । **आ प्यायताम्** । ***अग्नीदपस्त्रिस्सम्मृड्ढि*** इति सम्प्रेष्यति । **आग्नीध्रः – आपो वाजजितो वाजं वस्सरिष्यन्तीर्वाजं जेष्यन्तीर्वाजिनीर्वाजजितो वाजजित्यायै सम्मार्ज्म्यपो अन्नादा अन्नाद्याय** अपः प्राञ्चं त्रिस्सम्मार्ष्टि । **भुवनमसि विप्रथस्वापो यष्ट्र्य इदं नमः** । जुह्वेहीत्यादि । नाग्नाविष्णू । **अग्नेरनीकमप आविवेश । अपान्नपात् प्रतिरक्षन्नसुर्यं दमेदमे समिधं यक्ष्यग्ने । प्रति ते जिह्वामुच्चरण्येत् स्वाहा** स्रुच्यमाघारयति । यजमानः – **वागस्याग्नेयी सपत्नक्षयणी** इत्यनुमन्त्रयते । अग्नय इदम् । लुप्यते प्रवरः । घृतवति शब्द इत्यादि । त्रीन् प्रयाजानिष्ट्वा औपभृतं सर्वमानयति । अनूयाजपक्षे अर्धमानयति । पञ्चममेव इष्ट्वा शेषेण ध्रुवामभिघार्य वारुणमभिघारयति । नोपभृतं अननूयाजपक्षे । अनूयाजपक्षे उपभृतमन्ततः । आज्यभागाविष्ट्वा । ***वरुणायानुब्रू३हि*** । ***वरुणं यज*** । वरुणायेदम् । **वरुणस्याहं देवयज्ययान्नादो भूयासम्** । नारिष्ठान् हुत्वा । जुह्वामुपस्तीर्य कृत्स्नं पुरोडाशमवदाय द्विरभिघार्य स्विष्टकृतौ ध्रौव समाप्तिः ***अग्नीवरुणाभ्यामनुब्रू३हि । अग्नीवरुणौ यज ।*** अग्नीवरुणाभ्यामिदम् । **अग्नीवरुणयोरहं देवयज्ययायुष्मान् यज्ञेन प्रतिष्ठां गमेयम्** । अग्नीवरुणौ स्विष्टकृदर्थे यजति । अननूयाजपक्षे नोत्तरं क्रियते । अत्रैवेष्टिसमाप्तिः । अनूयाजपक्षे ***अग्नीदपस्सकृत् सम्मृड्ढीति*** सम्प्रेष्यति । आग्नीध्रः **आपो वाजजितो वाजं वस्सस्रुषीर्वाजं जिग्युषीर्वाजिनीर्वाजजितो वाजजित्यायै**

सं माज्र्यपो अन्नादा अन्नाद्याय सकृदपस्स्पर्येनैव सम्मार्ष्टि । औपभृतं जुह्वामानीय । अपबर्हिषावनूयाजौ यजति । देवौ यजेति प्रथमं संप्रेष्यति । यजेत्युत्तरम् । अत्र इष्टिस्समाप्यते ।

मासरं[२३] दध्ना औदुम्बरशाखया तूष्णीं प्रोक्षति । मासरस्य स्रुचं पूरयित्वा **समुद्रे ते --- विधेम** इति अप्सूपमारयति । ततो यो भिन्दुः उत्प्लवते तं तूष्णीमुपस्पृशेत् । **यस्ते देववरुण गायत्रच्छन्दाः पाशः । तं त एतेनावयजे स्वाहा** आश्विनपात्रमवभृथे प्रविध्यति ॥ **यस्ते देववरुण त्रिष्टुप्छन्दाः पाशः । तं त एतेनावयजे स्वाहा** सारस्वतम् ॥ **यस्ते देववरुण जगती छन्दाः पाशः । तं त एतेनावयजे स्वाहा** ऐन्द्रम् ॥ ***यस्ते देववरुणानुष्टुप्छन्दाः पाशः । तं त एतेनावयजे स्वाहा*** सतं वालस्रावं श्येनपत्रं च ॥ ***यस्ते देववरुण पङ्क्तिश्छन्दाः पाशः । तं त एतेनावयजे स्वाहा*** हृदयशूलान् ॥ **इमं विष्यामि --- पत्या करोमि** पत्नी योक्त्रं वि सृजते । अन्ये वाससी परिधाय योक्त्रं वाससी चावभृथे प्रविध्य । **देवीराप एष --- सुकृतो ब्रूतात्** अवभृथं यजमानोऽभिमन्त्र्य । **सुमित्रा न आप --- वयं द्विष्मः** अपः प्रगाह्य सशिरस्कावनुपमक्षन्तौ स्नातः पत्नी यजमानश्च । अन्योन्यस्य पृष्ठे प्रधावतः । न यद्दिदीक्षे । अहते वसानौ तीरमागच्छतः । **उद्वयं तमसस्परि --- ज्योतिरुत्तमम्** इत्यादित्यमुपस्थाय । **प्रतियुतो --- वरुणस्य पाशः** उदकान्तं प्रत्यसित्वा । पुनरप्सु प्रविश्य । समित्पाणयः तूष्णीमप्रतीक्षमायन्ति । **एधोऽस्येधिषीमहि । समिदसि । तेजोऽसि तेजो मयि धेहि** आहवनीये तिस्रस्समिध आधाय । **अपो अन्वचारिषꣳ रसेन समसृक्ष्महि । पयस्वाꣳ अग्न आगमं तं मा सꣳसृज वर्चसा** इत्युपतिष्ठन्ते । ब्रह्मा ***अयाडग्निः*** इत्युपस्थाय यथेतं प्रति निष्क्रामति । यजमानः **अग्निना देवेन** इत्यादि गोमज्जपान्ते[२४] । **नमस्स्वरुभ्यः** इति यूपमुपस्थाय । **यज्ञ शं च म** इति जपति । ब्राह्मणतर्पणान्तम् । सन्तिष्ठते चरकसौत्रामणिः ॥

॥ इति अङ्गसौत्रामणिप्रयोगः ॥

२३. ईषत्तप्तानां यवानां सूक्ष्मं चूर्णं दध्ना तक्रेण वा मिश्रितं दर्भैः प्रच्छन्नं मासरमित्युच्यते इति सायणभाष्यम् ।
२४. तूष्णीं चतुरो विष्णुक्रमान् प्राचो क्रामति इति द्रा. प्र ।

॥ मैत्रावरुणी आमिक्षा ॥

अनन्तरे पर्वणि मैत्रावरुण्यामिक्षया यजेत। श्री परमेश्वरप्रीत्यर्थं अग्निचयनाङ्गमैत्रावरुण्यामिक्षया यक्ष्ये। **विद्युदसि**। अग्नीनन्वाधाय शाखामाहृत्य व्रतप्रवेशः। प्रकृतिवदिद्ध्माबर्हिराहरणम्। उत्तरेण गार्हपत्यमित्यादि। नेध्मप्रव्रश्चनम्। वेदं कृत्वा वेदिः। अन्तर्वेदिशाखाया इत्यादि। न पर्णवल्कः। कुम्भीलेपनान्तम्। **इमौ पर्णं च। वायवस्स्थः। परिस्तृणीत, देवा देवेषु, कर्मणे वाम्**। पात्रप्रयोगकाले स्फ्यमग्निहोत्रहवणी–मपरतः। स्रुवं जुहूं उपभृतं ध्रुवां वेदमाज्यस्थालीमिडापात्रं योक्त्रं वेदाग्राण्यन्वाहार्यस्थालीमुपवेषं प्रातर्दोहपात्राणि वाजिनपात्रं च प्रयुज्य। पवित्रे कृत्वा ब्रह्मवरणम्। **सं विशन्ताम्, अग्निꣳ होतारम्, कस्त्वा युनक्ति स त्वा युनक्तु**। प्रोक्षणीस्संस्कृत्य ब्रह्माणमामन्त्र्य पात्राणि प्रोक्ष्य प्रोक्षणीशेषं निधाय। **एता आचरन्ति** इत्यादि। **कामधुक्षः प्र णो ब्रूहि मित्रावरुणाभ्यां हविरिन्द्रियम्** *। बहुदुग्धि मित्रावरुणाभ्यां देवेभ्यो हव्यम् ॥* सङ्क्षालननिनयनान्तम्। तप्ते प्रातर्दोहे लौकिकं दध्यानयति। **अन्तरितम्, अविदहन्तः श्रपयत**। ***ब्रह्मन्नुत्तरं*** इत्यादि प्राशित्रवर्जं स्रुक् संमार्गः। विष्णूनि स्थेत्यन्तम्। **यस्त आत्मा** इत्यभिघार्य। **दृꣳह** इत्युद्वास्य। अभुक्तेन वाससा संशोध्य। यत्संवर्तते सामिश्खा यदन्यत्तद्वाजिनम्। आमिक्षां द्वयोः पात्रयोरुद्धृत्य वाजिना एकदेशेनोपसिञ्चति। **प्रियेण** इत्यासादनम्। उत्करे वाजिनम्। **इदमिन्द्रियम्, अयं यज्ञो, ममाग्ने** पञ्चहोता इत्यासन्नाभिमर्शनम्। अयं वेद इत्यादि। प्रचरणकाले ***मित्रावरुणभ्यामनुब्रूहि मित्रावरुणौ यज***। मित्रावरुणाभ्यामिदम्। **मित्रावरुणयोरहं देवयज्यया जेमानं महिमानं**। नारिष्ठान् हुत्वा स्विष्टकृदादि। अन्वाहार्यो दक्षिणा। संस्रावान्ते वाजिनयागः। **यज्ञो बभूव। यज्ञ शं च म** वर्जम्। ब्राह्मणतर्पणान्तम्। इष्टिः सन्तिष्ठते ॥

आमिक्षा सद्य एव स्याल्लौकिकेन हि तच्यते।
प्रसूमयाद्यामिक्षायां नेष्यते केचिदत्र तु।
ऋत्वन्ते पर्वणोर्वाऽङ्गसौत्रामण्याः क्रिया भवेत् ॥

॥ इति मैत्रावरुणी आमिक्षा ॥

॥ प्रस्तोतुः चितेरुपस्थानस्य प्रयोगः ॥

मण्डूकविकर्षणान्ते अग्नेर्दक्षिणतो गत्वा शिरसि प्रत्यङ्मुखस्तिष्ठन् अग्न आयूंषीति त्रिवृद्गायत्रं निरुक्तं गायति[१]। प्रत्यागत्य दक्षिणपक्षे उदङ्मुखस्तिष्ठन् रथन्तरं तृचं गायेत्। ततः पुच्छस्य पश्चिमेन गत्वा उत्तरे पक्षे दक्षिणामुखः पश्चात्प्राङ्मुखो वा बृहत्तृचं गायेत्। प्रत्याव्रज्य पुच्छे यज्ञायज्ञियं तृचं गायेत् संवत्सरो दैक्षस्सौत्यो वा यथा तापश्चितगवामयनादिषु। अन्यत्र ज्योतिष्टोमादौ ऋतुस्थायज्ञायज्ञियं त्रिः। प्रजापतिर्बृहत्तवः। दक्षिणपक्षस्य पश्चाद्वामदेव्यं तृचं प्रजापतेर्हृदयमुत्तरस्याम्[२]। ऋषिदेवते प्रजापतिः। आक्रमणीष्टकासमीपे श्यैतं तृचं गायेत्। रथचक्रचितौ पक्षपुच्छाद्यभावे तत्प्रदेशे गानमिति विशेषः। समानमग्निष्टोमेन। सोऽयं रथन्तरपृष्ठो बृहद्वासन्त इति। बृहती छन्द ऋषिः प्रजापती रुद्रो देवता। वामदेव्यं दक्षिणेऽपि कक्षे। प्रजापतेर्हृदयमुत्तरेऽपि कक्षे। अस्य नास्ति छन्द इति केचित्। ऋक्षु गानाभावात्। ऋषिः प्रजापतिर्देवता च। एवं गौतममतमिति । अध्वर्युपथे श्यैतं गायेत्तृचम्। आक्रमणीष्टकासमीपमध्वर्युपथः। गौतमीयपक्षेऽपि श्यैतमिच्छन्ति केचन। नेच्छन्त्यनुक्तत्वात्। प्रातस्सवने हुतायां वपायां धिष्ण्योपस्थाने समुद्रोऽसि विश्वव्यचा इति ब्रह्मणस्सदनस्योपस्थानम्। ब्रह्मसदनमिति धिष्ण्यम्। साग्निचित्ये ऋतावेव प्रशास्तृधिष्ण्यस्य दक्षिणतः ब्रह्मसदनं धिष्णियं भवति। शेषमग्निष्टोमवत्।

तत्र श्लोकाः –

ब्रहद्रथन्तरेऽभ्यासे व्यत्यासेन प्रयोजयेत्।
रथन्तरं सदैव स्यात् ब्रह्मणश्चेति केचन॥
राजन्यस्य बृहत्कार्यं षोडशी तस्य गृह्यते।
विश्वज्योतिधुरां चैव निवृत्तिस्तत्र चैव हि॥
श्यैतस्य प्रथमाहारे पावमानस्य विश्वजित्।
प्रतिपच्च तथाज्येषु विश्वेमिन्द्र ताहुवे॥

---

१. 'अनिरुक्तगानं नाम केवलं प्रणवेनैव गानम्। निरुक्तगानं तु प्रत्यक्षरमृगक्षरेणैव गानम्' इति द्राह्यायणसूत्रस्य धन्विभाष्यम् (द्रा.श्रौ.सू=१-२-१-१४)।

२. उत्तरपक्षस्य पश्चादित्यर्थः।

कण्वस्य च तरं पृष्ठमभि त्वा शूर नो नुमः ।
आनो विश्वाविशीयं च ब्रह्मसाम तथैव च ॥
शिष्टं प्रकृतिवत्कार्यं विकृतिष्वग्निरिष्यते ।
प्रकृतावपि केचित्तु बौधायनमताश्रयात् ॥
मीमांसका केचन तत्राप्यस्तीति द्राह्यायणसूत्रात् ॥

॥ इति प्रयोगस्समाप्तः ॥

॥ सस्वराः वसोर्धारानुमन्त्रणमन्त्राः ॥ (९३ पृष्ठे उक्ताः)

एता अर्षन्ति हृद्यात्समुद्राच्छतव्रजा रिपुणा नावचक्षे ।
घृतस्य धारा अभि चाकशीमि हिरण्ययो वेतसो मध्य आसाम् ॥
सम्यक्स्रवन्ति सरितो न धेना अन्तर्हृदा मनसा पूयमानाः ।
एते अर्षन्त्यूर्मयो घृतस्य मृगा इव क्षिपणोरीषमाणाः ॥
सिन्धोरिव प्राध्वने शूघनासो वातप्रमियः पतयन्ति यह्वाः ।
घृतस्य धारा अरुषो न वाजी काष्ठा भिन्दन्नूर्मिभिः पिन्वमानः ॥
अभि प्रवन्त समनेव योषाः कल्याण्य१ः स्मयमानासो अग्निम् ।
घृतस्य धाराः समिधो नसन्त ता जुषाणो हर्यति जातवेदाः ॥
कन्या इव वहतुमेतवा उ अञ्ज्यञ्जाना अभि चाकशीमि ।
यत्र सोमः सूयते यत्र यज्ञो घृतस्य धारा अभि तत्पवन्ते ॥
अभ्यर्षत सुष्टुतिं गव्यमाजिमस्मासु भद्रा द्रविणानि धत्त ।
इमं यज्ञं नयत देवता नो घृतस्य धारा मधुमत्पवन्ते ॥
धामन्ते विश्वं भुवनमधि श्रितमन्तः समुद्रे हृद्य१न्तरायुषि ।
अपामनीके समिथे य आभृतस्तमश्याम मधुमन्तं त ऊर्मिम् ॥ ऋ=४,५८,५-
११

॥ अथ कारिकाः ॥